अर्वाचीनसंस्कृतम्

(अष्टमवर्षे प्रथमोऽङ्कः)

१५ जनवरी १९८६

सम्पादक :

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली - ११००५९

अर्वाचीनसंस्कृतम् (८/१)

विषय-सूची

विषयः	लेखकः	पृष्ठसंख्या
१. सम्पादकीयम्		
२. रक्ष तं भारतम्	(श्री श्रीनिवास रथः, उज्जयिनी)	२-
३. नवभारतपुराणम् (१—७ अध्यायाः)	(डा० रमेशचन्द्र शुक्लः)	५-९
४. भारतं भजामः	(श्री अरविन्दनाभ शुक्लः)	९
५. राष्ट्रदेवते !	(डा० रमाकान्त शुक्लः)	९
६. ज्योत्स्ना मेघासनमधिशयिता	(डा० उमाकान्त शुक्लः)	९
७. इह तमसां राज्ये !	(डा० लीना रस्तोगी)	९
८. दंश-वेदना	(डा० भास्कराचार्य त्रिपाठी)	९
९. मुक्तकानि	(डा० रमेशकुमार लौ)	९
१०. क्व कालिदासस्य जगाम भारती	(डा० वच्चूलाल अवस्थी)	
११. सा गीर्वाग् रमतां सदा मम मनः	(कु० सुस्मिता शुक्ला)	
१२. कालातीतः	(डा० सी० आर० स्वामिनाथः)	
१३. कविर्मानवश्च	(डा० रामसुरेश पाण्डेयः)	
१४. देववाणी-परिषद्वार्ता	(रमा शुक्ला)	६६-१
१५. संस्कृत-जगद्वार्ता	(,, ,,)	१

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20.00 (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नई दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (८/१) प्रधानसम्पादकः—डा० रमाकान्तशुक्लः प्रकाशनतिथिः ३१.१.१९८६ ।

सम्पादकीयम्

अनेनाङ्केन 'अर्वाचीनसंस्कृतम्' अष्टमं वर्षं प्रविशति ।

अष्टमवर्षीये प्रथमेऽङ्के आचार्यरमेशचन्द्रशुक्लप्रणीतस्य 'नवभारत-पुराण'स्य सप्ताध्यायाः प्रकाश्यन्ते । चत्वारोऽध्याया द्वितीयेऽङ्के प्रकाशयिष्यन्ते । परिषदा 'नवभारतपुराणस्य' प्रकाशनं १५ अगस्त १९८५ ई० तारिकायां कृतम् । तच्च सस्करणमल्पीयसैव कालेन समाप्तिमगमत् । अर्वाचीनसंस्कृतस्य पाठका अपि अनेन परिचिता भवेयुरिति कृत्वा तेषां कृते इदमत्र अल्पमूल्येनैव सुलभीक्रियते । अस्मिन् ग्रन्थे आचार्यशुक्लेन स्वतन्त्रभारतस्य वर्तमानदशाः समासेन वर्णिताः । पूर्वपीठिकारूपेण स्वातन्त्र्यसंग्रामोऽपि वर्णितः ।

एतदतिरिक्तं देववाणी-परिषदा २९-१२-१९८५ ई० तारिकायां दिल्ली-विश्वविद्यालयस्य टैगोरसभागारे समायोजितेऽष्टमेऽखिलभारतीयसंस्कृतकवि-सम्मेलने पठिताः पाठार्थं प्राप्ताश्च काश्चन रचना अपि प्रकाश्यन्ते ।

देववाणी-परिषद्वार्तायां परिषदः कार्यकलापाः, संस्कृतजगद्वार्तायां च मुख्याः संस्कृत-जगद्घटनाः प्रकाश्यन्ते ।

अस्माभिः केषञ्चिन्नवप्रकाशितग्रन्थानां समीक्षा अस्मिन्नंके प्रकाशयितु-मिष्टासीत्, किन्तु अद्यावधि समीक्षकमहाभागैस्समीक्षास्मत्सकाशे न प्रेषितेति कृत्वा नवप्रकाशनचर्चात्र कर्तुं न पार्यते । आशासे अग्रिमेंऽके सा मुद्रापिता स्यात् ।

अर्वाचीनसंस्कृतस्य मूल्यं तु तदेवास्ति यद् अष्टवर्षाणि पूर्वमासीत् किन्तु पृष्ठसंख्या वर्द्धितास्ति । आशासे, पाठकाः नवपाठकान् अस्य ग्राहकतायै प्रेरयिष्यन्ति ।

अपरिहार्यकारणैरस्याङ्कस्य प्रकाशने पञ्चदशदिवसानां विलम्बोऽजायत । कृपालवः पाठकाः क्षन्तुमर्हन्ति प्रकाशकम् ।

विदुषां विधेयः

रमाकान्त शुक्लः

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

३०-१-१९८६ ई०
आर ६, वाणी-विहारः
नयी दिल्ली-११००५९

रक्ष तं भारतम् !

(श्री श्रीनिवास 'रथः', उज्जयिनी)

वेदवाग्भासुरा यत्र विश्वम्भरा
ऋग्यजुःसामकाथर्वसम्वर्धिता ।
विश्वभाषासु या सर्वसम्मानिता
देववाणी शुभा यत्र वाक् संस्कृता ॥
यत्र वाल्मीकिना क्रौञ्चशोकाश्रुणा
लोकवृत्ताद्भुतं काव्यमुद्भासितम् ।
व्याससम्पादितं यत्र गीतामृतं
रक्ष सर्वात्मना रक्ष तं भारतम् ॥

यत्र हैमो गिरिर्यत्र मन्दाकिनी
यत्र विन्ध्याटवी नर्मदावाहिनी ।
यत्र कृष्णा नदी यत्र भागीरथी
यत्र कावेरिका यत्र गोदावरी ॥
रासलीलालयो यत्र वृन्दावनं
राजते यत्र कामाक्षिकाञ्चीपुरम् ।
यत्र नीराजना यत्र दीपावली
रक्ष सर्वात्मना रक्ष तं भारतम् ॥

पालिभाषाङ्किताशोकलेखाङ्कितं
धर्मचक्रान्वितं स्तम्भसंस्थापनम्
बौद्धकारुण्यसौन्दर्यसन्दीपनं
सारनाथे परं स्तूपसम्मोहनम् ॥
साप्यजन्तागुहोन्मीलिता या कला
प्रस्तरोत्कीर्ण-कोणार्क-शिल्पे च या ॥
नास्ति वा तत्र किं ते मनस्सन्ततं
रक्ष सर्वात्मना रक्ष तं भारतम् ॥

अर्बुदोत्तुङ्गशैले कलामन्दिरं
जैनपूजापदं चुम्बतीवाम्बरम् ।
नानकोदीरिता ग्रन्थपूजापि सा
यत्र सौवर्णवर्णे सरोमन्दिरे ॥
शङ्कराचार्य-वेदान्तभाष्याजिरं
क्रीस्तधर्मेण वाकृष्यमाणास्पदम् ।
केरलेषूभयं कैरलं नादृतं
रक्ष सर्वात्मना रक्ष तं भारतम् ॥

पक्वबिम्बाधरा यक्षिणी स्वैरितां
मूर्च्छनां भूयशो विस्मरन्ती स्थिता ।
मेघदूते कथा कालिदासेन सा
साश्रुणा वर्णिता किं त्वयाकर्णिता ॥
यत्र शाकुन्तलं यत्र कादम्बरी
मालतीमाधवं गीतगोविन्दकम् ।
मानसोदीरितं रामनामाक्षरं
यत्र रामायणं रक्ष तं भारतम् ॥

तानसेनादिकैर्गीतमाराधितं
कत्थकं नर्तनं यत्र सम्वर्धितम् ।
वाटिका-मञ्जुला मौगलीया कला
ताजनामाङ्किता भूरि चन्द्रोज्ज्वला ॥
मञ्जु संगीतकं यत्र कर्णाटकं
कर्णसन्तर्पणं त्यागराजाश्रितम् ।
विश्वसौन्दर्यभासा समुज्जृम्भितं
रक्ष सर्वात्मना रक्ष तं भारतम् ॥

गाङ्गमम्भः सितं यामुनं चासितं
पावनं सङ्गमे तीर्थराजाभिधम् ।
सङ्गमाशंसिनस्तद्वदेवाधुना
भूयसे श्रेयसे भारतीया जनाः ॥

भिन्नधर्मानुगा वर्णभिन्नास्तथा
वेशभाषादिभिर्भेदभाजश्च ये ।
सङ्गता यत्र ते लोकतन्त्रोदये
रक्ष सर्वात्मना रक्ष तं भारतम् ।।

येऽधुना निर्धनाः शून्यशून्येक्षणाः
भावि तेषां कथं सार्थकं जीवनम् ।
तत्कृते कर्म यत्सर्वधर्मामृतं
तत्र संपत्स्यते सर्वदेवार्चनम् ।।
दुर्बलाराधनं राष्ट्रसम्वर्धनं
स्वीकृतं चेतसा यत्त्वया साम्प्रतम् ।
तेन रक्षा ध्रुवा सर्वदेशोत्तमं
रक्ष सर्वात्मना रक्ष तं भारतम् ।।

वर्तमानं यथा जीवनं दृश्यते
तत्त्वोपेक्षया प्रत्यहं क्षीयते ।
यादृशोऽत्र त्वया यत्न आधीयते
तादृशेनैव किं ते मतिस्तृप्यते ।।
अश्रुपूर्णेक्षणैस्त्वन्मुखापेक्षिणां
दुःखदारिद्र्य-पक्ष-क्षयो जायताम् ।
मुञ्च सङ्कोचमाधत्स्व सेवाव्रतं
रक्ष सर्वात्मना रक्ष तं भारतम् ।।

यत्र सूर्योदये यत्र चन्द्रोदये
सान्ध्यपूजाक्रिया सर्वसाधारणी ।
तत्र मे मानसं तत्र मे जीवनं
भारतस्योदयायास्तु सर्वार्पणम् ।।

श्रीः

नवभारतपुराणम्

अथ प्रथमोऽध्यायः

भारत-पराधीनता-स्थितिवर्णनम्

हेरम्बपादाम्बुजयुग्म सादरं
वन्देऽद्य भक्त्या नतमस्तको भवन्।
पूर्णं मदीयं कुरुतान्मनोरथं
देवो दयालुर्गिरिजात्मजो द्रुतम् ॥१॥

सरस्वतीं मातृदयालुमानसां
मतिप्रदां श्वेतसरोजशोभिताम्।
तुषारकुन्देन्दुनिभाम्बरां नतो
नमामि विद्यामृतवृष्टिकारिणीम् ॥२॥

शैलेन्द्रजावदनचुम्बितलोचनाब्जं
गङ्गाधरं हि शशिमौलिशिवं कृपालुम्।
वन्दे हरं परमकारणकारणं त्वां
भूत्वा नतोऽल्पधिषणः शरणागतोऽहम् ॥३॥

नमामि विष्णुं करुणामयं प्रभुं
चराचरेशाखिललोकरक्षकम्।
रमापतिं त्वां सुखसत्यशाश्वतं
चतुर्भुजं ज्ञानमयं जगत्पतिम् ॥४॥

सृष्टिं करोति सकलां भगवान् विरिञ्चिः
वेधाः प्रजापतिरजो जगतां विधाता ।
कारुण्यमूर्तिशरणागतवत्सलो यो
वेदाननं सविनयं तमहं नमामि ॥५॥

ब्रह्म स्मरामि मनसा वचसाप्यगम्यं
सच्चित्सुखं परमहंसपदं तुरीयम् ।
यस्मादसत्यमपि भाति जगद्धि सत्यं
रज्जौ भुजङ्गम इव प्रथितात्मतत्त्वात् ॥६॥

भूत्वाराजत यः कविर्मुनिवरोऽत्राद्यः कवीनां भवे
श्रीरामस्य पवित्रचारुचरितं पापघ्नशान्तिप्रदम् ।
वाल्मीकिस्तपसां निधिः सुललितं भक्त्या जगौ सादरं
तं नौमि प्रतिभार्चितं गुणगणैः सम्पूजितं भास्वरैः ॥७॥

येन व्यासमहर्षिणा विरचितं मान्यं महाभारतं
श्रीमद्भागवतञ्च येन विहितं श्रीकृष्णलीलामृतम् ।
प्राणीयन्त च लोकमित्रमतिना चञ्चत्पुराणान्यपि
येनाकारि च भिक्षुसूत्रममलं तस्मै नमः सादरम् ॥८॥

येषां कृपां समुपलभ्य परां गुरूणां
विद्या मया ह्युपनता सुरवाङ् मनोज्ञा ।
तेभ्यो नमः सविनयं शुचिमानसेभ्यो
ज्ञानस्वरूपशुभमञ्जुलमङ्गलेभ्यः ॥९॥

अम्बां च पितरं नत्वा स्वसारञ्च कृपामयीम् ।
पुराणं पावनं भक्त्या कुर्वे प्रीतमना भवन् ॥१०॥

अत्यन्तं नैतिकं पातं शोचनीयां दरिद्रताम् ।
चिन्त्यञ्च शिक्षाराहित्यं रोगानेकनिपीडनम् ॥११॥

नाना कष्टान्यसह्यानि सम्प्रेक्ष्यावनतस्थितिम् ।
महर्षीणां भुवो वंद्या शिवा भृशमदूयत ॥१२॥

प्रोवाच शङ्करं गौरी भारतस्य सुदारुणाम् ।
शोचनीयां स्थितिं प्रेक्ष्य जातास्मि भृशदुःखिता ॥१३॥

मानसं मामकं नाथ यात्युद्वेगं भृशं प्रभो ।
पावनोऽयं महान् देश ईदृशं पतनं गतः ॥१४॥

प्राब्रवीच्छङ्करो देवः प्रोक्तो देव्या तदा वचः ।
आश्वासनकरं श्लक्ष्णं पार्वतीं क्लान्तमानसाम् ॥१५॥

भारतीया स्थितिर्योक्ता तादृशी सा न संशयः ।
छलं छद्म च संश्रित्य श्वेताङ्गैः स्वार्थसेविभिः ॥१६॥

भारते स्थापितं स्वत्वं कुनीतिपथगामिभिः ।
यदृच्छाचारिभिर्धूर्तैः कलुशस्थैर्निरङ्कुशैः ॥१७॥

दोषाणां बहूनां सत्वाद् भीषणानां बलीयसाम् ।
पराजिता नृपाः सर्वे लक्ष्मीराज्ञी च तैर्जिता ॥१८॥

देशे संगठनाभावो द्वैधीभावोऽपि च स्थितौ ।
ईर्ष्या द्वेषश्च सञ्जातौ तस्मादाङ्ग्ला अमुं जयम् ॥१९॥

प्राप्तवन्तो भृशं शीघ्रं देश आसीत् तदा ह्ययम् ।
छिन्नो भिन्नो गतः कार्श्यं अनेकेशत्वमाश्रितः ॥२०॥

लक्ष्मी राज्ञीव यत्र स्याद् देशोऽसौ परवान् भवेत् ।
दुःखं दुःखं महद् दुःखं कलहो नाशकोऽनिशम् ॥२१॥

वीराङ्गनामिमां लक्ष्मीं वर्णयतु सविस्तरम् ।
अहं तां श्रोतुमिच्छामि कृपया वदतु प्रभो ॥२२॥

प्रोवाचेति नगेन्द्रस्य सुता शम्भुं कृपामयम् ।
आशुतोषं जगन्नाथं चन्द्रमौलिं वृषध्वजम् ॥२३॥

धन्यासि देवि नूनं त्वं श्रोतुं काङ्क्षसि यत् प्रिये ।
लक्ष्मीं वीराङ्गनां राज्ञीं भारताम्बासुतोत्तमाम् ॥२४॥

भारताम्बासुतां स्मृत्वा गर्वेण तां शिरो मम ।
भवत्युच्चं मुदात्यन्तं श्लाघेऽहं स्वं पुनः पुनः ॥२५॥

मोरोपन्तपिताभवच्छुचिमतिर्लक्ष्म्या जगत्यां गुणी
भर्ता किञ्च बभूव बन्धुरबलो गङ्गाधरो विश्रुतः ।
याते भर्तरि सा दिवं गुणवती राज्ञी बभूव क्षितेः
झांस्याः शक्तिमती महामतिमती देशस्य सद्भूषणम् ।।२६।।

जज्ञे क्व लक्ष्मीः सदृशी धरित्र्यां
वीराङ्गना भारतभूविभूतिः ।
संहृत्य शत्रून् बलदारुणान् सा
राष्ट्रस्य कीर्ति व्यतनोज्जगत्याम् ।।२७।।

प्रीणाति सा कं न हि देशभक्तं
स्वातन्त्र्यहेतोर्भरतक्षितेः सा ।
प्रौढं प्रकृष्टं विदधौ प्रयासं
वीराङ्गनारातिवनाग्निरौद्रः ।।२८।।

क्रूरारातिश्वेतकायप्रतान—
ध्वान्तस्तोमध्वंसनादित्य राज्ञी ।
झांस्याः लक्ष्मीः वीरतायाः पयोधिः
भूत्वा दुर्गा जन्यभूम्यां विरेजे ।।२९।।

दृप्यद्विरोधिमृगकेशरिणी प्रचण्डा
राष्ट्रप्रियातिशयभीषणशौर्यदीप्ता ।
सन्न्यायवर्तिजनचातकमेघरम्या
विभ्राजते स्म भुवि भारतभक्तवंद्या ।।३०।।

जन्याजिरे तां बलसिन्धुराज्ञीं
सम्प्रेक्ष्य शत्रुर्नितरां चकम्पे ।
स्थातुं न शेकेऽरिचमूविशाला
वीराङ्गना तामपिनट् सलीलम् ।।३१।।

परं गौरशरीराणां बलमासीद् बहूद्भटम् ।
विशालं परमं दक्षं साफल्यं न ययावतः ।।३२।।

अहमदो महान् शाह आजिमुल्ला च शौर्यवान् ।
तांत्या टोपे जगत्ख्यातः पेशवादिधराधिपाः ॥३३॥

कुमारसिंहभूरत्नवीरधीराः सहस्रशः ।
स्वातन्त्र्यसमरे प्रीत्या भागमग्रहिषुर्भटाः ॥३४॥

भटोद्भटततेः शक्ति सम्प्रेक्ष्य परमोत्कटाम् ।
अंग्रेजा विस्मयं जग्मुः प्रशशंसुश्च तान् भृशम् ॥३५॥

क्रान्त्यां वीरवरः श्रेष्ठः पेशवासीद् दृढोऽतुलः ।
गौराङ्गान् हि पराजेतुं शस्त्रास्त्रैश्च भटानपि ॥३६॥

सञ्चिकाय महीपेषु सम्पर्कञ्च महागुरुम् ।
क्रान्तिकर्माण्यनुष्ठातुं बहुस्थानान्यसावगात् ॥३७॥

मिलति स्म स नीतिज्ञः सम्राजि मुगलेऽपि च ।
स्वेष्टं साधयितुं भावं स्वातन्त्र्यस्य जने जने ॥३८॥

सः सञ्चारयितुं भावं यत्नं चक्रे धिया हि सः ।
पेशवाख्यो महावीरः प्रययास पुनः पुनः ॥३९॥

परं यत्नो दृढीयान् सः साफल्यं न ययौ बत ।
दैवि दैवे विपर्यस्ते साध्ये सिद्धिर्न लभ्यते ॥४०॥

सेनानीस्तांत्याटोपे देशभक्तो महाभटः ।
परास्तां विदधौ सेनामांग्लानामसकृद् बली ॥४१॥

आंग्लसैन्यं ततः शीघ्रं छद्मनीत्या पराजितम् ।
चक्रे तं सत्वरं शूरं बभ्राम स इतस्ततः ॥४२॥

अन्ततोऽसौ गृहीतोऽभूद् विप्रलेभे सखैव तम् ।
विश्वासघ्नो महीपालो मानसिंहो महाबलम् ॥४३॥

स्वातन्त्र्याय हि भारतीयजनता युद्धं यदायूयुजद्
आंग्लैस्तस्य कठोरकूटविधिना नाशः कृतो दुर्जनैः ।
क्षुद्रैः क्षुद्रतरैरुपायविविधैः कष्टप्रदैः साधनै
स्ते क्षिप्रं निजशासनेन भरतक्षोणीं न्यबध्नन् दृढम् ॥४४॥

वृद्धास्तैर्हतबुद्धिभिः प्रतिपदं नार्यो हता राक्षसैः
सर्वत्रैव नितान्तनिर्दयतया बाला युवानोऽपि च।
हाहाकारयुता दिशश्च निखिलास्तैः कारिताः पापिभिः
सञ्जाताश्च पुरोऽतिशोकनिविडा ग्रामास्तथा तादृशाः ॥४५॥

एतावन्ति विधाय निन्द्यपरुषक्रूराणि कर्माण्यपि
नांग्लास्ते तुतुषुस्तदा हतधियो हिन्दूनहिन्दूनपि।
गोमांसं वदने निधाय विदधुर्वाराहमांसं तथा
भ्रष्टान् जीवनमेव काष्ठफलके चारोप्य चक्रुर्हतम् ॥४६॥

अत्याचारमहर्निशं ह्यतिशयं तेऽन्यायकर्माण्यपि
कृत्वा भारतमानवेषु परुषाण्यांग्लाः महापामराः।
राज्यं स्वं तरसा मलीमसहृदश्चक्रुश्च संस्थापित
संजह्रुश्च तदैव ते छलपरा इष्टेण्डिया कम्पनीम् ॥४७॥

ग्रामाणां सितविग्रहा हि दहनं चक्रू रुषा भीषणाः
अन्नं नाध्यगमन् जनाश्च शतशः प्राणानतस्तत्यजुः।
दारिद्र्यं व्यकिरन् कठोरममितं ग्रामेषु सर्वेष्वपि
जातं नागरजीवनञ्च नितरां शोच्यञ्च चिन्तास्पदम् ॥४८॥

वर्णयितुं न शक्यास्ति भारतस्य हि सा दशा।
स्मृत्वापि मानसं याति गाढखेदं भृशोत्कटम् ॥४९॥

भारतस्य स्थितिं प्रेक्ष्य चिन्तनीयां सुरा भृशम्।
पार्वति प्रययुः क्षिप्रं ब्रह्माणं निकषा ततः ॥५०॥

ऊचुस्ते मलिना भूत्वा वेधसं प्रणताः प्रभो।
साम्प्रतं भारतावस्थां पारतन्त्र्याद् गता शुचम् ॥५१॥

आंग्लाः अनुदिनं देव भारतं व्यथयन्त्यलम्।
पीडयन्त्यदयाः क्रूरास्तथान्यायं चरन्ति ते ॥५२॥

जनाः सहस्रशस्तत्र कष्टेन निजजीवनम्।
नयन्ति सहमानास्ते शोचनीयां दरिद्रताम् ॥५३॥

अधिकारा हृताः सर्वे मानवीया दृढैश्च तैः ।
विषीदन्ति जनाः सर्वे आधिव्याधिसमन्विताः ॥५४॥

दासा इव सदा स्वीयं जीवनं गमयन्ति ते ।
तेषां स्वकीयदेशोऽस्ति परकीयोऽद्य हे प्रभो ॥५५॥

श्रुत्वा वाचां सुराणां तां ब्रह्मोवाच तदा वचः ।
वेद्मि देवाः स्थितिं सर्वां चिन्तां यान्तु न साम्प्रतम् ॥५६॥

भारतेऽवतरिष्यन्ति श्रेष्ठात्मानः शुभंयवः ।
सद् यत्नेन भवेत् तेषां स्वतन्त्रं प्रियभारतम् ॥५७॥

ख्यातास्तत्र भविष्यन्ति लोकमान्या विभूतयः ।
श्रीगङ्गाधरगान्ध्याद्या जवाहरश्च वल्लभः ॥५८॥

राजेन्द्रोऽथ सुभाषश्च शास्त्रीलालबहादुरः ।
अन्ये च बहवो भक्ता भारतस्य मनीषिणः ॥५९॥

आपदो नाशमेष्यन्ति जनाः स्युः सुखसेविताः ।
सर्वतन्त्रस्वतन्त्रं सद् भारतं भुवि भास्यति ॥६०॥

निशम्यैतद् वचो देवाः ब्रह्मणो मुदिता ययुः ।
स्वकीयं ते शुभं धाम हितस्थहृदयाः द्रुतम् ॥६१॥

यात्वा स्वलोकञ्च दिवौकसस्ते
शंखान् स्वकीयान् भृशमोदभाजः ।
दध्मुः सहर्षं विबुधा समस्ताः
आशाः प्रसेदुश्च ववुः समीराः ॥६२॥

॥ इति नवभारतपुराणे भारतपराधीनतास्थितिवर्णनं नाम प्रथमोऽध्यायः ॥

अथ द्वितीयोऽध्यायः

भारतवन्दना

भारतपारतन्त्र्यात् ते दुःखिता अमरा अगुः ।
प्रजापतिं द्रुतं सर्वे देवीति भणितं मया ॥१॥
वृत्तं सुखकरं वक्तुं वृहस्पतिं ततोऽगमन् ।
नत्वा तं तेऽखिलोदन्तं सादरं गुरवेऽब्रुवन् ॥२॥
गिरिजे निर्जराः सर्वे गुरुं नत्वा न्यवेदयन् ।
भारतस्य वयं श्रोतुमिच्छामो महनीयताम् ॥३॥
वचो दिवौकसां श्रुत्वा गुरुः प्राप महत् सुखम् ।
गातुं तस्य महत्तां सः प्रचक्रमे वृहस्पतिः ॥४॥
या गङ्गासिन्धुरेवाप्रभृतिसुसरितः पुण्यनीरा बिभर्ति
या रम्या नालिकेरैः प्रियफलकदलीनागरङ्गैः रसालैः ।
या भव्या नागवल्लीकुरवककुटजैर्नीपजात्यादिपुष्पैः
सा पूज्या भारताम्वा भवतु विजयिनी श्रेयसे सर्वपुंसाम् ॥५॥
मन्यन्ते यां पुमांसो निजहृदि वरदां देवतां पुण्यरूपां
वन्दन्ते मित्रराष्ट्राण्यमितनवनवप्राभृतैर्यामजस्रम् ।
प्रेक्षन्ते यां सपत्ना विदलितमनसो द्वेषवन्तो भवन्तो
भूयात् सा मानवानां भरतवसुमती सर्वदा त्राणकर्त्री ॥६॥
यस्याः श्रीचरणं जलेन जलधिः सम्मार्ष्टि नक्तन्दिवं
यां द्रव्यैर्बहुभिः प्रकृष्टविपुलैर्गौरीगुरुः सेवते ।
गन्धेनार्चति यां मुदैव मलयक्षोणीधरः प्रत्यहं
सा भूः भारतसंज्ञिका विजयतां सर्वोदयाकाङ्क्षिणी ॥७॥

विद्यास्रोतोभृगुमनुनिभान् या प्रसूते स्म सिद्धान्
या चासूत प्रथितयशसो वन्द्यकाव्यादिकर्तॄन् ।
सीतागार्गीप्रभृतिललनाः यासविष्टात्र लोके
भूयः सूतां भरतवसुधा सच्चरित्रान् जनान् सा ॥८॥

पवित्रं या लोकं सपदि कुरुते वेदवचसा
अघं हिंसाजातं झटिति हरते या जिनगिरा ।
जगच्चित्तं सम्यग् रमयति च या गान्धिचरितै
स्ततो भूयाद् धर्मो निखिलभुवने चोन्नततरः ॥९॥

या मातेयं भरतवसुधा रामराज्यं बुभोज
या मातेयं भरतधरणी धर्मराज्यं ददर्श ।
या मातेयं मुनिवसुमती सत्यनीत्यामरंस्त
सेयं भूयाद् धवलचरिता भारताख्या धरित्री ॥१०॥

संसारे निखिले प्रकाशमददात् ज्ञानात्मकं पावनं
यः कल्याणकरः कृते ह्यसुमतां भूवासिनां सन्ततम् ।
विश्वस्येच्छति यः सुखानि सततं स्वान्तेन सर्वाण्यपि
वेदोऽसौ प्रकटीबभूव भरतक्षोण्याः ऋषीणां मतौ ॥११॥

अध्यात्मोत्तमभाप्रभातसुषमां चेतःप्रमोदप्रदां
मत्यां रम्यतमां मनोज्ञमधुरां पुंसां धरित्रीजुषाम् ।
या वर्षन्त्युपकारिकोपनिषदो रात्रिन्दिवं भारते
द्योतन्ते प्रथिता नितान्तरुचिरा अत्रैव ता उत्तमाः ॥१२॥

कर्मज्ञानमहत्त्वबोधनपरां भक्तिस्वरूपोज्ज्वलां
सम्यक् स्पष्टतया निरूपयति यां श्रीकृष्णचन्द्रो हरिः ।
पार्थं बोधयितुं जगाद भरतक्षोण्यामिहैव स्वयं
शास्त्राणां दधतीं हि सारमधुरं गीतां तु तां पावनीम् ॥१३॥

व्यासर्षेः कृतिदिव्यचारुसरसा वेदान्तविद्यापरा
अद्वैतार्थविकासने क्वचिदसौ द्वैतार्थविश्लेषणे ।

द्वैताद्वैतविभावने क्वचिदहो संदृश्यते तत्परा
साप्यत्रैव हि भारते समुदिता या ब्रह्मसूत्राभिधा ॥१४॥

शिक्षाव्याकरणादिशास्त्रनिवहं सांख्यञ्च योगप्रियं
मीमांसाद्वयमन्य गौतमकृतं न्यायञ्च वैशेषिकम् ।
चक्रे भारतमेव साधुहृदयं दुःखस्य विध्वंसने
गाढौत्सुक्यधरं क्षितौ विजयते देवर्षिवृन्दम् भृशम् ॥१५॥

भाषा संस्कृतसंज्ञिका सुविदिता यस्यास्ति विश्वाजिरे
सर्वत्रैव हि भारतस्य ललिता लोकाभिरामप्रिया ।
यस्यां धर्मपरा च मुक्तिविषया कामार्थसम्बन्धिनी
विद्या भाति नितान्तसुन्दरतया सा भावसंशोभिता ॥१६॥

व्यासोऽष्टादशसंख्यकान्यरचयत् सम्यक् पुराणान्यपि
चक्रेऽत्यन्तमनोरमं च रुचिरं भव्यं महाभारतम् ।
श्रीमद्भागवतं व्यधात् सुमधुरं श्रीकृष्णलीलामृतं
देशे यत्र च भारते विजयते सः सर्वविज्ञोत्तमः ॥१७॥

सञ्जातौ मनुयाज्ञवल्क्यविदितौ धर्मोपदेशोत्तमौ
हारीतादिमहर्षयश्च बहवश्चक्रुः स्मृतीर्भूयसीः ।
देशे तं महनीयगौरवमयं यत्रादृते भारते
भक्त्याश्लिष्टहृदा वयं सविनयं वन्दामहे सादरम् ॥१८॥

आपस्तम्बकृतां कृतिं शतपथं जानन्ति के नो बुधाः
भूयस्योऽथ च गृह्यसूत्ररचनाः भान्ति प्रियाः यत्र ताः ।
ता सर्वाः ऋषिवाङ्मये सुविदिते तत्रैव चान्या अपि
देशोऽसौ परमादृतो मतिमतां विद्याभृतां स्तूयते ॥१९॥

शास्त्रं सुन्दरमर्थशास्त्रमकरोच्चाणक्यविज्ञर्षभः
शास्त्रं कामपरं व्यधाद् ऋषिवरो वात्स्यायनो बन्धुरम् ।
साहित्यं विपुलं प्रकर्षरुचिरं संशोभते च स्फुरद्
यत्रेत्थं भरतावनौ विजयते तस्यै नमः सादरम् ॥२०॥

काव्यानां मधुरा तती रसमयी विभ्राजते भारते
शब्दार्थद्युतिदिव्यबन्धुरतमा हृद्यैर्गुणैः सेविता ।
नानानूतनभावराजिलसितालङ्कारसंभूषिता
यस्मिंस्तं सुखशान्तिवृष्टिनिपुणं देशं नमामो वयम् ॥२१॥

साहित्ये सरसेऽति यस्य रमते यज्ञप्रिया संस्कृति
र्दानश्रीप्रचुरा तपःसुललिता सः कालिदासः कविः ।
आचारप्रथिता तपोविपिनगा ज्ञानप्रकर्षैव हि
श्रीशाकुन्तल-मेघदूत-रघुकृच्चात्राग्रहीत् स्वं जनुः ॥२२॥

तं वेद शूद्रककविं नृपवंशजातं
सर्वा मही बुधवती स्वजनुर्ह्यलब्ध ।
यो नाम मृच्छकटिकं हि कृतिं चकार
विज्ञोऽत्र भारतपवित्रमहर्षिदेशे ॥२३॥

श्रीमान् कविः प्रियसुधीः गुणवान् गुणाढ्य-
श्चक्रे कथां सरसपेशलभावभव्याम् ।
यश्चारुबुद्धिललितः स जगत्प्रसिद्धः
प्रादुर्बभूव भरतस्य भुवीह विद्वान् ॥२४॥

दण्डी कविर्ललितगद्यनिबन्धने यो
जातो महान् सुकुशलः कविवृन्दमध्ये ।
चक्रे कृती दशकुमारचरित्रगद्य-
काव्यं बभूव भरतावनिमातुरङ्के ॥२५॥

यत्कीर्तिर्धवलीकरोति कृतिनां विश्वं समग्रं भृशं
प्रज्ञां यस्य गुणावलिञ्च सुधियो वाञ्छन्ति गद्यं गतम् ।
काव्यं यस्य मनोरमं जगदिदं प्रीणाति सर्वं मुदा
बाणोऽसावपि भारतेऽजनि कविः कादम्बरीसंज्ञकम् ॥२६॥

वेदादिशास्त्रनिपुणः प्रथितः कवीन्द्रो
ज्ञानाम्बुधिं र्भरतभूमिमलञ्चकार ।

यो भाव्रभव्यसरसं स महान् बुधेन्द्रो
माघश्चकार शिशुपालवधं हि काव्यम् ॥२७॥

वाग्देवतापि भवभूतिमहाकविं यं
वश्येव काश्यपमनुव्रजति स्म विज्ञम् ।
वाक्यप्रमाणपदरूपकपारदृश्वा
सिद्धो रसे हि करुणेऽजनि भारतेऽसौ ॥२८॥

गाम्भीर्य गौरवनयाञ्चितचारुकाव्ये
अर्था हि यस्य विलसन्त्यतिवल्गुनव्याः ।
विद्वन्मनःपरममोदकराः किराते-
ऽसौ भारविः समभवत् प्रियभारतेऽस्मिन् ॥२९॥

सौन्दर्यं परिवीक्षितुं ह्यतितरां श्लेषस्य येषां मनः
द्रष्टुं काङ्क्षति सद्विभां यदि भृशं चित्रस्य काव्यस्य च ।
संख्यातीतपदार्थदर्शनरुचिं पुष्णन्ति विज्ञाश्च ये
तेऽत्रोत्पन्नकवेः पठन्तु कवितां रत्नाकरस्य क्षितौ ॥३०॥

पाण्डित्यगेयमपि यत्र कवौ चकास्ति
वैदग्ध्यबन्धुरविभा च मनोऽभिरामा ।
श्रीनैषधीयचरित व्यदधात् कविर्यः
श्रीहर्ष एव स बभौ प्रियभारतेऽत्र ॥३१॥

या विद्वद्भवमण्डनं तिरुमलाम्बा ज्ञानदीप्त्युज्ज्वला
सत्स्तुत्यं वरदाम्बिकापरिणयं माधुर्यसिन्धुं व्यधात् ।
सात्रैवाजनि भारते मतिमती विद्याश्रिता शोभिता
काव्ये कापि कला नवीनललिता तस्याश्चकास्ति प्रिया ॥३२॥

एषा भारतमेदिनी तु बहुभिः संशोभते सर्वथा
विद्याबन्धुरकल्पनाकलितधीविद्योत्यमानैः सदा ।
शास्त्राम्भोधिनिमग्नकोविदवरैर्नानागुणालङ्कृतैः
तस्मात् सा मनुते महासुकृतिनीमात्मानमस्मिन् भवे ॥३३॥

माता भारतभूः समस्तभुवनेष्वास्तेऽतिधन्या ध्रुवं
यस्यां मानसनिर्मला ऋषिजना ज्योतिःसमा विद्यया ।
शुभ्राः श्रेष्ठधियो वसिष्ठधरुणप्रस्कण्वकण्वादिकाः
अन्ये चापि सहस्रशोऽत्र जनताश्रेयस्करा जज्ञिरे ॥३४॥

राजानो जनकादिचित्तविमला लोकप्रियाः योगिनो
ज्ञानश्रीरुचिराः स्वधर्ममतयः शौर्यप्रसिद्धाः प्रियाः ।
विप्रांघ्र्यम्बुजसेवनस्थितकराः वेदादिविद्याविदः
सच्चारित्र्यजुषो यशःसुललिताः जाता धरित्र्यामिह ॥३५॥

ततो गुरुः सुरानूचे पार्वति स्ववचः प्रियम् ।
सार्धं तेन समं तेऽपि भक्त्या स्तुवन्तु भारतम् ॥३६॥

श्रुत्वाज्ञाममराः प्रीत्या गुरोः प्रणतमौलयः ।
आरेभिरे मुदा गातुं भारतस्तवनं प्रियम् ॥३७॥

सुजनमण्डलमण्डनभूषितं
निखिल विश्वहितस्थितमानसम् ।
धवलमञ्जुलमङ्गलमार्गगं
जयति भारतराष्ट्रहरिश्रितम् ॥३८॥

हिमनगेन्द्रसितप्रभपेशलं
प्रचुरकाननकान्तिसमुच्छ्रितम् ।
विविधदृश्यमनोरमेदुरं
जयति भारतराष्ट्रसमुज्ज्वलम् ॥३९॥

नदनदीनिवहाम्बुमनोरमं
हरितसस्यसमुल्लसितस्थलम् ।
सभगभव्यसरोवरशोभितं
जयति भारतराष्ट्रशुचिप्रियम् ॥४०॥

सुरनदीसितनीरसुधासितं
रविसुतायमनाविभयाऽसितम् ।
अचलविन्ध्यहिमाद्रिविभासितं
जयति भारतराष्ट्रमनोहरम् ॥४१॥

विविधपादपपङ्क्तिसुशोभितं
मधुरतामयभूरिफलोद्भवम् ।
किसलयैर्मृदुलैर्भृशकोमलं
जयति भारतराष्ट्रशुभोदयम् ॥४२॥

सकलमानसलोचननासिका—
प्रचुरतोषणलग्नमनारतम् ।
बहुलताकुसुमैः सुरभि प्रियैः
जयति भारतराष्ट्रसदाशयम् ॥४३॥

विमलनिर्झरशीतसितोदकं
नयनरञ्जनकृच्छविपूजितम् ।
परमसान्द्रसुचारु परिस्फुरज-
जयतिभारतराष्ट्रमनःप्रियम् ॥४४॥

पिकशुकादिपतत्रिनिनादितं
गजतुरङ्गमगोप्रभृतिप्रियम् ।
विविधजन्तुसमूहसमाकुलं
जयति भारतराष्ट्रसुरक्षकम् ॥४५॥

परमभीतिकरैर्वृकशूकरै
र्भृशमहाबलकेशरिभिर्वनम् ।
सततमेव हि यस्य समाकुलं
जयति मङ्गलराष्ट्रसमुत्कटम् ॥४६॥

मकरभीषणमत्स्यविशङ्कटै-
र्विविधनीरचरैरनिशं युतम् ।
बहुविशालपयोधिसमन्वितं
जयति भारतराष्ट्रसमुन्नतम् ॥४७॥

पृथुमरुप्रभयाऽमितयान्वितं
गततृणाम्बुभुवा सुविभावितम् ।
बहुभिरुष्ट्रगणैः परिवर्धितं
जयति भारतराष्ट्रमहाद्भुतम् ॥४८॥

ऋतुवसन्तनिदाघविभोद्गतं
सुखदवृष्टिशरद्रमया स्तुतम् ।
हिमजुषा शिशिरेण च वन्दितं
जयति भारतराष्ट्रसोर्जितम् ॥४९॥

कृषिवनस्पति भेषजसंस्फुरत्
प्रचुरसस्यधरां सततं धरत् ।
विविधकन्दसुशुष्कफलैर्महत्
जयति भारतराष्ट्रमहोऽर्चितम् ॥५०॥

परमसुन्दरमानसतोषदै
स्त्वरितवेगविचित्रकलेवरैः ।
विविधवाहनयाननवैर्वृतं
जयति भारतराष्ट्रसमुत्थितम् ॥५१॥

बहुलकारबसाख्यसमुच्छलद्
विविधमोटरयानसमुल्लसत् ।
बहुविभिन्नवपुर्धरवस्तुमज्
जयति भारतराष्ट्रमिदं नवम् ॥५२॥

परमसुन्दरविग्रहसंश्रितै
र्द्रुतगतिश्रितरेलपदाङ्कितैः ।
सततलौहपथप्रिमवाहनैः
जयति भारतराष्ट्रमिदं ततम् ॥५३॥

गगनयानविमानमनःसम—
त्वरितगामिनितान्तजवस्थितैः ।
लघुविशालविभिन्ननवोच्छ्रितै
र्जयति भारतराष्ट्रमिदं नवम् ॥५४॥

गगनवाग्ध्वनिदूरगतेक्षण—
प्रथितसाधनसुन्दरसत्वभृद् ।
विविधचारुचलोर्जितचञ्चलं
जयति भारतराष्ट्रमिदं ध्रुवम् ॥५५॥

सलिलयानविभिन्नमनोरमैः
सुखदसुन्दरपोतगणैः प्रियैः ।
नवनवाकृतिनौनिकरैरहो
जयति भारतराष्ट्रसुमञ्जुलम् ॥५६॥

सकलरोगविनाशनकौशल—
प्रचुरविस्मयकारिहितस्थितम् ।
श्रमहरौषधसुन्दरमन्दिरं
जयति भारतराष्ट्रजगत्प्रियम् ॥५७॥

भरतभू-जगतीजनताहितं
सततमिच्छति शुद्धहृदा भृशम् ।
भवति कर्म तदीयसुखास्पदं
जयति भारतराष्ट्रशुभाग्रहम् ॥५८॥

सुराः हर्षहृदः सर्वे गुरुणा सह सादरम् ।
अवन्दन्त मुदा राष्ट्रं भारतं भक्तिपूर्वकम् ॥५९॥

प्रणम्य देवताः सर्वाः पावनीं भरतावनिम् ।
अभिवाद्य गुरुं भक्त्या प्रययुः स्वनिकेतनम् ॥६०॥

॥ इति श्रीनवभारतपुराणे भारतवन्दनं नाम द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः

पारतन्त्र्यजनितभारतदुर्दशा

विध्वस्तं समरं कृत्वा स्वातन्त्र्यस्य कुमार्गगाः ।
अनैषुर्भारतं देशमांग्ला भद्रे स्वदासताम् ॥१॥
स्वातन्त्र्यार्चनसंलग्नान् देशभक्तान् बलान्वितान् ।
शूरर्षभान् शठाः जघ्नुर्न्यबध्नंश्च बहून् भटान् ॥२॥
कृत्वा कार्यमिदं निन्द्यमांग्ला हिमनगात्मजे ।
स्वच्छन्दा भारतं कृत्स्नमारेभिरे हि शासितुम् ॥३॥
पारतन्त्र्यगताः सर्वे तेषामग्रे नताननाः ।
दीना इव स्थिताः नित्यं मौलिस्थाञ्जलयो नृपाः ॥४॥
आदेशं हि विना तेषां कर्तुं कार्यं क्षमा नृपाः ।
लघुलघुतरं हन्त नाजायन्त कदाचन ॥५॥
प्रतिराज्यं महीभर्तुः सिताङ्गैर्नियतीकृतः ।
आंग्ल एवाधिकारी ना कार्यस्यानुमतेः कृते ॥६॥
शोच्यां तां दासतां वीक्ष्य भारतस्यातिगर्हिताम् ।
साधवो लेभिरे चिन्तां प्रोवाचेति शिवः शिवाम् ॥७॥
चकार कोऽपि चेद्राजा ह्याज्ञायां श्लथतां तदा ।
तद्राज्याद् भ्रंशयाञ्चक्रुर्नृशंसा आंग्लशासकाः ॥८॥
राज्यञ्च तस्य संलीनं भारते ब्रिटिशे द्रुतम् ।
विनावसरदानेन कपटच्छलवर्त्मगाः ॥९॥
राज्येषु भूभुजां सर्वाः प्रजाः निन्युः स्वजीवनम् ।
दासानुदासवत् दीनास्ता आसन् सर्वथा मृताः ॥१०॥
आंग्लानां शासनं सर्वाः अदुनोन्नितरां प्रजाः ।
कुन्तेन पारतन्त्र्येण भवत्क्रूरं दिवानिशम् ॥११॥

स्वत्वं मानवतापेक्षि शासनं चाहरद् बलात् ।
जनानां दमने लग्नं दुष्टाचारपरायणम् ॥१२॥
व्यवस्थासीन्न शिक्षाया न्यायोपेता जनोचिता ।
गतं प्रतिदिनं वृद्धिं निरक्षरत्वमत्र च ॥१३॥
विद्यालयविहीनत्वाद् ग्रामाणां भरतावनेः ।
ग्रामाधिवासिनो जाताः सर्व एव निरक्षराः ॥१४॥
मूर्खतायाः विकीर्णत्वात् कलहास्तेषु चास्फुटन् ।
मिथो विवदमानास्ते स्वेष्वेव दुर्हृदोऽभवन् ॥१५॥
संवृद्धं प्रत्यहं जातं दारिद्र्यं हि भयावहम् ।
तत्प्राबल्यं भृशं तत्र दुनोति स्म च तन्नरान् ॥१६॥
बालाश्च महिलास्तत्र स्थविरास्तरुणा अपि ।
प्रायेणाधिकसंख्यायां सकृदापुः स्वभोजनम् ॥१७॥
अन्नाभावात् क्षुधायुक्ता दुर्बला अभवन् जनाः ।
भूत्वा निर्धनता क्रूरा ग्रामानत्तुं प्रचक्रमे ॥१८॥
दारिद्र्यं वर्तते यत्र विपदो हि सहस्रशः ।
पतन्ति सत्वरं तत्र निर्दया बलदारुणाः ॥१९॥
आधयो व्याधयः सर्वे कृत्वा संगठनं दृढम् ।
आचरन्ति दरिद्रेषु राक्षस्य इव दारुणाः ॥२०॥
रुग्णतया जना ग्रस्ता प्राप्यन्ते स्म यतस्ततः ।
चिकित्सासदनान्यासन् अतिन्यूनानि भारते ॥२१॥
अव्यवस्था ह्यभावो वा चिकित्साया अकल्पयत् ।
अहिताय भृशं पुंसां ग्रामवासजुषां तदा ॥२२॥
रोगा दरिद्रता चापि मृत्युं निन्युर्जनान् द्रुतम् ।
मातृरोगवशाच्चापि बाला मृत्युमवाप्नुवन् ॥२३॥
प्रबन्धोऽभून्न कुल्यानां यन्त्रान्धूनाञ्च भारते ।
जलाभावोऽधिको जातः सर्वत्रैव तदा महान् ॥२४॥

अतः कृषेर्दशा नासीद् वस्तुतस्तोषकारिणी ।
दुर्भिक्षस्य निपातोऽपि तेषु दिनेष्वभूद् भृशम् ।।२५।।

कृषिस्थितेरयुक्तत्वाददूयन्त कृषीवलाः ।
चिन्तिताश्च कृशाः सर्वे राजस्वाद् दुःखदात् पुनः ।।२६।।

जीर्णशीर्णाः पटा दृष्टाः सर्वदैव कृषीबलाः ।
कौपीनेनैव भूयांसोऽगमयन् समयाखिलम् ।।२७।।

धूम्रपानेन सन्तोषं चक्रुस्ते सकला जनाः ।
न पयो न घृतं प्रापुः कर्षकास्ते कदाचन ।।२८।।

खाद्याभावाद् व्यथां जग्मुस्तत्पशवोऽपि सर्वदा ।
कर्षकाणां स्थितिर्नूनमसह्याकष्टदाभवत् ।।२९।।

उटजेषु सदा वासं चक्रुर्वो मृत्तिकागृहे ।
गीतदोलादिकं प्रायः प्रीणयति स्म तन्मनः ।।३०।।

ग्रामस्थितिर्बभूवातिशोच्या चिन्त्या च भारते ।
आंग्लानां शासनं क्रूरं ग्रामनाशं व्यधाद् भृशम् ।।३१।।

तेषां सर्वविधं पातं चकारांगलशासनम् ।
नैतिकं बौद्धिकं चापि दैहिकञ्च मनःपरम् ।।३२।।

पार्वति पारतन्त्र्यस्य परिणामो भयङ्करः ।
ग्रामाणां पतने हेतुस्तदेवाभूत् शिरःस्थितम् ।।३३।।

भ्रष्टत्वात् पथां तत्र गमनं दुर्गमं सदा ।
वर्षायां तु भृशं तत्र, काठिन्यं ववृधे महत् ।।३४।।

ग्रामाणां कथितावस्था समासेन मया शिवे ।
नगराणां त्वया ज्ञेया दशेदानीं हिमाद्रिजे ।।३५।।

नगरेऽर्थवतां पुत्रा एवाध्येतुं क्षमा उमे ।
निर्धनानां सुताः जाताः असमर्था हि सर्वथा ।।३६।।

शिक्षा तदा महर्घाभूदपेक्षितं धनं महत् ।
धनाभावाज्जना हन्त शिक्षां लब्धुं न शेकिरे ।।३७।।

प्रथमं नितरां स्वल्पाः विद्यालयास्तदाभवन् ।
मण्डले सोऽभवत् प्राप्त एक एव हि नाधिकः ॥३८॥
पाठनं ह्यांग्लभाषाया विद्यालयेष्वजायत ।
देशभाषा अवज्ञाता आंग्लैः कृत्स्नतया तदा ॥३९॥
अशिक्षिता मताः सर्वे देशभाषाविदो जनाः ।
भृत्यतां किङ्कराणां ते शेकुः प्राप्तुं धनं विना ॥४०॥
त एव शिक्षितास्तत्र श्रेष्ठाश्च पुरुषा मताः ।
आंग्लभाषां पठन्ति स्म भवन्ति स्म च तद्विदः ॥४१॥
आंग्लभाषापरप्रेम शिक्षितेषु दृढं गतम् ।
व्यवाहार्षुर्मुदा चापि, ते तां हि सततं भृशम् ॥४२॥
तत्प्रयोगेऽभिमानं च सदा तेऽन्वभवन् जनाः ।
आत्मानं सुधियं मत्वा प्रामोदन्त पुनः पुनः ॥४३॥
अत्रपन्त स्वदेशस्य संस्कृत्यामपि ते भृशम् ।
वेषे चापि पुमांसो हि सभ्यतायां विपश्चिताम् ॥४४॥
प्राणैषुः सुधियो ग्रन्थान् वैदेशिक्यां मुदान्विताः ।
कदापि देशभाषायां नाररचन् कृतिं च ते ॥४५॥
तनयं तनयाञ्चैव ह्यांग्लभाषामपाठयन् ।
समर्थाः कुलवन्तश्च धनवन्तश्च मानिनः ॥४६॥
अशनं किञ्च पानं च भारतीयं जहुर्जनाः ।
अजुगुप्सन्त ते तत्र संसर्गादांग्लदेशिनाम् ॥४७॥
नगरेषु जनाः प्राप्ताः आंग्लभाषाविदुः सदा ।
ब्रुवाणा आंग्लभाषां हि मन्यमानाः स्वगौरवम् ॥४८॥
भृत्यतायां प्रकर्षं स्वं मेनिरे पुरवासिनः ।
भृत्यतैव तदा जाता गौरवस्यापि कारणम् ॥४९॥
अहर्निशं धनं देशादनन्तं सितविग्रहाः ।
आकृष्य भारतादस्मात् निन्युः स्वं विषयं प्रति ॥५०॥

सर्वविभवसम्पन्नमांग्लैः कुटिलनीतिभिः ।
सुवर्णभारतं क्षिप्रं कृतं मृन्मयतान्वितम् ॥५१॥

आचारेषु विचारेषु प्रायेण पुरपूरुषाः ।
प्रतीच्याः एव संवृत्ताः भारते हन्त सर्वथा ॥५२॥

सर्वा विपणयः सद्यः वैदेशिकपटादिभिः ।
आंग्लैः कृताः मुदा पूर्णाः संश्रित्य कुटिलं छलम् ॥५३॥

भारतीयाश्च हा जाता भारतवस्तुदुर्हृदः ।
प्रयुयुजुः सदा वस्तु 'इङ्गलेण्ड'-समुद्भवम् ॥५४॥

भारतस्य दशां वीक्ष्य जगतः सज्जना भृशम् ।
तादृशात् पतनात् तस्य तेऽदूयन्त नगात्मजे ॥५५॥

न यत्र देशे स्वधरानुरागो
जनेषु नो देशहिताभिलाषः ।
न देशहेतोर्बलिदानभावो
मुधा जनानां भुवि जन्म तेषाम् ॥५६॥

स्वदेशरक्षा स्वजनानुरागः
परोपकारश्रितपुण्यवृत्तिः ।
परोदये तिष्ठति यत्र चिन्ता
तेषां जनानां जनुरेव धन्यम् ॥५७॥

विनश्वरे स्तोऽखिलधामभूमी
विनश्वरोऽयं मनुजस्य देहः ।
विनश्वराः सन्ति च सम्पदोऽपि
विनश्वरं भौतिकसर्वमेव ॥५८॥

अतः सदा देशहिताय देहम्
असूंश्च बुद्धिं हृदयं धनञ्च ।
समर्पयेद् विज्ञजनः सहर्षं
स्वदेशभक्तिर्हि सतां मतास्ति ॥५९॥

लक्ष्यं भवेद् देशहितं सदैव
भक्तिः स्वदेशस्य सदैव कार्या ।
स्याज्जीवनं देशविकासहेतोः
स्याज्जीवनं देशशिवाय नित्यम् ॥६०॥

देशस्य हेतोः सुखसद्मजाया—
पुत्रावनीनामपि चेत् कदाचित् ।
त्यागोऽस्त्यभीष्टः सुजनैर्विधेयो
विना विलम्बं च विनैव दुःखम् ॥६१॥

एतद्विधा राष्ट्रपरानवद्या
प्रेमस्थिता पावनभावनाश्रीः ।
सत्सूदियात् केषुचन प्रकृष्टा
श्रेयोमयी मानसपावनेषु ॥६२॥

कृता प्रतिज्ञा निजदेशकष्ट-
मुच्छेत्तुमाशूत्तमभव्यपुंभिः ।
हितोन्मुखप्रेरणयागवत्से
संश्रित्य सर्वेश्वरपादपद्मम् ॥६३॥

उमे ततो धातृकृपागरिम्णा
जनाः कियन्तः शुभधीमनोज्ञाः ।
तेजोऽभिवंद्या अतिशुद्धचित्ताः
सन्नद्धताश्रीरुचिरा बभवुः ॥६४॥

॥ इति नवभारतपुराणे पारतन्त्र्यजनितभारतदुर्दशावर्णनं नाम तृतीयोऽध्यायः ॥

अथ चतुर्थोऽध्यायः

स्वतन्त्रतायुद्धं स्वतन्त्रताधिगमनञ्च

उच्छेत्तुं परतन्त्रत्वमजागो योच्चभावना ।
तस्या मूले व्यराजन्त बीजानि राष्ट्रियाणि वै ॥१॥
संस्कारान् विमलोदग्रान् सन्मङ्गलमञ्जुलान् ।
राष्ट्रानुरागिणो वीरा अवपन् जनमानसे ॥२॥
स्वातन्त्र्योद्योगवेलातः प्राग् भारतवसुन्धरा ।
दिव्यं तेजो महोत्कृष्टं नाभूद् द्योतयितुं क्षमा ॥३॥
जेतुं यस्य यशो न भूमिभुवने देशो न कोऽपि क्षमो
नोत्कर्षं न च गौरवं शुचितरं नो संस्कृतिं पावनीम् ।
नो शक्तिं हि महीयसीमनुपमं ज्ञानं न तेजो महत्
नन्तुं तत् प्रियभारतं तदजिरे सद्दीप्तयोऽवातरन् ॥४॥
जातो महात्मकुलभूषणरामकृष्णः
कालीपदाम्बुजपूजननिष्ठचित्तः ।
मेने ह्यसौ तनुभृतां हरणं व्यथायाः
धर्मं परं मृदुलमानसशुद्धमेधः ॥५॥
जज्ञे कुत्र धरातले बुधविवेकानन्दधीमानिव
धर्मं संस्कृतिसभ्यते च विशदं व्याख्याय विद्वत्तया ।
देशस्यास्य हि भारतस्य सुमतिर्देशानुरागी यतिः
सः श्रेयोऽमृतवर्षिणीं व्यतनुत क्षोण्यां समज्ञामिह ॥६॥
देशे दयानन्दमहर्षिरत्र
वेदेष्वद्विद्वानभवत् स्वदेशम् ।
सः प्रेक्षितुं कामयते स्म धीमान्
स्वातन्त्र्यलक्ष्मीकरुणाललामम् ॥७॥

रामम्मोहनहृदुज्ज्वलराजा
भारतीयजनताहितलग्नः ।
वर्तमानयुगमार्जनदक्षः
काङ्क्षति स्म भरतावनिमुच्चाम् ॥८॥

सौजन्यसुन्दरसमुज्ज्वलसाधुचेताः
धीरो गुणाम्बुधिसुधी विमलस्वभावः ।
देशानुरक्तिरुचिरः प्रतिभापवित्र-
स्तस्याः प्रथां विहितवांस्तरसा विनष्टाम् ॥९॥

उदारवादी भजते स्म सादरं
सुरेन्द्रनाथोऽनुपमैः स्वभाषणैः ।
बभूव नेता भरतावनेर्महान्
स्वभारतं विज्ञगणाग्रणीश्चिरम् ॥१०॥

दादा नौरोजिभाई वुधवरजगतीभूषणं जायते स्म
तस्य प्रज्ञादृताभूदतिशयधवलाऽन्यत्र चापि स्वदेशात् ।
देशं भक्त्या स्वकीयं विमलतरमुदा सः सिषेवे नितान्तं
सेवा स्याद् वन्दनीया भरतभुवि चिरं देशभक्तस्य तस्य ॥११॥

देशस्य सेवामभिनन्दनीयां
सोढ्वाप्यकार्षीत् स विपत्कठोराः ।
प्रादीदृशल्लोकहितस्य मार्गम्
आध्यात्मिकं योग्यरविन्दविद्वान् ॥१२॥

आसीत् स देशस्य महानुरागी
लोकोत्तराणां महसाञ्च राशिः ।
निर्वासनं चापि स देशहेतोः
सेहे सहर्षं धृतिमांस्तपस्वी ॥१३॥

स्वसेवयासौ निजभारताम्बां
कर्तुं प्रसन्नामनिशं ययास ।

लिलेख साहित्यमसौ हिताय
राष्ट्रस्य विश्वस्य च योगिवंद्यः ॥१४॥

सः पूज्यां स्वां भरतवसुधां सेवमानोऽरविन्दो
योगी देशादवयवसितैः शीघ्रमेव प्रधीन्द्रः ।
निष्कास्य द्राक् प्रहित उदितोत्कर्षतारुण्यमेधो
श्रीमद्धन्यः प्रति सुविदितः स्थानपाण्डेचरीञ्च ॥१५॥

योगो प्रज्ञां परमनिशितां पर्यपुष्णात् सुधीन्द्रो
विद्यास्तस्माद् विविधबहुलाः प्राप्य तं वङ्गरत्नम् ।
जाता धन्याः बुधसुकृतिनं यादृशोऽसौ मनीषी
आसीत् तादृग् जगति विदितो लेखकोऽपि प्रकृष्टः ॥१६॥

यो राममेव भुवि राममना ददर्श
सर्वत्र शुद्धहृदयः प्रभुरामतीर्थः ।
कल्याणमस्ति स हि भारतमानवानाम्
इत्युक्तवान् जगति रामविलोकनेन ॥१७॥

विद्वत्क्षोणीतिलकतिलको बालगङ्गाधराख्यो
धीमद्वंद्यो भरतवसुधां सेवते स्मातिभक्त्या ।
सेहे कष्टं कठिनकठिनं देशहेतोर्मनस्वी
कारागारे वसतिमकरोत् कालदीर्घं प्रधीन्द्रः ॥१८॥

गीतां विद्वज्जगति विदितां वेदशास्त्रादिसारं
लोकोत्कृष्टाखिलबुधजनस्वान्तसन्तोषवत्या ।
कर्माख्यानाधिकविशदया व्याख्ययाभूषयत् सः
सर्वश्रेयस्करपथशुभोद्भावयित्र्या महत्या ॥१९॥

श्रीगोखले लोकशुभेच्छुबन्धु-
र्गोपालकृष्णः प्रथितो विपश्चित् ।
संसेव्य राष्ट्रं प्रियभारतं नः
कालेऽपि वक्रे कृतवान् प्रकृष्टम् ॥२०॥

सौभाग्यलक्ष्मीललितप्रकर्षः
सौम्यो ह्यसौ ज्ञाननिधिर्बभूव ।
देशस्य भक्त्या भुवि दीप्यमानो
विद्वज्जगन्मान्ययशोवरेण्यः ॥२१॥

अर्थेषु चोच्चेषु पदेषु तस्य
न जातु चित्तं रमते स्म साधोः ।
माने च नैश्वर्यवति प्रकृष्टो
नो भौतिके वैभववद्विलासे ॥२२॥

भक्त्या स्वदेशस्य बुधो विकासं
शुद्धेन चित्तेन सदैव कुर्वन् ।
देशस्वकीये मनुजान् प्रभूतान्
देशानुरागप्रवणांश्चकार ॥२३॥

भीतो बभूव सुमतिर्न हि सङ्कटेभ्यः
कुर्वन् स्वकीयभरतक्षितिमातृसेवाम् ।
न्याय्यात् पथो नयविदामभिनन्दनीयो
विद्वांश्चचाल न मनागपि देशभक्तः ॥२४॥

जातास्मदीया मुदिता तदानीं
तं प्राप्य चारित्र्यसुचारुताब्धिम् ।
सूनुं स्वकीयं गुणराजिरम्यं
पूज्या जगत्यामिह भारताम्बा ॥२५॥

ज्ञानस्य सर्वत्र सुधीः प्रसारं
शुद्धेन भावेन सदाभ्यवाञ्छत् ।
तस्मान्मनस्वी शुभधीमनोज्ञ
आचार्यतां स्वीकृतवान् सहर्षम् ॥२६॥

त्यागस्तदीयो धिषणा तदीया
तीक्ष्णा स्पृहाहीनमनस्तदीयम् ।

विद्यानवद्या शुचितार्जुता च
आंग्लप्रभूणामहरन्मनोऽपि ॥२७॥

लोकप्रियत्वं नितरामगाधं
संलब्धवान् यादृशमत्र देशे ।
सः शेमुषीशीलसुशोभितोऽभूत्
नो तादृशः कोऽपि कदाचिदन्यः ॥२८॥

रीतिश्च का समुचिता विमलश्च कोऽध्वा
कर्त्तव्यमस्ति ललितं भुवि किं मनोज्ञम् ।
इत्यत्र सः शुचिविचारनिधिर्विवेद
भाति स्म हंस इव सुप्रथितो विवेकी ॥२९॥

भक्तिं दधत् स खलु भारतभूजनन्यां
भावोज्ज्वले विहरति स्म च कर्मयोगी ।
लोकाभिरामचरितं बुधमण्डनं तम्
अश्लाघताखिलजगन्नतमस्तकं सत् ॥३०॥

देशानुरागमधुरान् विरचय्य लेखान्
काव्यानि किञ्च सरसान्यपि मातृभूम्याम् ।
भक्ताः स्वदेशजनताहृदये ह्यजस्रं
भक्ति स्वराष्ट्रपरकां समचीचरंश्च ॥३१॥

गीतानि राष्ट्रपरकाणि च गीतिकाराः
उत्साहवर्धनकराणि च देशभक्तेः ।
सम्पोषकाणि परमोचितहृद्यभाव-
भव्यानि तेषु दिवसेषु जना अगायन् ॥३२॥

सम्पादका बुधवराः निजपत्ररम्यैः
विद्वज्जनाः सरसरूपकवर्त्मना च ।
चित्राणि देशरतिमानससाधुपुंसाम्
आलिख्य राष्ट्रजनताहितमन्वतिष्ठन् ॥३३॥

ता गीतयस्तु बहुलान् भरतावनेर्नॄन्
चक्रुः स्वदेशपरिषेवणदत्तचित्तान् ।
भागीरथी जनमनस्यपि देशभक्ति-
स्तीव्रेण च प्रवहतिस्म रयेण सम्यक् ।।३४।।

भूयःसु सैनिकजनेष्वपि पूर्णतीव्र
ओजोमयो निपतति स्म शुभः प्रभावः ।
तेषां मनः स्वभरतावनिभक्तिभाव-
भव्यं भवद् विलसति स्म च दिद्युते तत् ।।३५।।

स्वदेशसेवार्थमनेकमानवाः
पवित्रभक्त्यञ्चितपूतचेतसा ।
समुन्नतप्रेमभृतो निरन्तरं
विशुद्धभावेन बभूवुरुद्यताः ।।३६।।

धनेन वाचा मनसा च कर्मणा
सिषेविरे मातृभुवं सहस्रशः ।
प्रशंसनीयो भवति स्म तत्र सः
क्रियाकलापो भरतक्षितेः कृते ।।३७।।

विलोकिता भारतभक्तपूरुषाः
अहर्निशं देशनिषेवणे रताः ।
चित्तेन वाचा च सुकर्मणाखिलाः
बभूवुरेते निजदेशसेवकाः ।।३८।।

समर्पयन्तो बहवः स्वजीवनं
निकेतनं केऽपि हुतं ह्यकुर्वन् ।
धनं महत् केऽपि ददुर्मुदान्विताः
स्वदेशहेतोर्बिपदोऽपि सेहिरे ।।३९।।

धरां च गेहं सितकायशासनं
तदा जनानां भजतां हि भारतम् ।

जहार नानाप्रियवस्तु-सम्पदो
बलाद् ग्रहन् भारतसेवकांश्च तत् ॥४०॥

जनांश्च कारागृहवन्दिनो व्यधात्
बहूंश्च कालोदकवासिनो जनान् ।
प्रपीडयामास नृशंसशासनं
भृशं धरित्रीं भरतस्य पावनीम् ॥४१॥

स्वदेशवस्तूनि जनाः सिषेविरे
स्वदेशवासांसि मुदा वसानाः ।
अनेकसंस्थाः जनताहितावहाः
स्थिता बभूवुः प्रियदेशभारते ॥४२॥

जहुश्च शिक्षार्थिन आंग्लशिक्षण—
प्रदप्रतिष्ठानमथाधिकारिणः ।
विधिज्ञवाग्मिप्रथितप्रधीन्द्राः
स्वकीयकार्यस्थलमत्यजन् द्रुतम् ॥४३॥

कृषीवला राजकरं न भारते
ददुश्च कष्टान्यसहन्त तेऽनिशम् ।
स्वनेतृसङ्केतपरा दिवानिशं
जना अहिंसायुधधारिणोऽभवन् ॥४४॥

आन्दोलनं भरतभूः परतन्त्रतां य-
च्छेत्तुं नितान्तपरमप्रबलञ्च राज्यम् ।
सञ्चालितं बहुमुखं बहुवेगयुक्तम्
आंग्लान् व्यधात् तदति पार्वति भीतचित्तम् ॥४५॥

क्रान्तिप्रिये परमसंगठितप्रदेशे
बङ्गाभिधे कुनयवर्त्मगमांग्लवृन्दम् ।
क्रूरं नितान्तदमनं विदधौ समन्ततः
जातञ्च तद् दुरितनिष्ठकठोरचित्तम् ॥४६॥

बहून् मनुष्यान् लगुडैरताडयद्
बहूंश्च कुन्तैरतृणेद् कुशासनम् ।
अहंश्च मर्त्यान् बहुलानघस्थितं
नितान्तमन्दत्वभयङ्करं तत् ॥४७॥

यूनः शिशूंश्च वनिताः मिहिरांश्च बालान्
संरुध्य मार्गमतिदारुणकुत्सितं सत् ।
दुष्टं हि शासनमदो मतिनिन्दनीयं
सर्वत्र भारतपुरेषु भृशं जघान ॥४८॥

अत्यन्तदारुणविनाशकंकर्म कुर्वत्
सर्वत्र भारतजनेषु कठोररोषम् ।
अन्यायभीमविषमप्रखरप्रचण्डम्
आंग्लीयशासनमदोऽतितरां जजृम्भे ॥४९॥

उत्थापयामास यदा प्रचण्डं
क्रोधं प्रजासु प्रबलं हि शास्ता ।
यातस्तदा हा तिलकोऽपि नाकं
जाताः अतः सर्वजनाः सशोकाः ॥५०॥

अफ्रीकास्थितभारतीयजनतासीदांग्लसम्पीडिता
तस्यास्तैरधिकार एव निहतः स्वत्वञ्च सर्वं हृतम् ।
अन्यायानलतापतप्तमनुजान् पातुं महात्मा तदा
गान्धी सत्यपथाश्रितः शुचिमनाश्चक्रे प्रयासोचितम् ॥५१॥

पन्थानं वृणुते स्म सः शुभमतिर्गान्धी ह्यहिंसात्मकं
तस्मादीश्वरपादपद्महृदयः सद्यः प्रयासोत्तमे ।
लब्ध्वा कीर्तिमतिप्रियां सफलतां भूत्वा कृतार्थश्च स
आगम्याथौ निजां भुवं व्यतनुत प्रोक्तं हि जन्यं द्रुतम् ॥५२॥

आंग्लास्तत्समराद् भृशं हतधियश्चिन्ताकुलाः गान्धिनः
कम्पन्ते स्म नितान्तपीडितहृदो नष्टं विधातुं रणम् ।

नीत्या ते क्रियया धिया च मनसाकार्षुः प्रयत्नाधिकं
जाता नो सफलाः कृतेऽपि परुषे यत्ने तदोच्छृंखलाः ।।५३।।

गान्धी यत् सफलं नितान्तसरलं शस्त्रं ह्यहिंसात्मकं
जग्राहाखिलमेदिनी स्वहृदये तस्माद् भृशं विस्मिता ।
जातं तन्नितरां नवीनरुचिरं शस्त्रं जगत्याः कृते
तत् साति प्रशशंस मोदमहता मान्यं भवन्ती नता ।।५४।।

आंग्लान् जर्मनजन्यकालविषमे साहाय्ययोग्यं प्रति
प्रादात् प्रेक्ष्य स तादृशीमपकृतिं निन्दास्पदं कुर्वतः
तान् लेभे महतीं व्यथां हि जगतीकल्याणकांक्षी भवन्
आंग्लाः शुद्धमतिं प्रयान्तु तरसेतीशं ययाचे तदा ।।५५।।

श्रेयोमङ्गलसम्मतिं शुचितमां दातुं बभूवोद्यतो
जातोऽसौ न च हन्त शासनमदोऽश्रौषीत् तदीयं वचः ।
भूत्वा तत्प्रतिकूलमेव विदधौ कार्यं समग्रं परं
सर्वत्रैव बभूव तीक्ष्णदमनं स्थानेषु सर्वेष्वपि ।।५६।।

दृष्टो यत्र च यत्र कोऽपि मनुजः कार्यालये वा गृहे
किं वा पूजनमन्दिरेऽथ विपणौ कारालयं प्रेषितः ।
सः क्षिप्रं हि विनाभियोगमदयस्वान्तैर्हतैः शासकैः
देशोऽभून्नितरामशान्तहृदयः प्राप क्लमं सर्वथा ।।५७।।

पञ्चाम्बवादिषु शोचनीयघटनाः जाता प्रदेशेषु याः
ताश्चित्तं नितरां तदा मतिमतः श्रीगान्धिनः सत्वरम् ।
दुन्वन्ति स्म महात्मनोऽखिलजगद्बन्धोः पवित्रात्मनः
सत्योपासकशान्तिशीलसुहृदोऽहिंसाप्रयोक्तुः सतः ।।५८।।

गान्ध्यासीत् पुरुषो महान् कुटिलताशून्योऽनभिज्ञश्छले
आसीत् साधुमहात्मतुल्यचरितः सौम्यस्वभावः सुधीः ।
आसीन्निःस्पृहमानसो भरतभूचारित्र्यविद्योतितः
लोके तस्य न कोऽपि शत्रुरभवत् सर्वेष सः सत्सुहृत् ।।५९।।

आंग्लास्तेन निवेदिताः सविनयं रक्षन्तु ते भारतं
शश्वत् साधु पितेव भारतमहीरक्षापराः सर्वथा ।
न्यायं नीतिविदर्चितं समुचितं चेच्छामि पुंसां कृते
श्रीमन्तो भरतावनेः स्वजनतां पश्यन्तु सन्तानवत् ।।६०।।

सम्राजो भरतक्षितेः प्रतिनिधिं गान्धीति सोऽयाचत
श्रेयश्चारुविचारसागरसुधीः प्रैक्षिष्ट चांग्लानपि ।
बन्धून् स्वानिव भव्यभावुकशिरोभूषामणिः सादरं
रामाराधकविश्वबन्धुसुजनः प्रेमाधिवासस्थलम् ।।६१।।

आसीत् सः समदृष्टिरेव जगतीजीवेषु कारुण्यवान्
नो तस्मिन् वसति स्म भेदपरता नो दम्भदोषोऽपि च ।
रागद्वेषविहीनमानसबुधः साम्यश्रियालङ्कृतः
सर्वेषामत एव सः सुजनतास्रोतोऽभवत् पूजितः ।।६२।।

तत् तस्याचरणं विशुद्धसुखदं निर्दोषसत्यश्रितं
सर्वप्राणिहितैकनिष्ठमधरं श्रेष्ठं तपोभास्वरम् ।
त्यागश्रीलसितं सुकर्मणि रतं नक्तन्दिवं पेशलम्
अप्रीणादपि सर्वगौरवपुषां स्वार्थप्रियं शासनम् ।।६३।।

स्वार्थासक्तमनीतिलग्नहृदयं वीक्ष्य प्रभावाद्भुतं
श्रीमद्गान्धिमहात्मनो ह्यतितरां सर्वत्र देशेऽखिले ।
तत्सङ्केते जनतां मुदा च चलितां सत्याग्रहस्याध्वना
शीघ्रं गान्धिमहोदयं हि विदधौ तं वन्दिनं शासनम् ।।६४।।

श्रीगान्धी जनतां न्यवेदयदिदं कारालयस्थे मयि
शान्त्यैव प्रगतिं प्रयातु सकलं कार्यं विना हिंसया ।
सर्वे सन्त्वनुशासनव्रतधरा गृह्णन्त्वहिंसां सदा
आदेशः परिपालितोऽयमभवत् कार्त्स्न्येन सर्वैर्जनैः ।।६५।।

उन्मुक्तः क्रियतां हि वन्दिसदनाद् गान्धी महात्मा द्रुत-
मित्येतद् भरतावनिस्थमनुजाश्चक्रुः स्वकीयाग्रहं

कृत्वैक्यं बलवत्तरं दृढतरं श्रीगान्धिवर्त्मस्थिता-
स्तस्मात् तद् हतशासनं सपदि तं मुक्तं व्यधात् सत्वरम् ॥६६॥

आन्दोलनं परमवेगनितान्ततीव्रं
भूत्वोत्थितं समभवत् ककुभोऽपि सर्वाः ।
आक्रम्य देशधरणीमवलम्ब्य शक्तिं
कुर्वद् रिपुं प्रबलभीतहृदं जगर्ज ॥६७॥

वैदेशिकं न वसनं पुरुषो हि कोऽपि
चिक्राय किञ्च विविधं सुखवस्तुवृन्दम् ।
कार्पाससूत्रमपि निर्मितमत्र देशे
चक्रे मनुष्यनिवहो निजराष्ट्रभक्त्या ॥६८॥

माञ्चेष्टरादिजगतीविदिताश्च संस्थाः
जातास्तदाथ पिहिता विषयेङ्गलेण्डः ।
चिन्तानिलीनहृदयोऽतितरां चकम्पे
स्वातन्त्र्ययुद्धमवनेर्भरतस्य वीक्ष्य ॥६९॥

सद्धीरो भरतावनौ हि समरे गान्धी महात्मा व्यधात्
अत्यन्तं प्रबलं प्रकृष्टदमनं तीव्रप्रचण्डाधिकम् ।
चिन्तां शासननिर्दयं च नितरां प्राप्नोदसह्यां व्यथां
नो बुद्धिश्च तदाभवत् गतिमती जाताकुला साधिका ॥७०॥

आयोगो भरतावनिं हतनयः साईमनो ह्यागतः
कुर्वंस्तस्य विरोधमीड्यचरितः पाञ्चाम्बुनेताऽऽहतः ।
लालालाजपतो महान् भारतभूभक्तो मनस्वी प्रधीः
पञ्चत्वं प्रययौ प्रहारपरुषात् पक्षैकमध्ये द्रुतम् ॥७१॥

यात्रा दाण्डिपरा व्यधायि तरसा प्रारब्धमान्दोलनं
श्रीमन्मान्यमहात्मना च विदितं भद्रं त्ववज्ञात्मकम् ।
आहूताथ पुनर्द्वितीयपरिषत् तत्रैव सद्यः परं
वैफल्यं प्रययौ च सापि परिषद् ह्याद्येव मान्द्यश्रिता ॥७२॥

क्रिप्सस्यागमने विचारमकरोत् क्षिप्रं सभा राष्ट्रिया
आसीदौपनिवेशिकः प्रकटितो यो भारतार्थं तदा।
सद्यः सा 'त्यज भारतं' कृतवती प्रस्तावमेतं शुभं
तस्माद् भारतराष्ट्रमानवमनोऽविन्दत् प्रमोदं भृशम् ॥७३॥

प्रह्वा हि नेतृपुरुषाः अभजन्न हिंसां
संश्रित्य तां युयुधिरे विमलामहिंसाम्।
क्रान्त्यां मनो निदधिरे भगतादिसिंहाः
स्वाधीनताधिगमनाय सहर्षमुग्राः ॥७४॥

स्वाधीनतां समरनेतृसुभाषचन्द्रो
देशान्तरं च गतवान् अधिगन्तुमाशु।
मेधा हि तस्य समुदं व्रजतिस्म योद्धुम्
आश्रित्य शस्त्रमपि भारतभक्तिभाजः ॥७५॥

हिंसायुधं भगतसिंहनवो युवेन्द्रो
ह्यादाय संयुगभुवि प्रथितोऽवतीर्णः।
सः प्राणदण्डमपि हर्षमना भवंश्च
सेहे भटोद्भटशिरोमणिवीरसिंहः ॥७६॥

अन्ये च तस्य सुहृदः प्रियदेशभक्ताः
प्राणान् जहुः कतिपये परतन्त्रतां ताम्।
छेत्तुं स्वभारतभुवो धृतचण्डहिंसाः
क्रान्त्यध्वगाम्यमितसाहसशक्तिभाजः ॥७७॥

स्वातन्त्र्यसैनिकभटार्जनदत्तचित्तम्
हा वायुयानपतनापदमु दधार।
स्वर्गं जगाम भरतावनिगौरवं सः
नेताग्रणीस्तरुणराजसुभाषचन्द्रः ॥७८॥

श्रीचन्द्रशेखरयुवानुपमो महीयान्
'आजाद'नामविदितो बलवान् गरीयान्।

आश्चर्यितान् निशितयाद्भुतया धियारीन्
भक्तो हि भारतभुवो युवधीरमान्यः ॥७९॥

कारागृहेऽप्यनुचितानि बहूनि वीक्ष्य
कार्याणि कुत्सिततराणि यतीन्द्रनाथः ।
तेषां निवारणधिया व्यदधात् प्रयत्नं
सम्बाधितो नवयुवाप्यजुहोदसून् स्वान् ॥८०॥

स्वातन्त्र्यजन्यरतवीरयुवप्रकृष्टाः
आंग्लीयशासनमहादमनेन हन्त ।
सम्पीडिताः अतितरां च कदर्थिता हा
भूत्वाम्रियन्त शतशो निहताश्च तेन ॥८१॥

भङ्क्तुं विधिं लवणनिष्ठगतं महात्मा
प्रावीवृतच्छमहृदा निदधत् ह्यहिंसाम् ।
आंग्लास्तदा प्रबलनिर्दयतां चरन्तः
पातुं विधिं विदधिरे प्रचुरं प्रयासम् ॥८२॥

नो लेभिरे सफलतां हतधीकठोराः
कृत्वापि निन्द्यदमनान्यनिशं बहूनि ।
गान्धी विधिं तमभनक् तरसा महात्मा
सम्प्राप्तवांश्च विजयं नयवर्त्मगामी ॥८३॥

कर्तुं हि हिन्दुजनतां सितविग्रहीयं
तच्छासनं सपदि निर्बलसंख्यकाञ्च ।
चक्रे पृथग् हरिजनान् जनहिन्दुनृभ्यो
बन्धून् निबद्धभरतक्षितिवैरभावम् ॥८४॥

सम्प्रेक्ष्य तां कुटिलतां हतशासनस्य
प्राणान् विहातुमपि गान्धिमहाविवेकी ।
भूत्वोद्यतो ह्यनशनव्रतमाललम्बे
विश्वोदयस्थहृदयो जनतार्तिहारी ॥८५॥

यावन्न शासनमदः सितविग्रहाणां
क्षुद्रं जहौ न निजनिश्चयमुक्तमार्य-
मार्गश्रितः शुचिमतिर्हृदयावदातः
संत्यक्तवान् अनशनं व्रतसाधुनिष्ठः ॥८६॥

हिन्दुत्वगौरवहिताय महांस्तपस्वी
अस्पृश्यभावविनिवारणहेतुनाऽभूत् ।
सन्नद्ध आशु शिवसुन्दरसत्यसेवी
श्रेयस्करा जनहिताय न किं सहन्ते ॥८७॥

अस्पृश्यता श्रुतिपथस्थितहिन्दुजाते-
र्नूनं कलङ्कगहनं पतनस्य हेतुः ।
तस्मात् स्वमौलिपटलादतिशीघ्रमेव
दूरं क्रियेत हितकाङ्क्षितमानसेन ॥८८॥

अस्पृश्यताया यदि नो विनाशो
नृभिः कृतस्तत्क्षण एव राष्ट्रे ।
तदा न पश्येत् स्वहितं कदापि
वसुन्धरेयं मम भारतीया ॥८९॥

अस्पृश्यता नास्ति कदापि धर्मः
सा धर्मनाम्ना खलु धर्ममार्गे ।
विघ्नानुपस्थाप्य करोति धर्मं
कालुष्यमग्नं मलदूषितं च ॥९०॥

नास्पृश्यतास्त्यङ्गमहो कदापि
धर्मस्य हिन्दुत्वभृतां नराणाम् ।
तत्रागतोऽसौ बत पूतिगन्धो
ज्ञेयोऽस्ति सर्वैर्मतिमन्मनुष्यैः ॥९१॥

सर्वे मनुष्याः परमेश्वरेण
सृष्टा अतः केष्वपि नो निषेधः ।

घृणा मनुष्यैर्मनसापि तेषु
भवन्तु बन्धुत्वभृतः पुमांसः ॥६२॥

आत्माथवा चेद्धरिरेक एव
कोऽप्यस्ति नोऽस्पृश्यजनस्तदात्र ।
न स्वच्छताकारिनरोऽस्ति पापी
कार्या घृणाघेषु हि नो श्वपाके ॥६३॥

अस्पृश्यताया विनिवारणार्थं
सर्वत्र बन्धुत्वविकासनार्थम् ।
अभेदभावस्य च रक्षणार्थम्
अस्पृश्यतायाः क्षय एव कार्यः ॥६४॥

न चेदहिंसा जगता गृहीता
चराचरत्राणनदीष्णमाता ।
भवेद् विनष्टा द्रुतमेव सत्ता
ह्यतोऽस्ति सा सन्ततमेव सेव्या ॥६५॥

इष्टास्ति शान्तिर्यदि लोकमध्ये
इष्टा च चेत् प्रेमपवित्रवृत्तिः ।
इष्टं सुहृत्त्वं जगतीहितञ्च
सेव्या तदा बुद्धिमतामहिंसा ॥६६॥

मातेव रक्षति पितेव हिते नियुङ्क्ते
चेतो विनोदयति चन्द्रमुखी प्रियेव ।
निःसंशयं मित्रसमास्त्यहिंसा
कस्माद् भजन्ति सततं न जना अहिंसाम् ॥६७॥

हिंसास्ति घोरं दुरितं धरायां
किञ्चास्त्यहिंसा सरसं हि पुण्यम् ।
धर्मोऽस्त्यहिंसा जगतीजनानां
वक्तीति वेदस्मृतिशास्त्रवृन्दम् ॥६८॥

ज्ञेयो जगद्वासिजनैरनारतं
शुद्धस्वभावः परमः प्रशस्तः ।
श्रेयोगुणो मान्यतमा प्रवृत्तिः
एषा ह्यहिंसा सकलैः सुधीभिः ॥९९॥

नो मानवो मांसनिषेवणार्थं
धात्रा प्रणीतो जगतीषु सत्यम् ।
तस्याकृतिस्तस्य समस्तगात्रे
नाङ्गानि मांसाशिपशोः समानि ॥१००॥

अस्पृश्यतास्ति पितरं जगदेकनाथं
किञ्चापि सा मनुजताम्प्रति नूनमागः ।
तस्माज्जनैः सुमतिभिर्ह्यविलम्बमेव
ग्राह्या मुदा सुकृतनिष्ठमनोभिरत्र ॥१०१॥

एषास्त्यहिंसा मनुजस्य रूपं
शुद्धं स्वकीयं परमार्थमार्गः ।
किञ्चास्ति सा मानवताविकासः
प्रेम्णः प्रतिष्ठा सदनं दयायाः ॥१०२॥

द्रष्टुं हरिं हरिजना अपि मन्दिरेषु
अर्हन्तु भारतधरास्थितिमत्सु नित्यम् ।
कूपाज्जलञ्च भयहीनहृदो ग्रहीतुं
ते चापि सम्प्रति भवेयुरिह स्वतन्त्राः ॥१०३॥

स्पर्शेण कस्यापि जनस्य नूनं
सञ्जायते नो पतनं कदापि ।
हत्यादिदुष्कर्म जनं सदैव
पातं नयत्यत्र न संशयोऽस्ति ॥१०४॥

हर्षेण सर्वे मनुजाः सवर्णाः
उत्थाय चैतन्निजबन्धुवृन्दम् ।

गृह्णन्तु मोदेन मिलन्तु चैषु
हृयालिङ्ग्य सर्वानपि नन्दयन्तु ॥१०५॥

सर्वेऽपि जीवाः परमेश्वरस्य
प्रीत्या भवन्तु प्रियभाववन्तः ।
सत्यं प्रियं सद्व्यवहारमेव
कुर्वन्तु सर्वेश्वरभक्तिमन्तः ॥१०६॥

इत्थं महात्मा जनतार्थमेव
सन्दर्शयन् मार्गशुभप्रशस्तम् ।
प्रेम प्रगाढं जनयंश्च तस्यां
स्वातन्त्र्यसत्त्वं प्रबलञ्चकार ॥१०७॥

राष्ट्रेऽपि सर्वे मनुजाः सहर्षं
तं गान्धिनं स्वं हृदि मन्यमानाः ।
पूज्यं हि देवं निजराष्ट्रहेतोः
कष्टानि सर्वाण्यसहन्त नित्यम् ॥१०८॥

आन्दोलनं गान्धिमहोदयस्तद्
अत्यन्तशीघ्रं विदधद् बलीयः ।
काष्ठां परां पुण्यवतीं हि नीत्वा
चाकम्पयच्छासनसर्वमेव ॥१०९॥

देशे महान्तः पुरुषाः समस्ताः
श्रीनेहरूपण्डितमालवीयौ ।
राजेन्द्रबाबू च पटेलबन्धुः
कस्तूरबा मान्यसरोजिनी च ॥११०॥

राष्ट्रस्य सर्वस्य हि भारतस्य
मान्याः असंख्या सुधियो दिशाभ्यः ।
सर्वाभ्य आगम्य तदा सहर्षं
स्वातन्त्र्यजन्ये मिमिलुर्विशाले ॥१११॥

कारालयांस्ते पुरुषाः प्रसिद्धाः
अव्राजिषुः किञ्च सहस्रशोऽपि ।
साधारणा ग्रामजनाश्च पौराः
नेतृन् स्वकीयाननुजग्मुरेव ॥११२॥

कारागृहे कोऽपि न कोष्ठकोऽभूत्
शून्यस्तदा वन्दिगृहाः प्रपूर्णाः ।
सर्वत्र राष्ट्रे जनतासमुद्र
उद्दामवेगोत्तरलो बभूव ॥११३॥

सूत्रं जना वन्दिगृहे सृजन्तो
गीतानि चोच्चैर्मधुरं गिरन्तः ।
रम्या लिखन्तः कविताश्च मर्त्याः
द्रष्टा अभूवंश्च हरिं भजन्तः ॥११४॥

देशस्थितिं तामवलोक्य सर्वे
ह्यांग्ला बभूवुर्भयभीतमानसाः ।
कर्तुं स्वतन्त्रां भरतक्षमां ते
द्राक् तत्परास्तेन तदा ह्यभूवन् ॥११५॥

कर्तुं स्वतन्त्रां भरतस्य भूमिं
ते घोषणायां यतमानचित्ताः ।
आरेभिरे प्रक्रमयोग्ययुक्तं
क्षिप्रं विधातुं जगति प्रकृष्टाम् ॥११६॥

माउण्टबेटनो नाम राज्यपाल महाँस्तदा ।
गान्धिनं सर्वनेतृंश्च ह्याजुहाव मुदोत्तमान् ॥११७॥

विधातुं भारतं देशं स्वतन्त्रं सर्वथा शिवे ।
वार्ताञ्चक्रे नयज्ञोऽसौ तैः सार्धं नियमान्विताम् ॥११८॥

अली मुहम्मदो जिन्ना तदानीं नायकोऽभवत् ।
मुस्लिमलीगसंस्थायाः सः प्रत्यूहमजीजनत् ॥११९॥

आंग्लाश्चापि तदा मन्ये देशखण्डनमानसाः ।
कदाचिदभवंस्तत्र तस्माज्जिन्नाऽऽग्रही भृशम् ॥१२०॥

पाकिस्ताननिमित्तेन जातो देशेन वीक्षितः ।
खण्डोऽभूद् हन्त देशस्य दुःखदो भरतक्षितेः ॥१२१॥

स्थापनां च गतः सद्यः पाकिस्तानदुराशयः ।
कुटिलैः पुरुषैः किन्न क्रियते जगतीतले ॥१२२॥

देशस्य खण्डनाच्चित्तं वेदनां भारतौकसाम्
दृढं तदाधरन्नूनं दुर्जना मुदमागमन् ॥१२३॥

नो जातानि दिनानि सम्प्रतिबहून्याप्तस्य सर्वप्रिय-
स्वातन्त्र्यस्य परं प्रगाढमहता दुःखेन हा कथ्यते ।
केनापि क्षतबुद्धिमत्तमनसा गान्धी महात्मा हतः
पुंसा सर्वमिदं जगन्निपतितं तस्माद्धि शोकार्णवे ॥१२४॥

प्रार्थ्यते हि परेशो यद् देशोऽयं शुचिमानसः ।
सत्पथस्थो भवन्नित्यं स्वातन्त्र्यसुखमाप्नुयात् ॥१२५॥

एषा कृपा भगवतः परमेश्वरस्य
देशो भवन् जगति सम्प्रति शोभतेऽत्र ।
स्वातन्त्र्यसुन्दरशुभप्रभया प्रकृष्टो
विश्वस्य सेवनपरो भवतादजस्रम् ॥१२६॥

॥ इति स्वतन्त्रतायुद्धं स्वतन्त्रताधिगमनं च नाम चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः

विविधा बहुलाश्च स्थितयो घटनाश्च

आङ्ग्लेष्वद्य गतेषु शोषणकरे तच्छासने निर्दये
विध्वस्तेऽपि च वीक्ष्यते व्यवहृतिर्भाषाङ्गलीया वत ।
दुःखं संस्कृतभारती प्रतिपदं घोरापमानं सदा
स्वक्षोण्यामिह चैव हन्त सहतेऽशान्तिव्यथां सन्ततम् ॥१॥

वार्तापत्राणि नानात्र वीक्ष्यन्ते जनहेतुना ।
संचलितानि रम्याणि भाषासु बहुलासु च ॥२॥

दैनिकानि विराजन्ते मासिकानि च भूरिशः ।
पाक्षिकाणि च दृश्यन्ते ह्यन्यच्चान्यविधान्यपि ॥३॥

सेतवः सन्ति भूयांसो बन्धनान्यप्यनेकशः ।
कार्यालयाः सुशोभन्ते सर्वत्रैव च भारते ॥४॥

विविधानि च यन्त्राणि दीर्घाण्यपि लघून्यपि ।
पुरे पुरे विभासन्ते हितात्यन्तकराणि च ॥५॥

ग्रामे ग्रामे जनाः सन्ति नानाशिल्परता इह ।
उद्योगा गुरवो भान्ति लघवश्च भृशं पुनः ॥६॥

रेलाख्यया प्रसिद्धानि यानानि भारताजिरे ।
दिवानिशं प्रधावन्ति चतुर्दिक्ष्वपि तानि च ॥७॥

बसकारादियानानि शकट्यादिकमत्र च ।
जीपटैक्स्यादियानानि धावन्ति च बहून्यपि ॥८॥

वायुयानानि वीक्ष्यन्ते डीयमानानि च साम्प्रतम् ।
आकाशे सर्वदा चात्र विस्मयदान्यनारतम् ॥९॥

नीरे नावो विचित्राश्च चलन्त्यत्र हि सर्वदा ।
नानाकाराः सयन्त्राश्च महत्यश्च भृशं पुनः ॥१०॥

व्योम्नि स्थले जले तैश्च जना यानैर्दिवानिशम् ।
विहरन्ति मुदा सर्वे कुर्वन्तश्च बहुक्रियाः ॥११॥
क्षणेनैव जनाः सर्वे वार्तां विन्दन्ति सर्वथा ।
टेलिग्रामेण लोकस्य विनायासमनुल्वणम् ॥१२॥
टेलीफोनानि राजन्ते गेहे गेहे हि सन्ततम् ।
वार्तां सुखेन कुर्वन्ति नित्यं तैः सकला जनाः ॥१३॥
गरोर्गुरुतरं भारं रात्रिन्दिवं सहस्रशः ।
टेम्पवश्च ट्रकाश्चापि प्रापयन्ति यतस्ततः ॥१४॥
घण्टापथाः विराजन्ते दिशासु सकलास्वपि ।
प्रतिक्षणं प्रधावन्ति रिक्षादीनि निरन्तरम् ॥१५॥
विद्युद्व्यजनदीपादि प्रभूतसुखसाधनम् ।
सेवते मानवान् सर्वान् सर्वत्र भरतावनौ ॥१६॥
दीप्यते हीटरः शैत्ये ग्रीष्मानेहसि कूलरः ।
अद्य धनिनिकेतेषु कास्ति नो सुखसंस्थितिः ॥१७॥
तरीतुं सागरान् भान्ति पोता अत्र बृहत्तराः ।
सम्भारः प्रेष्यते भूयान् देशं देशञ्च तैः प्रति ॥१८॥
प्रासादा बहुभूयुक्ताः यन्त्रारोहणशोभिनः ।
उच्चोच्चापि स्थितिस्तस्माज्जायते नैव कष्टदा ॥१९॥
छायाचित्रविभा रम्या कस्य नास्ति सुखप्रदा ।
हृद्यता हि युगे चास्मिन् शिखरोच्चे निषीदति ॥२०॥
शोभन्ते मुद्रणागारा भारते हि सहस्रशः ।
ग्रन्थपत्रादिसामग्री मुद्र्यतेऽह्नो दिने दिने ॥२१॥
निर्माणाय पटादीनां विराजन्ते विशङ्कटाः ।
यन्त्रशालाः प्रकृष्टाश्च मनोज्ञाः उत्तमोत्तमाः ॥२२॥
घटिका विविधाश्चात्र हृद्यहृद्यतरा भृशम् ।
निर्मिता ह्यत्र जायन्ते समयज्ञानकारिकाः ॥२३॥

वादित्राणि मनोज्ञानि भूयांसि विविधान्यपि ।
सम्प्राप्यन्ते विनायासमिदानीं भरतक्षितौ ॥२४॥

कलासु कुशला अत्र द्रव्याणि बहुलान्यपि ।
कुर्वन्त्यतिसुरम्याणि कलाहृद्यानि सर्वथा ॥२५॥

वाङ्मञ्जुलानि चित्राणि चित्रशालासु मानवाः ।
मनोनयनहारीणि प्रेक्ष्यन्ते प्रतिवासरम् ॥२६॥

व्योमवाक् श्रूयते चात्र जनैः सर्वैर्गृहे गृहे ।
टेलीविजनमाभाति विनोदाद्भुतकारकम् ॥२७॥

गैसचुल्ल्यो विलोक्यन्ते सर्वेषाञ्च महानसे ।
सद्यस्ताभिर्विनायास भोज्यं गच्छति पक्वताम् ॥२८॥

विद्युत्पेषण्य ईक्ष्यन्ते पत्तनेषु पुरेषु च ।
शरते योषितस्तस्मात् प्रत्यूषे सुखपूर्वकम् ॥२९॥

सर्वा भाषणसामग्री टेपेन परिगृह्यते ।
श्रवणार्थं यदाकाङ्क्षा श्रूयतां सा यदृच्छया ॥३०॥

शृण्वन्ति दूरदेशस्थाः वक्तृप्रेक्षणपूर्वकम् ।
वक्तृतां सकलां सम्यग् धन्यास्त्यद्यतनी धरा ॥३१॥

प्रतिप्रदेशमीक्ष्यन्ते विश्वविद्यालयाः स्थिताः ।
तत्सम्बद्धाश्च कालेजाः विद्यादातृमनोरमाः ॥३२॥

अत्र सर्वत्र भाषांग्ला प्राधान्येन समर्च्यते ।
सुरुचिराङ्ग्लसाहित्ये सामाजिकी बलीयसी ॥३३॥

तिरस्कुर्वन्ति भाषां स्वां सर्वक्षेत्रेषु मानवाः ।
व्यवहारेषु सर्वेषु तैराङ्ग्लयेव प्रयुज्यते ॥३४॥

पठन्ति संस्कृतं नैव कुत्राप्यत्र च बालकाः ।
देशे भारतवर्षेऽत्र धिगिमां जनभावनाम् ॥३५॥

संस्कृतपाठशाला हा विषीदन्तीह रोदिति ।
अध्येतुं देवभाषां नो याति कोऽप्यद्य शावकः ॥३६॥

विवदन्ते जना अत्र सर्वदैव परस्परम् ।
स्वार्थान्धास्ते विलोक्यन्ते पीडयन्ति मिथः पुनः ॥३७॥

अनृतभाषिणः सन्ति सन्ति विश्वासघातकाः ।
छलकपटसंयुक्तो व्यवहारः प्रवर्तते ॥३८॥

पुरेष्वेव न भूयांसो ग्रामेष्वपि च दुर्जनाः ।
यत्र तत्र च सर्वत्र वीक्ष्यन्ते दम्भधारिणः ॥३९॥

अस्ति वेषो मनोहारी वाणी च मधुराधिका ।
संवर्तन्ते तु कर्माणि घोरनिन्दापराण्यति ॥४०॥

चरित्रं सर्वथा निन्द्यं ते बिभ्रति तु पूरुषाः ।
चित्तं रज्यति कालुष्ये पुंसां तेषामनारतम् ॥४१॥

विलासिनोऽर्थवन्तो न दरिद्राणां सहायकाः ।
निर्धनानां कृतेऽत्यन्तमन्नं वासोऽपि दुर्लभम् ॥४२॥

महर्घतावशाज्जाताः जनाश्चारित्र्यकुत्सिताः ।
उत्कोचे रमते तेषामसद्द्रव्ये च मानसम् ॥४३॥

सज्जनानामभावोऽस्ति तेऽल्पीयांस इहाधुना ।
भारतीया स्थितिर्ह्येषा दुनोति नितरां मनः ॥४४॥

मन्दिराण्यपि भूयांसि भान्ति सर्वत्र भारते ।
हरिभक्ता न दृश्यन्ते तेषु हन्त जनाः क्वचित् ॥४५॥

सङ्गीतं कीर्तनञ्चैव कुर्वन्ति च जनाः क्वचित् ।
शुद्धता चेतसस्तेषां भाति नैव च नैव च ॥४६॥

स्वार्थवशाज्जनाः सर्वे यान्ति मन्दिरमन्वहम् ।
भक्तिभावविहीनास्ते मालिन्याक्रान्तमानसाः ॥४७॥

पूजाकर्मार्पितं येभ्यः प्रेक्ष्यन्ते ते न भूसुराः ।
कर्मकाण्डप्रवीणा वा श्रुतिशास्त्रविशारदाः ॥४८॥

अवाच्यां तु महीदेवाः पूजाकर्मविचक्षणाः ।
प्राप्यन्ते श्रुतिशास्त्रज्ञा धन्या तत्रत्यमेदिनी ॥४९॥

वाराणस्याञ्च राजन्ते वेदशास्त्रविशारदाः ।
परं सम्प्रति तत्रापि तत्संख्या याति लाघवम् ॥५०॥
संस्कृतज्ञं कुलं यच्च तत्तु नाद्य हि तादृशम् ।
सर्वं हि साम्प्रतं हन्त संस्कृतशून्यमीक्ष्यते ॥५१॥
योषितोऽप्यधिगम्यन्ते कलाविद्याविशारदाः ।
नगरेषु तु भूयस्यो ग्रामेष्वपि च काश्चन ॥५२॥
क्रीडायाः साधनान्यद्य सन्ति भूयांसि सर्वथा ।
तानि स्वास्थ्योपयोगीनि हितकार्यपराण्यति ॥५३॥
राष्ट्रियाः संग्रहागारा मोदयन्ति भृशं मनः ।
तेभ्यो बहुविधं ज्ञानं लभामहे वयं महत् ॥५४॥
भाजनानि विचित्राणि गुणरूपधराण्यपि ।
पुष्कलानि मनोज्ञानि निर्मीयन्ते च भारते ॥५५॥
उद्यानान्यतिरम्याणि शोभन्ते च पुरे पुरे ।
हरन्ति तानि चित्तानि मानवानामनारतम् ॥५६॥
नैव तानि हि हृद्यानि स्वास्थ्यहितपराण्यपि ।
तल्लाभा बहवः सन्ति श्लाघ्यन्तेऽतः पुनः पुनः ॥५७॥
महान्तः कौतुकागाराः शोभन्ते परमप्रियाः ।
दर्शं दर्शं भृशं चेतो विन्दते प्रचुरं सुखम् ॥५८॥
सुन्दरा विविधाः शुभ्राः परिच्छदाः सहस्रशः ।
विलासिनां मनोऽजस्रं नन्दयन्ति निरन्तरम् ॥५९॥
महान्तः पुस्तकागाराः जनमात्रहितस्थिताः ।
मेधा मनीषिणां तत्र वर्धते सततं भृशम् ॥६०॥
मदरडेर्यो देशे नः संस्थापिताः पुरेऽधुना ।
ताभ्यस्तु मानवैर्दुग्धं प्राप्यते सुखपूर्वकम् ॥६१॥
प्रीतिकराणि पेयानि नानाविधानि भान्ति च ।
रसानां तु समेषां च स्वादो नवो विजृम्भते ॥६२॥

विलोक्यतेऽद्य नव्यत्वं किमपि हृदयप्रियम् ।
सौन्दर्यमद्भुतं भव्यं सर्वथा वागगोचरम् ॥६३॥

बहुविधा अलङ्कारा विचित्राः प्रियनूतनाः ।
स्वर्णरजतरत्नानां भान्ति भूत्वा समन्ततः ॥६४॥

उपानहां च वैचित्र्यं चेतो हरति सादरम् ।
रूपाणि शतशस्तासां विलसन्ति धरातले ॥६५॥

चायसंज्ञकपेयस्य पानं सर्वत्र लभ्यते ।
भारतेऽस्ति प्रियं पेयं मतं सम्प्रति सादरम् ॥६६॥

अण्डभुजां नृणां संख्याधुना सम्प्रति चैधते ।
विप्रा अपि तदादाने सङ्कोचाल्पं न कुर्वते ॥६७॥

मातेव भारते यत्र धेनुः पुंसां मताभवत् ।
हन्यते हन्त तत्रैव साद्य नित्यं निशाचरैः ॥६८॥

विशाला महती संख्या होटलानां पुरे पुरे ।
प्राप्यते भारते देशे शुद्धता क्वास्ति साम्प्रतम् ॥६९॥

देशस्याभ्यन्तरे भागे रक्षितुं जनतां भयात् ।
कलहक्लेशहिंसाभ्यो नित्यं सम्यङ् निरन्तरम् ॥७०॥

पुलिसोऽत्र स्थितो देशे सोऽस्ति किन्तु धनस्पृही ।
सोऽन्यायादुत्सुको भूत्वा गृह्णाति विपुलं धनम् ॥७१॥

रक्ष्यर्थे पुलिसो ज्ञेयस्तद्विभागो हितावहः ।
दोषास्तत्र विलोक्यन्तेऽतः श्लाघामेति नोचिताम् ॥७२॥

सेनाऽऽस्ते परमोत्कृष्टा भारतस्य बलीयसी ।
शौर्यं रणस्थितं तस्याः ख्यातं सर्वत्र भूतले ॥७३॥

शासनस्थापिताः सन्ति भूयांसो भेषजालयाः ।
गुरवो लघवश्चैव भान्त्यत्र भारताजिरे ॥७४॥

एतेषु त्वांग्लपद्धत्या चिकित्सा क्रियतेऽनिशम् ।
तत्रत्या भिषजः सर्वे कथ्यन्ते 'डॉक्टराः' इति ॥७५॥

चिकित्सा शल्यगा नूनं परमोत्थानमृच्छति ।
सा सर्वजनताहेतोः नितरां हितकारिणी ॥७६॥

पक्ष्यालये निरीक्षन्तां वृकसिंहगजादिकान् ।
पिकबर्हिचकोरादीन् हिंस्राहिंस्रासुधारिणः ॥७७।

हलस्थाने प्रयुज्यन्ते क्षेत्रे सम्प्रति ट्रक्टराः ।
यन्त्राणि च प्रयुज्यन्ते कृषिकार्ये कृषीवलैः ॥७८॥

कुल्याः गर्भे भुवः सन्ति शौचालयाः फ्लशान्विताः ।
नलेभ्यो लभ्यते नीरं सर्वं दृश्यं नवं नवम् ॥७९॥

स्नानागारा मनोहृद्याः स्नानसाधनसुन्दरा ।
सौरभैर्बहुलैर्युक्ताः पाउडरैश्च फेनिलैः ॥८०॥

दर्पणा नूतनाकाराः केशमार्जनकारिणः ।
विधयो विविधाः सन्ति कम्बवादिविनिवेशिनः ॥८१॥

कम्प्यूटरस्तु तत्कार्यं कुर्वाणः परिलक्ष्यते ।
यत्कार्यं मानवीं प्रज्ञां न्यक्करोति धरातले ॥८२॥

ईदृश्यो घटिकाः सन्ति रेडियो याः निषेवते ।
ताभ्यो हि समयज्ञानं गीतादिश्चाप्यवाप्यते ॥८३॥

वपुषोऽभ्यन्तरे भागे यद् यदप्यवतिष्ठते ।
स्फुटं करोति तत्काले सर्वमेव तदेक्सरे ॥८४॥

अमेरिकादिदेशेषु स्थितिर्यस्य विराजते ।
प्रेक्षन्तां हि तद्रूपं शृण्वन्त्वथ च तद्वचः ॥८५॥

एतादृशानि यन्त्राणि वीक्ष्यन्तेऽद्यात्र भारते ।
विज्ञानेऽस्ति महोत्थानं लोककल्याणतत्परम् ॥८६॥

अवश्यं साम्प्रतं देशे सन्ति वस्तूनि लक्षशः ।
विज्ञानस्य प्रसाराद्धि कुर्वन्ति तानि सद्धितम् ॥८७॥

क्षणेनैव करोतीदं' टाइपयन्त्रमुत्तमम् ।
कार्यं लेखपरं सर्वं सद्यः सुन्दरमेव च ॥८८॥

वस्तूनामाकृतिं पत्रे फोटोग्राफीकलाद्भुता ।
गृह्णाति नितरां क्षिप्रं संस्थापयति सम्मुखे ।८९॥

धूमपानपरा मर्त्याः अस्माकंदेशे पदे पदे ।
बीडीञ्च सिगरेटञ्च पिबन्तः क्व न सन्ति ते ॥९०॥

धनार्थं साम्प्रतं देशे निन्द्यकृत्यानि मानवैः ।
विधीयन्ते ह्यसङ्कोचमतो धर्मो विषीदति ॥९१॥

भूयांसः सन्ति देशेऽत्र विद्यालयाः पदे पदे ।
असंख्याता विराजन्ते महाविद्यालया अपि ॥९२॥

विश्वविद्यालयानां च संख्याप्यत्र महीयसी ।
भाषांग्रेजी तु सर्वत्र प्रधाना ह्यवतिष्ठते ॥९३॥

नादरो राष्ट्रभाषाया हिन्द्या अत्र विलोक्यते ।
प्रादेशिकी च भाषापि दूयमानात्र विद्यते ॥९४॥

स्वप्नेऽपि संस्कृतं कोऽपि स्मरति नात्र भारते ।
लक्ष्मीसमृद्धिसम्पन्नश्चैश्वर्यस्थोऽपि ह्यधुना ॥९५॥

वराका निर्धना बालाः लभमाना हि भोजनम् ।
पठन्ति नितरां न्यूनाः संस्कृतं तु क्वचित् क्वचित् ॥९६॥

विज्ञानेन चमत्कारो वर्तमाने वितन्यते ।
तस्माद् यन्त्रपरं कार्यं प्राप्यते हि पदे पदे ॥९७॥

विद्युता दीप्यमानाश्च ग्रामा भान्त्यपि साम्प्रतम् ।
विद्युता प्रविधीयन्ते सर्वकार्याणि सर्वदा ॥९८॥

नगराणां समुत्थानं प्रयातं सुतरां महत् ।
भौतिकत्वे हि रज्यन्ति स्त्रियश्च पुरुषा अपि ॥९९॥

न भारतस्याचारो हि तैः सम्प्रति निषेव्यते ।
प्रीयन्ते संस्कृतौ नापि नागमे निगमे तथा ॥१००॥

नारीशिक्षाप्रसारोऽस्ति प्राबल्येन पुरे पुरे ।
नो केवलं पुरे किञ्च ग्रामे चापि स ईक्ष्यते ॥१०१॥

सन्ति सम्प्रति नार्योऽपि तुङ्गशिक्षाविभूषिताः ।
कार्यालयेषु कार्याणि कुर्वन्त्यश्च विभान्ति ताः ॥१०२॥
छात्राः स्वैरिण ईक्ष्यन्तेऽप्यवजानन्ति हा गुरून् ।
विद्यायां विमुखा भूत्वा सिनेमाद्यनुरागिणः ॥१०३॥
कुर्वन्ति निन्द्यकर्माणि सुरां चापि पिबन्ति ते ।
भ्रष्टाचारेषु संसक्ताः जीवनं नाशयन्ति ते ॥१०४॥
भारतं लज्जते तेषां प्रेक्ष्य कर्माणि सर्वथा ।
परीक्षायामभिप्रेक्ष्य छात्रा ग्रन्थान् निरन्तरम् ॥१०५॥
लिखन्ति निर्भया भूत्वा प्रश्नोत्तराणि साम्प्रतम् ।
शिक्षका अपि हा केचित् भवन्त्यत्र सहायकाः ॥१०६॥
कार्यालयेषु सर्वेषु वीक्ष्यन्ते कर्मचारिणः ।
कर्तुं कार्यं मनुष्याणां गृह्णन्त्युत्कोचमञ्जसा ॥१०७॥
उपेक्षन्ते स्वकर्त्तव्यं कृत्वा वार्तामनेहसम् ।
गमयन्ति सदा देशे चायं पीत्वा च ते जनाः ॥१०८॥
अधिकारिजनाश्चात्र प्राप्यन्ते केऽपि भारते ।
भवन्तोऽप्यर्थसम्पन्ना राष्ट्रद्रोहपरायणाः ॥१०९॥
भूयांसो ब्राह्मणा देशे साम्प्रतं परमाधमाः ।
असत्कर्माणि कुर्वन्तो यापयन्ति हि जीवनम् ॥११०॥
विद्यापराङ्मुखा विप्रा रमन्ते निन्द्यकर्मसु ।
एषां क्व पूर्वजा हन्त, क्वैते पामरमद्यपाः ॥१११॥
ब्राह्मणानां कुमारा हि शूद्रसम्भवकन्यकाः ।
स्वप्रेयसीर्विदधतो दृश्यन्ते नितरामिह ॥११२॥
शोभते संविधानेऽत्र पद्धतिर्लोकतन्त्रगा ।
अद्यतनस्य देशस्य सौरभं पाटले समम् ॥११३॥
प्रौढेभ्यो मतदानस्य दत्ते स्वत्वं हि भारते ।
नारीभ्यः पुरुषेभ्यश्च राष्ट्रस्याद्य च सर्वथा ॥११४॥

विशालतमविज्ञेयं संसारे निखिलेऽस्ति तत् ।
लोकतन्त्रं तु राष्ट्रस्य भारतस्याखिलैर्जनैः ॥११५॥
साम्प्रतं मतदातारो द्वात्रिंशत्कोटिसंख्यकाः ।
वर्तन्ते भारते वर्षे प्रकृतिकान्तिभूषिते ॥११६॥
साफल्यं लोकतन्त्रस्य भावनामपि दायिता-
गुणं संश्रयते नृणां नो मनागपि संशयः ॥११७॥
पदप्राप्तास्तु वीक्ष्यन्ते जनताया न किङ्कराः ।
तस्मान्निर्वाचनं प्रायः सत्पात्रस्य न जायते ॥११८॥
शासने स्वार्थनिष्ठानां बाहुल्यं खलु वर्तते ।
भ्रष्टाचारस्तु सर्वत्र मुखं व्यादाय दीप्यते ॥११९॥
जनाः पराहिते लग्नाः शाठ्यकापट्यसेविनः ।
शासनेऽशासने किञ्च वीक्ष्यन्ते बहवोऽधुना ॥१२०॥
सान्द्रा कशिपुषु प्रीतिर्जनवर्गे विलोक्यते ।
तस्मादनुचितेनापि वर्त्मना धनमर्ज्यते ॥१२१॥
नारीणां च कुमारीणामपहारा अहर्निशम् ।
हा हन्त हन्त देशेऽस्मिन् पापं सर्वत्र वर्तते ॥१२२॥
सर्वे जना हरेः पुत्रा विद्यन्ते किन्तु भारते ।
अत्रत्यास्तु न कस्मिंश्चिन्मानवीयं जने परम् ॥१२३॥
कुर्वन्तो व्यवहारं हि बहवो लक्षिता इह ।
जायन्ते सर्वथा तत्र कठोरपशुता रताः ॥१२४॥
सर्वत्रैव धियं नृणां समुचिते न्याय्ये विधातुं पथि
यत्नं कृत्स्नतया चकार परमं गान्धी महात्मा भृशम् ।
सञ्जाताश्च सुसंस्कृताः सुविमलाः शुद्धस्वभावा जनाः
वर्तन्ते परमद्य हन्त बहवो ये निर्दयास्तेष्वपि ॥१२५॥

शासनकृतयत्नेन शिक्षिता बहवोऽधुना ।
उच्चपदे च दृश्यन्ते तेषु हरिजनेष्वपि ॥१२६॥
आर्यभट्टोऽनुराधापि शोभतेऽत्र नभस्तले ।
उन्नतोऽयमहो देशो विज्ञानेऽपि निरन्तरम् ॥१२७॥
व्योमस्थितान् ग्रहान् ज्ञातुं कांश्चित् सम्प्रति भारते ।
यतन्ते सुतरां नित्यं विज्ञानज्ञानकोविदाः ॥१२८॥
भारतस्यान्तरिक्षे हि राकेटो डीयते ध्रुवम् ।
शर्मोपाह्वस्तु राकेशस्तत्र स्थित्वा निरीक्षते ॥१२९॥
दिल्ल्यां संस्कृतवेश्म भात्वनुपमं गायद् यशः पावनं
सर्वश्रेष्ठगिरो नितान्तममितं तस्मादहो साम्प्रतम् ।
निर्माणं कुरुते मुदा भरतभूलोकप्रियं शासनं
कर्तुं तत्परमोपकारपरकं तत्र स्थितं तं व्ययम् ॥१३०॥
प्रत्यब्दं प्रतियोगितां सुरगिरश्छात्रोपकाराय च
प्रीत्या योजयते स्वभारतभुवं व्याप्तां विधायाखिलाम् ।
केन्द्रीयः सुरभारतीविषयको मन्त्रालयः साम्प्रतं
भूयात् संस्कृतभारती ह्यतितरां येनोत्थिता सर्वथा ॥१३१॥
विद्वांसो रचयन्ति संस्कृतगिराबद्धं हि ये मौलिकं
ग्रन्थं शासनकेन्द्रगामि समुदं तेभ्यो धनं सादरम् ।
कर्तुं यच्छति तत् प्रकाशितमपि द्राक् तं कृतीर्नूतनाः
क्रीणाति स्वयमेव तच्च शतशः क्षिप्रं तदीया इमाः ॥१३२॥
प्रीत्याद्योत्तरगप्रदेशपरकं सप्रश्रयं पण्डितान्
प्रत्यब्दं च पुरस्कृतान् हि कुरुते दत्त्वा धनं पुष्कलम् ।
अन्यैस्तद् विधिभिर्बुधान् सुरगिरः संसेवते सादरम्
इत्थं राज्यमिदं भृशं सुरगिरा सेवारतं वीक्ष्यते ॥१३३॥
तत्तच्छास्त्रपटून् विधाय वटुकान् श्रीविश्वविद्यालयः
प्रत्यब्दं सुरभारतीविषयको वाराणसीशोभितः ।

संसारोपकृतिक्षमां सुरगिरां संसेवते साम्प्रतं
संस्थाः संस्कृतभारतीविषयिकाः अन्ये भजन्ते च ताम् ।१३४।।
पत्राण्यत्र विभान्ति संस्कृतगिरोऽनेकानि नो भारते
कालेऽस्मिन् सुधियः परन्तु बहवो नो ग्राहिणः सन्त्यपि ।
नास्तीदृग् भरतक्षिताविह रुचिं धत्ते प्रदेशो हि यस्-
तस्मात् तत्र च तत्र संस्कृतवचः पत्रे न सम्यक् स्थितम् ।१३५।

अस्मिन् काले भरतवसुधा पीड्यमानास्ति भूयः
गाढोऽत्यन्तं परमकटुतापूर्वकं विस्तृतः सन् ।
ख्रीस्तो धर्मः प्रसरति यतो धेनुमांसाशिमर्त्याः
संवर्धन्ते प्रबलनिविडा सर्वथा सर्वभागे ।।१३६।।

देशस्य शासनं पूर्णं त्रिश्रेणीषु विभज्यते ।
केन्द्रीयं शासनं किञ्च राज्यस्तरप्रतिष्ठितम् ।।१३७।।

हरिजनजगत् ख्यातो व्युत्पन्नः सुमतिर्महान् ।
विधिज्ञाता प्रधीन्द्रोऽभूत् अम्बेडकरविश्रुतः ।।१३८।।

भीमरावोऽद्भुतप्रज्ञ आसीदसौ विचक्षणः ।
दक्षोऽभिज्ञो गुणाढ्यश्च संविधानस्य कर्मणि ।।१३९।।

श्रीलॉर्डेविनगान्धिमान्यविदुषोर्मध्येऽभवन्निर्णयः
एतस्मिन् समये बभूव घटिता दुःसम्प्रदायस्थितिः ।
नीतो भारतशासनेन गमितः पारं विशेषो विधिः
तस्मादत्र समुद्बभौ च सुतरां प्रादेशिकं शासनम् ।।१४०।।

केन्द्रे मध्यमकालगामिविधिना कर्तुं विधानं स्थितं
यत् तद् भारतमन्त्रिमण्डलमथो सन्नद्धचित्तं द्रुतम् ।
एतत् कार्यमभूत् प्रसादमधुरं कालेऽनुकूले प्रिये
स्वं हस्तं तु परं प्रदेशनिहितं दूरे व्यधाच्छासनात् ।।१४१।।

सत्ता नैजवशे कृता सुचतुरैः षड्यन्त्रदक्षैर्जनैः
आंग्लाख्यैर्भरतावनिस्थितिमहाद्वेषैर्हितध्वंसिभिः ।

कर्तुं स्पष्टमभूत् क्षमं न समरोद्देश्यं तदा शासनम्
आंग्लानां सह जर्मनेन तरसा तस्मात् सभा राष्ट्रिया ॥१४२॥

टैगोरो गतवान् दिवं कविजगत्ख्यातो रवीन्द्रो महान्
तस्माद् भारतभू बभूव नितरां शोकाकुला सा शुचम् ।
गाढां स्वां प्रकटीचकार निखिलं विश्वं तदा सर्वथा
दुःखं प्राप भृशं रुरोद भरतक्षोणी कवीन्द्रं प्रति ॥१४३॥

क्रिप्सस्यागमने विचारमकरोत् क्षिप्रं सभा राष्ट्रिया
आसीदौपनिवेशिकः प्रकटितो यो भारतार्थं तदा ।
सद्यः सा "त्यज भारतं" कृतवती प्रस्तावमेतं शुभं
तस्माद् भारतराष्ट्रमानवमनोऽविन्दत् प्रमोदं भृशम् ।१४४॥

क्रान्तिस्वान्तसुभाषचन्द्र मतिमान् नेता युवख्यातिभृत्-
पुंसां भारतराष्ट्रगौरवभुवं त्यक्त्वान्यवेषं गतः ।
स्वातन्त्र्यं द्रुतमाप्तुमेव कृतवान् कार्यं सुधीस्तत् तदा
सेवां सोऽरचयद् द्रुतं परमसौ यानस्य पातान्मृतः ॥१४५॥

मिन्टोहार्डिग् इहाभूवन् चेम्सफोर्डसुविश्रुतः
रीडिंगोऽनन्तरं जाता ईर्विनश्च विलिंग्डनः ॥१४६॥

भारते प्रागजायन्त राज्यपालेश्वरा अमी ।
स्वतन्त्रतोदयात् पूर्वं लिन्लिथगोऽप्यजायत ॥१४७॥

वावेलोऽपि समुद्भूतो राज्यपालो महान् बभौ ।
स्वातन्त्र्ये च समुत्पन्ने मौण्टबेटनसंज्ञकः ॥१४८॥

आचार्यो राजगोपालो राज्यपालो महानभूत् ।
आसीद् विद्वान् महान् धीरो राजनीतिविचक्षणः ॥१४९॥

प्रसादोत्तरराजेन्द्रो राष्ट्रपतिर्विदिद्युते ।
राधाकृष्णस्ततो जातो राष्ट्रपतिर्महामतिः ॥१५०॥

जाकिरोऽभूत् ततो विद्वान् वी० वी० गिरिविचक्षणः ।
फख्रुद्दीन अलीपूर्वोऽहमदो विदुषां प्रियः ॥१५१॥

नीलमसञ्जीवरेड्डी ज्ञः सर्वत्र प्रथितः प्रधीः ।
एतस्मिन् भारतेऽभूवन् राष्ट्रपतिमहोदयाः ॥१५२॥

साम्प्रतं ज़ैलसिंहोऽस्ति ज्ञानी नीतिविशारदः ।
प्रकृत्या परमोदारो देशप्रेममहोज्ज्वलः ॥१५३॥

मतिमतां वरो विद्वान् लालोत्तरजवाहरः ।
जातः प्रधानमन्त्रीह नेहरूविश्वविश्रुतः ॥१५४॥

लालबहादुरः शास्त्री सञ्जातस्तदनन्तरम् ।
राष्ट्रेऽभूदिन्दिरा गान्धी महिलासु शिरोमणिः ॥१५५॥

प्रधानमन्त्रिविख्यातो देसाई श्रीमुरारजी ।
श्रीमती चेन्दिरा गान्धी पुनर्भाति स्म भारते ॥१५६॥

हन्त हन्त महद् दुखं कनिष्ठः सञ्जयः सुतः ।
पपात वायुयानाद्धि तेन मृत्युमसावगात् ॥१५७॥

मातेन्दिरा ययौ शोकं तस्माद् गाढं भृशं परम् ।
नो गदितुमसौ शक्यो हृदयोत्तापकृन् महान् ॥१५८॥

खालिस्तानचिकीर्षवो भरतभूद्वेषस्थिता केचन
द्वैधीभावमकारणं हि विदधुः पुष्टं च निन्दास्पदम् ।
हा ते हन्त ! अकारयन् विनिहतां मन्त्रिप्रधानेन्दिरां
दुष्टास्तां कपटेन विश्वमहिलामान्योत्तमां सत्वरम् ॥१५९॥

मान्यः सम्प्रति शोभते शुचिमतिर्मन्त्री प्रधानो भवन्
राजीवस्तरुणो बुधेन्द्रविमलो गान्धी जगच्छ्लाघितः ।
अस्मन्नूतनभारतस्य विदितो विद्याम्बुधिर्नीतिवित्
दृश्यादेष यशो भजंश्च शरदः सौम्यो मनीषी शतम् ॥१६०॥

जयताद् जयताद् राष्ट्रं भारतं विश्वभूषणम् ।
श्रीकृष्णपादपद्मयोर्नित्यं भक्तिं दधत् प्रियाम् ॥१६१॥

इति नवभारतपुराणे विविधबहुलस्थिति—घटनावर्णनं
नाम पञ्चमोऽध्यायः ।[1]

---

१. स्वातन्त्र्यानन्तरं यद् यद् दृष्टं भवति भारते ।
अभूवन् घटना या यास्तास्ता अभिहिता इह ॥

स्वातन्त्र्याधिगतेः पूर्वं घटनाः अघटन्तु याः ।
ताः अपि दर्शिता अत्र परं क्रमो न चिन्तितः ॥

अथ षष्ठोऽध्यायः

राज्यानि केन्द्रशासितप्रदेशाश्च

साम्प्रतं भारते देशे प्रदेशास्तु द्विविंशतिः ।
विशालाः सुन्दराश्चैव शोभन्ते नगकन्यके ॥१॥

संक्षेपे वर्णनं तेषां करोमि पर्वतात्मजे ।
त्वं प्राप्स्यसि सुखं देवि निशम्य प्रियवर्णनम् ॥२॥

ततः सुधियो गीयेरन् महात्मानश्च साधवः ।
अन्यच्चाभिमतं किञ्चिन् निरूपितं मुदा भवेत् ॥३॥

संसारोऽयं परमविषमो दुस्तरः सागरोऽस्ति
यो धीमांस्तं गहनतमसं घोरभीमं तितीर्षुः ।
क्षिप्रं विष्णोश्चरणकमलामोघनावं श्रयेत
देवस्तं सः परमकरुणाधामकूलं नयेत ॥४॥

उत्तरप्रदेशः—

अस्त्युत्तरप्रदेशो हि राज्यं परमविस्तृतम् ।
विशालं रमणीयञ्च विद्या-विभवभूषितम् ॥५॥

राजधानी प्रिया तस्य लखनऊ श्रियाञ्चिता ।
वाराणसी महोत्कृष्टा यस्यां पर्वतकन्यके ॥६॥

विश्वनाथस्वरूपेण राजेऽहं करुणामयः ।
विश्वविद्यालयश्चापि हिन्दूनां भुवि विश्रुतः ॥७॥

तीर्थराजप्रयागोऽपि तद्राज्ये हि विराजते ।
त्रिवेण्याः अनुकम्पातो गरिमा तस्य वर्धते ॥८॥

महत्त्वेन तदीयेन विभाति भुवि सोऽधिकः।
संगमः सरितां पुण्यो महीयान् भुवनत्रये ॥९॥

श्रीकृष्णो यत्र लीलाः स्वाश्चकार परमप्रियाः।
व्रजभूमिः प्रिया सापि राज्येऽस्मिन्नेव राजते ॥१०॥

पुरं कानपुरं नाम नानोद्योगसुशोभितम्।
राज्येऽत्रैव स्फुरच्छश्वन्नितरां मोदतेऽवनौ ॥११॥

राज्ये वस्तुत एतस्मिन् भान्त्यनेकविशिष्टताः।
गोरखपुर-'कल्याणं' ज्ञानं सर्वत्र वर्षति ॥१२॥

पूज्यो यस्मिन् हिमनगपतिः शोभते सर्वथैव
श्रेयःस्रोतोऽघहरबदरीनाथ [आभाति यत्र।
यस्मिन् ख्यातो गुरुकुलवरं कांगडीस्थं गरीयः
संश्लाध्यं तद् बहुगुणशुभं राज्यमौदीच्यमेतत् ॥१३॥

हिमाचलप्रदेशः—

विख्यातं तज्जगति सकले दिव्यवैशिष्ट्यवंद्यं
नानाश्रेष्ठौषधितरुलताद्योत्यमानं धरित्र्याम्।
कुल्लूत्कृष्टं बहुनदनदीरम्यभूभव्यराज्यं
हैमाद्रिश्रीललितशिमला राजधानी यदीया ॥१४॥

जम्बूकाश्मीरराज्यम्—

काश्मीराख्यं परमरुचिरं जम्बुजुष्टं हि राज्यं
दिव्योदात्तं प्रकृतिमधुरं धाम सारस्वतं तत्।
भक्तार्तिघ्नः सततममरो नाथ आभाति यत्र
यस्यास्ति श्रीनगरविदिता राजधानी मनोज्ञा ॥१५॥

वृक्षोत्कृष्टं प्रचुरमधुरैः शोभितं सत्फलैश्च
नानादिव्यौषधगिरिशुभं दिव्यशोभाभिवंद्यम्।
उत्कृष्टोच्चं विविधबहुलैः द्योतितं सद्द्रुमैश्च
श्रेष्ठश्रेष्ठं प्रकृतिजननीदत्तसम्पत्प्रकृष्टम् ॥१६॥

कामरूपम् (आसामः)—

राज्यं रम्यप्रकृतिसुषमापेशलं कामरूपं
वन्यश्रीमद्विविधफलवद् ब्रह्मपुत्राम्बुपूतम् ।
पेयैर्द्रव्यैरुचितचयनैर्नूयमानं नितान्तं
गोहाटीष्टं दिसपुरमिदं राजधानीं बिभर्ति ॥१७॥

पञ्चाम्बु (पञ्जाब) प्रदेशः—

यस्मिन् रम्येऽमृतसरपुरे मन्दिरं स्वर्णशोभं
दिव्यं भूत्वा जयति नितरां पञ्च नद्यश्च वान्ति ।
विश्वख्याता भवति च कृषिः सस्यगोधूमगेया
राज्यं चण्डीगढ़सुविदितं श्रेष्ठयोग्यश्रमेष्टम् ॥१८।

बिहारराज्यम्—

यत्रेङ्गालप्रचुरखनयो लोककल्याणवत्यः
संशोभन्ते ह्यथ च जनता यत्र सम्पत्कृशाऽऽस्ते ।
यत्राभाति प्रथितनगरं पाटलीपुत्ररम्यं
राज्यं भाति क्षितिबहुगुणं श्रीविहाराख्यमेतत् ॥१९॥

आन्ध्रराज्यम्—

आन्ध्रेष्वास्ते मृदसितधरा प्रायशो यत्र तत्र
चोष्णा शुष्कोद्भवति बहुला तेन तूलाख्यसम्पत् ।
तत्रत्यायां भुवि भवति मृद् रक्तवर्णा क्षमातो
वस्तूत्पत्तौ, प्रथितनगरं हैदराबादनाम ॥२०॥

उत्कल (उड़ीसा):—

यस्मिन् राज्ये त्रिभुवनपिता श्रीजगन्नाथ आस्ते
यत्रत्याऽऽस्तेऽभिनवसुषमा राजधानी वरेण्या ।
धीमत्सेव्या भुवि च भुवनेशो महान् भव्यशोभ-
स्तत्र प्रायः सलिलसुभगावेगवात्याः मिलन्ति ॥२१॥

प्रतीच्यवङ्गप्रदेशः—

वङ्गेष्वास्ते वरुणककुभि द्योतते कालिकाता
सा तत्रत्या जगति विदिता राजधानीषु मान्या ।
राज्ये चास्मिन् विविधबहुलाः यन्त्रशालाः महत्यः
सन्त्युद्योगा गुरुगुरुतरा बङ्गभाषैतदीया ॥२२॥

हरियाणा—

सस्यैर्दुग्धैर्लसति हरियाणाख्यराज्यं बलिष्ठम्
विद्यन्तेऽस्मिन् कृषिपटुजनाः सैनिकाः शक्तिमन्तः ।
एतद्राज्यं भरतवसुधैतिह्यमध्ये महत्त्वं
यन्त्रोद्योगैर्बहुलपशुभिः शिल्पिभिश्चैव धत्ते ॥२३॥

राजस्थानम्—

राजस्थानं भरतधरणीसभ्यताचारशील-
निष्ठं राज्यं मरुगतमही शोभतेऽत्र प्रभूता ।
अस्मिन् राज्ये 'जयपुर' पुरी राजधानी मनोज्ञा
नूनं राज्यं विविधनवताचारु सद् दीप्यतेऽद्य ॥२४॥

नागालैण्डः—

नागालेण्डो भरतवसुधाया नवीनं हि राज्यम्
अत्रत्यास्ते प्रगतिपरका कोहिमा राजधानी ।
क्षोण्यां नागा इति च विदिता येऽत्र कुर्वन्ति वासम्
एषः खण्डो भवतु तमसो दूरं एषोऽस्ति यत्नः ॥२५॥

मध्यप्रदेशः—

ऐवा पुण्या विदिततटिनी भाति मध्यप्रदेशे
भान्त्यत्रैव प्रथितविदिशामन्दसौरोज्जयिन्यः ।
भूपालाख्यं विदितनगरं राजधान्यत्र भाति
विज्ञानात् सा विगतसमये कष्टमत्यन्तमाप ॥२६॥

महाराष्ट्रम्—

संस्कृत्या वै विलसति महाराष्ट्रराज्यं मनोज्ञम्
धत्तेऽत्यन्तं तदिह भुवने प्राच्यसंस्कारलक्ष्मीम् ।
भाषाचारावपि च निविडौ पत्तनं 'पुण्य' नाम
शोभाशुभ्रा भवति च पुरी 'मुम्बई' राजधानी ॥२७॥

सिक्किमः—

भाति ह्येतद् बहुगिरियुतं सिक्किमाख्यं तु राज्यं
संवर्तन्ते बहुलविविधा जातयो भोटियायाः ।
बौद्धा वासं विदधति जना हिन्दवश्चापि तत्र
धान्यादीनां भवति च कृषी राजधानी च गङ्टोक् ॥२८॥

मेघालयः—

सान्द्रप्रौढप्रचुरविपिने राज्यमेघालयेऽस्मिन्
सञ्जायन्ते बहुविधफलस्तुत्यतूलादिकानि ।
सौन्दर्याढ्या ललितविभवा राजधानी 'शिलांग:'
शिक्षाशोभामथ च तनुते राज्यमेतत् सतोषाम् ॥२९॥

मणिपुरम्—

नृत्यं यस्याखिलवसुमतीविश्रुतं वेत्ति सम्यक्
प्राचीनं सद् भरतवसुधा संस्कृतिश्लिष्टचित्तम् ।
बालिद्वीपानुगतचरिताचारचारुत्वयुक्तम्
इम्फालं तद् भुवि मणिपुरं राजधानीं बिभर्ति ॥३०॥

केरलराज्यम्—

केरलेषु बहुद्रव्यस्तोमः सञ्जायते भृशम् ।
राज्यं निधिः पदार्थानां विश्वख्यातमिदं प्रियम् ॥३१॥
वस्तुभी रबरद्रव्यधान्यादिविविधैरपि ।
कॉफीचायेक्षुदण्डादिनारिकेलवनोद्भवैः ॥३२॥

भाषा चास्ति क्षितिज्ञाता मलयालमसंज्ञिका ।
त्रिवेन्द्रं वर्तते चात्र राजधानी सुविश्रुता ॥३३॥
शिक्षायां प्रथमं राज्यं राज्येषु निखिलेष्वपि ।
शिक्षिताः सन्ति भूयिष्ठास्तस्मात् सर्वत्र मानवाः ॥३४॥

कर्णाटकम्—

कर्णाटकाख्यराज्यं हि सुवर्णार्थं सुविश्रुतम् ।
किञ्च वन्यपदार्थानां कृतेऽपि भुवि संस्तुतम् ॥३५॥
कर्गलस्य च धान्यस्य हेतोस्तु प्रथितं हि तत् ।
उद्योगानां गृहास्तत्र राजन्ते बहवो भृशम् ॥३६॥
विविधान्यपि यन्त्राणि निर्मीयन्तेऽधिकान्यपि ।
विद्युद्गेहा महान्तश्च भान्ति तत्र पदे पदे ॥३७॥
दूरभाषस्य शालाश्च शोभन्ते बहुलाः अपि ।
शोधसंस्थाः सुशोभन्ते राज्येऽस्मिन् प्रचुरास्तथा ॥३८॥
अत्रत्या राजते रम्या राजधान्यवनिप्रिया ।
'बंगलौर' इतिख्याता कलासु कुशलास्ति सा ॥३९॥
प्रयुज्यतेऽनिशं लोकैर्भाषा 'कन्नड' संज्ञका ।
'कोलार'मपि 'मैसूरं''मंगलौरं'पुरोत्तमम् ॥४०॥

गुजरातराज्यम्—

राज्यस्य गुजरातस्य राजधानी क्षितिश्रुता ।
अमदाबादनाम्नी वै, गुजरातीह वर्तते ॥४१॥
भाषा जनसमूहस्य जानन्तीति महीजनाः ।
साहित्यं च तदीयं हि सुन्दरं मधुराधिकम् ॥४२॥
उद्योगानां गृहास्तत्र विद्यन्ते सर्वथा भृशम् ।
वानसम्बन्धिनः किञ्च गेहाः सन्त्यधिका इह ॥४३॥
वाति नैसर्गिको वातश्चाङ्कलेश्वरसंज्ञके ।
दृश्यतेऽथ च शोधार्थं तैलस्थानवृहत्तरम् ॥४४॥

भूसेचनाय विख्यातं कृषिकार्येऽपि तद्विधम् ।
राज्येऽत्रैव पटेलस्य विद्यापीठं विराजते ॥४५॥
सौराष्ट्राणां सकलजगतीख्याततैलं चकास्ति
खाद्यं पुंसामतिशयतया जायते राज्यरम्ये ।
उद्योगाश्च प्रचुरविविधाः सन्ति वेमादिकाना—
मित्थं नूनं बहुमुखनिधी राज्यसौराष्ट्रमेतत् ॥४६॥

तामिलनाडु—

तामिलनाडु - राज्यस्य 'मद्रासं' विदितं क्षितौ ।
राजधानी हि तत् ख्यातं सर्वत्रावनिमण्डले ॥४७॥
नारिकेलेक्षुदण्डा हि तूलधान्यादिकं पुनः ।
क्वनेनार्थं प्रसिद्धं च राज्यमेतच्चतुर्दिशम् ॥४८॥
इङ्गालखनयः किञ्च धातुलौहादिका भृशम् ।
सम्प्राप्यन्ते प्रदेशेऽस्मिन् लोकहितविधायकाः ॥४९॥
तैलवनस्पतिश्चैव जायन्तेऽथ च फिल्मकम् ।
चायनामृत्तिका भूयो भुरभुरादिवैभवाः ॥५०॥
वज्रचूर्णनिमित्तेन राज्यमेतत् सुविश्रुतम् ।
पशुचर्मप्रभूतं च प्रदेशाज्जायते बहिः ॥५१॥
कोयम्बटूर - तञ्जौरौ कुम्भकोणं च सुन्दरम् ।
मदुराई परी किञ्च शोभन्तेऽत्र भृशं भुवि ॥५२॥

त्रिपुरा—

राज्यं हि त्रिपुरा नाम वर्तते पर्वताकुलम् ।
वन्यवैभवहेतोर्हि जगत्येतत् सुविश्रुतम् ॥५३॥
खनिजानां कृते सम्यग् विख्यातं क्षितिमण्डले ।
चायहेतोस्त्विदं राज्यं जगता बहु गीयते ॥५४॥
राजधानीह विख्याता सर्वत्र जनतोषिणी ।
संज्ञागरतला तस्याः मनोह्लादनकारिणी ॥५५॥

आस्तेऽयं त्रिपुराप्रदेशविदितः क्षोणीधरः श्रीधरः
ऋद्ध्या वै विपनीयया निविडया लक्ष्म्या खनीनाञ्च सः ।
राज्यस्यास्य च विद्यते सुविदितश्चायश्रितो वस्तुतो
व्यापारोऽवनिमण्डले हि निखिले शृङ्गे महोच्चे स्थितः ॥५६॥

अस्मद्देशे मुनि - ऋषिभुवि श्रीविशिष्टाः प्रदेशाः
भव्या भूत्वा स्फुरितविभवा भासमाना विभान्ति ।
तेषु ख्यातेष्वपि च नवतानूयमानप्रदेश—
श्चञ्चच्चारुस्त्रिपुरविदितः शोभते धाम भूतेः ॥५७॥

केन्द्रतन्त्रगताः प्रदेशाः—

केन्द्रशासितखण्डास्तु नव भान्ति च भारते ।
तान्यप्युमे च सर्वाणि साम्प्रतं शृणु चेतसा ॥५८॥

निकोवारोऽण्डमानञ्च लक्षद्वीप - मिजोरमौ ।
डामनञ्च डियुश्चापि नागालेण्डारुणाचलौ ॥५९॥

गोआ चण्डीगढश्चापि पाण्डेचरी च देहली ।
हवेलीनागरं किञ्च दादरेति नव स्मृताः ॥६०॥

पाण्डेचरी—

यदा भारतदेशोऽयमविन्दत स्वतन्त्रताम् ।
फ्रान्सदेशोऽपि दत्ते स्म पाण्डेचरीं हि नः कृते ॥६१॥

फ्रेञ्चभाषा जनैरत्र प्रयुज्यते च तामिली ।
पाण्डेचरी धरित्र्यां तु नगर्यस्ति मनोरमा ॥६२॥

दिव्याभामरविन्दयोगिमहिमा पाण्डेचरीं यां द्रुतं
लोकेऽस्मिन्ननयद् विभामतितरां सः सेवमानोऽनिशम् ।
पूज्यां देवगिरां जगद्धितपरां तां विश्वभाषां हृदा
कर्तुं कामयते तथा च यतते सर्वात्मना साम्प्रतम् ॥६३॥

चण्डीगढः :—

चण्डीगढ़रमारम्यं स्वप्नानां नगरं प्रियम् ।
पादपैः पथप्रशस्तैः कलाभिश्च मनोहरम् ॥६४॥

हृद्यो लोचनहारिरम्यसुषमः श्रीशुभ्रचण्डीगढः
रक्षन्नद्यतनीं कलामतितरां विद्योतते भास्वरः ।
पांडित्योद्भटधीधराः शुचिहृदः कृत्वाधिवासं हितं
विद्वांसोऽमिततेजसा पुरमिदं तेजोमयं कुर्वते ॥६५॥

मिजोरमः :—

मिजोरमे तु भाषे द्वे ह्यंग्रेजी च मिजोऽभिधा ।
गिरिर्मिजो विभात्यत्र कृषौ लग्ना जना इह ॥६६॥

कुटीरोद्योग आस्तेऽत्र चारुतागत उज्ज्वलः ।
हस्तवेमो तथा दृश्या किञ्च हस्तशिल्पस्य हृद्यता ॥६७॥

संघक्षेत्रमिदं ज्ञेयं यथा चण्डीगढो मतः ।
पाण्डेचरी च देशोऽत्र विभाति महती सती ॥६८॥

काप्यन्येव मिजोरमे स्थितिरहो सत्त्वोद्भवा राजते
दृष्टा तत्र तु जायते प्रियविभा क्षेत्राजिरे पुष्कला ।
उद्योगा हि कुटीगता बहुविधाः सामान्यमर्त्यानुगाः
का चर्चा भवितुं क्षमा धनवतां चेतोविनोदस्य हि ॥६९॥

अरुणाचलः :—

अरुणाचलनामा यः प्रदेशो ह्यत्र दृश्यते ।
सोऽपि भारतसंघेन शासनार्थमवेक्ष्यते ॥७०॥

वसन्ति बहुला अत्र मानवा वनजातयः ।
भूटानाद्यनुबद्धेषु पर्वतेषु वसन्ति ताः ॥७१॥

ईटानगरसंज्ञा यद् राजधानीह वर्तते ।
उदयं गच्छतो भानोरिदं क्षेत्रमुदीर्यते ॥७२॥

भूत्वा भात्यरुणाचलोऽतिललितः सूर्योदयश्रीवशात्
श्रेण्यो भान्ति मनोऽभिरामविविधा भव्या गिरीणामिह ।
वन्यास्तत्र कठोरदेहमनुजाः सर्वत्र दृग्गोचराः
गृह्णन्तोऽभिरुचिं भ्रमन्ति विपिने शिक्षाकथा तेषु का ॥७३॥

लक्षद्वीपः :—

लक्षद्वीपविभातिचारुरुचिरं रूपं मनोमोददं
धत्ते भूभुवनेऽत एव किमपि श्रेष्ठा सती भ्राजते ।
द्वीपानामवलेप्रभात्र बहुलान् सन्नारिकेलद्रुमान्
पुष्णन्ती प्रकृतेश्छविं सुरगिरेमां वर्णयन्तीक्ष्यते ॥७४॥

कारावाथी पुरी तत्र राजधानी मनोरमा ।
अत्रापि वर्तते द्वीपे कापि साक्षरताच्छविः ॥७५॥

गोआ, दामन, डियूः :—

गोआदामनसंज्ञिके द्विवसती क्षोण्यां तृतीया डियुः
भाषा कोङ्कणिका मराठ्यपि जनैः प्रीत्या समुद्भाष्यते ।
तत्रत्याः पुरुषाः कृषिं विदधतः कालं नयन्तोऽनिशं
लक्ष्यन्ते सुखपूर्वकं विलसते विद्याविभा तेष्वपि ॥७६॥

दादरा नागरहवेली :—

दाद्रा नागरशोभितानुपमभा स्वच्छा हवेली क्षितौ
संख्या यद्यपि भाति नातिबहुला पुंसां तयोः स्थानयोः ।
उल्लेख्यास्ति वरिष्ठपञ्चपुरुषप्राचीनरीतिप्रथा
शोभेते कमनीयकान्तिवसती ह्येतेऽनवद्यस्थिती ॥७७॥

अण्डमानं निकोबारश्च :—

द्वीपाभाशुभमण्डमानरुचिरं क्षोण्यां विचित्रं भवद्,
द्वीपार्थं ह्यनले सदा समुचितं काष्ठं प्रभूतं ददद् ।
रेलार्थञ्च नितान्तशक्तिललितं ख्यातं धरायां महत्
सान्द्रां वर्षति भां सदैव हि निकोबारोऽवदातप्रभः ॥७८॥

देहली :–

क्षोण्यां दिल्ली ललितसुषमा राजधानी चकास्ति
कालात् प्राच्याद् भरतवसुधागौरवश्रीविचित्रा ।
दुर्गश्रेष्ठप्रभृतिविभवैः सेव्यमाना मनोज्ञा
शोभाधाम प्रचुरमधुरोल्लासलक्ष्मीललामम् ॥७९॥

प्रदेशाः किञ्च केन्द्रेण शासिता अपि ते च ते ।
वर्णिता इह रम्याभाः संक्षेपेण मनोहराः ॥८०॥

इति नवभारतपुराणे राज्य-केन्द्रशासितप्रदेशवर्णनं नाम षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः

संस्कृतविद्वांसो महात्मानश्च

योगिज्ञानिशिरोमणिः शुचिमतिर्विद्वत्समाजादृतः
सांख्याचार्यगणाग्रणीर्हरिहरानन्दः स आरण्यकः।
वङ्गश्रेण्ठनिवासिपण्डितवरो मूर्धन्यशास्त्रप्रधीः
विद्याश्रीपरमोज्ज्वलः शुचिमनाः सौम्योविपश्चित्प्रियः ॥१॥

काशीशोभितसुन्दरामरवचःश्रीविश्वविद्यालय -
पुण्यश्लोकमहामनाः कुलपतिर्वेदादिविद्योदधिः।
नानाग्रन्थनिबन्धनप्रथितधीः सौम्यस्वभावाञ्चितः
शुद्धाचारविचारचारुसुमतिः प्रख्यातवाग्मी महान् ॥२॥

शुक्लः श्रीबुधमौलिरत्नबदरीनाथोऽग्रिमः शास्त्रिणां
सर्वत्रैव यशांसि यस्य विदुषो वैदुष्यनिष्ठान्यहो ।
द्योतन्ते नितरां दिशासु जगतः सर्वासु तेजस्विनः
काशीपण्डितमण्डलार्चितपदो विद्वन्महीचन्द्रमाः ॥३॥

मिश्रश्रीजयमन्तमान्यदरभंगाविश्वविद्यालय -
शास्त्राचार्यशिरोमणिः कुलपतिर्विद्वज्जगत्पूजितः ।
शुद्धान्तःकरणो नितान्तनिशितप्रज्ञो वदान्योत्तमः
कीर्त्यालोकसितीकृताखिलधरो धन्यो धरित्र्यां बुधः ॥४॥

विद्वान् श्रीधरभास्करो मतिमतां मान्योऽस्ति वर्णेकरः
अध्यक्षः सुरभारतीशुभविभाभास्वद्विभागे क्षितौ ।
ख्याते नागपुरे प्रिये सुललिते श्रीविश्वविद्यालये
सेव्यो भाति मनीषिणां प्रियमहाकाव्यादिकर्ता महान् ॥५॥

अध्यक्षोऽमरवाग्विभागविदिते श्रीविश्वविद्यालये
सर्वत्रश्रुतसागरे भरतभूमध्यप्रदेशे स्थिते ।
साहित्यादिकशास्त्रदर्शनपटुश्रेष्ठश्चकास्ति क्षमा-
धीमन्मण्डलमान्यडॉक्टर उपाध्यायो ह्यसौ रामजी ॥६॥

पाली-प्राकृत-संस्कृताख्यवचसां भव्ये विभागेऽग्रणीः
ए० डाँगेऽस्ति सदाशिवो विजयते विद्याम्बुधिः पण्डितः ।
क्षोणीविश्रुतमुम्बईविलसितश्रीविश्वविद्यालये
मुख्यः सन् बुधमण्डनं कविवरः प्रोफेसरश्लाघितः ॥७॥

राजस्थानसुधीशिरोमणिरभूद् विद्याधरो बन्धुरः
साहित्याखिलदर्शनज्ञविदितो विद्वान् मनःपावनः ।
बीकानेरनिवासिनां सुकृतिनां पूज्यः प्रणेता महान्
काव्यानां रसभावभव्यमधुरश्रीधामशोभाभृताम् ॥८॥

श्री वी० डॉक्टरराघवन् ऋजुमनाः साहित्यकर्ता सुधीः
साहित्यज्ञसमाजसेव्यचरणो वक्ता महाँल्लेखकः ।
प्राच्याप्राच्यवचोविदग्धसुमतिर्दिग्दक्षिणस्याः प्रधीः
नानाग्रन्थसमुच्चयप्रणयने सोऽभूत् प्रसिद्धो महान् ॥९॥

आचार्यः प्रतिभानवद्यनिशितो विश्वेश्वरस्तार्किको
न्यायव्याकरणादिशास्त्रनिपुणो वेदान्तविद्यारतः ।
साहित्यस्य च कोविदो गुरुकुलं वृन्दावनस्थं बुधो
व्यद्योतिष्ट विभूषयन् वटुजनान् कुर्वंश्च शास्त्रोन्मुखान् ॥१०॥

विद्याम्भोधिशुभंयुपावनमनोमेधोज्ज्वलालङ्कृतः
शास्त्रश्रीकमनीयकान्तिकलितः कर्ता बहूनां महा-
काव्यानां रसभाववैभववतां संशोभितानां वृहन्-
नानालङ्कृतिसरूपदा गुणवतां ध्वन्युद्भवस्रोतसाम् ॥११॥

साहित्योपवनस्य बर्हिरुचिरो देवीप्रसादः कविः
शुक्लोपाह्वकुलारविन्दसविता शास्त्राटवीकेसरी ।

स्वान्तं सन्ततमेव सर्वविदुषां सम्प्रीणयन् संस्थितः
आसीत् सोऽखिललोकनाथमगधद्भक्तोऽर्चितः प्रज्ञया ॥१२॥

आचार्यो बलदेवसंज्ञक उपाध्यायो यशस्वी कृती
भूयिष्ठा व्यदधात् कृतीरनुपमाः शिक्षार्थिविद्वत्प्रियाः।
साहित्यप्रियकान्तिवृद्धिपरके कार्ये रतो दृश्यते
काशीतीर्थसुधीसमाजविदितः साहित्यविद्याधरः ॥१३॥

ज्ञानोद्योतमहीसुरस्य सुमतेः कृष्णप्रसादस्य वै
विज्ञाः प्रेक्ष्य कृतिप्रियाः रसवतीर्विन्दन्ति प्रीतिं भृशम्।
ताः सर्वाः कवितागुणैः प्रियकवे संशोभिताः सर्वथा
चारित्र्यानुपमप्रभाविलसिता आभान्ति लोके सताम् ॥१४॥

पाञ्चालेषु शिवाङ्घ्रिपद्मनिहितस्वान्तोऽभवद् धर्मभृत्
विख्यातोऽतिमनोहरेऽमृतसरे विद्वान् नृसिंहो महान्।
तस्याध्यापनपद्धतिर्वटुजनानत्यन्तमप्रीणयत्
तस्मात् तस्य सहस्रशः सुरुचयः शिष्या अभूवन् गुरोः ॥१५॥

द्रव्येशोऽद्भुतशेमुषीसमुदितस्तर्कप्रधीष्वग्रणीः
वेदान्तादिकदर्शनेषु विदितो विद्वान् महान् भारते।
शास्त्रे व्याकरणे बुधो ह्यनुपमः सः पाणिनीये सुधीः
प्राप्नोत् तेन विहारभूः बहुयशो दीप्तं वृहद् गौरवम् ॥१६॥

वागीशः सुरभारतीवसुमतीज्योतिर्मयं गौरवम्
विद्यानां प्रियधाम विश्वविदितप्रज्ञो यशःपेशलः।
शास्त्रश्रीपतिमन्दिरं सहृदयं बोम्बेनिवासप्रियो
डाँगेभारतभूषणं प्रियमहाराष्ट्रस्य सच्छिक्षकः ॥१७॥

विद्याम्भोधिसुरेशचन्द्रमतिमान् विद्वान् बनर्जी महान्
ख्यातः पश्चिमवङ्गशिक्षकजगत् प्रेष्ठोमहीयान् प्रधीः।
हंसः संस्कृतमञ्जुलाभसरसः विद्याप्रदातोत्तमः
स्तुत्यो वङ्गविभूषणं कलकतापुर्याः पताकोत्तमा ॥१८॥

श्रीभावासरसंस्कृतामृतनिधिः गीर्वाणवाणीविदां
लोके विश्रुतपण्डितः शुभरुचिः सम्पोषकः संस्कृतेः।
पूनाविश्वसरस्वतीसुसदनाचार्यो विपश्चिन्महान्
ग्रन्थान् योऽररचद्विभिन्नविषयान् रम्यान् हिते तत्परान् ॥१९॥

शोधार्थं प्रथितास्ति या वसुमतीपृष्ठे नितान्तप्रिया
विश्वालङ्कृतिभारतीति जगतीमान्या स्वनाम्नानिशम्।
क्षोणीविश्रुतभारतेन्दुनिशितप्रज्ञद्विवेदिप्रधीः
मन्त्रीशान्तिनिकेतने हि कुरुते सेवां महीकीर्तिताम् ॥२०॥

गान्धी गीतो भुवनविदितो नेहरूश्चापि येन
साहित्यज्ञप्रियबुधजगद्वन्दनीयः सः आसीत् ।
शुक्लोपाह्वो मधुरकवितासृष्टिकर्ता कवीन्द्रो
ब्रह्मानन्दः सुजनकुलभूषणं साधुचित्तः ॥२१॥

गायेयं कथमीड्यचारुचरितं विद्वज्जगद्भूषणं
शास्त्रज्ञं परमोज्ज्वलं कुलपतिं श्रीविश्वविद्यालये।
आनन्दोत्तरशब्दरम्यरुचिरं पूज्यं 'विशुद्धं' बुधं
सौम्यश्रीसरलस्वभावमधुरं वृन्दावनाधिष्ठिते ॥२२॥

यत्रास्ते महती कृपा सुरगिरामातुः सुते शास्त्रिणि
यस्य श्रेष्ठकवेश्चकासति महाकाव्यान्यनेकानि च ।
अध्यक्षः सुरवाग्विभागविदिते यो विश्वविद्यालये
शुद्धस्वान्तसुधीन्द्रवंद्यपरमानन्दः पुरेऽलीगढ़े ॥२३॥

पन्नालालमहानुभावजगतीविद्यावतां वन्दितः
प्राचार्यप्रथितो गणेशसुरवाग्विद्यालये पावने।
श्रीमान् डॉक्टरजैनसाधुहृदयः संशोभते शास्त्रवित्
ख्याते सागरसंज्ञके प्रियपुरे मध्यप्रदेशस्थिते ॥२४॥

'प्रेमी' जैनजगन्मनीषिनिवहे स्तुत्योऽस्ति वाराणसी-
पुर्यां लोकहितस्थसंस्कृतवचःश्रीविश्वविद्यालये-
ऽध्यक्षो दर्शनशास्त्रजैनपरकख्याते विभागोत्तमे
भाति स्वान्तसमुज्ज्वलः शुचिमतिः श्रीफूलचन्द्रो भृशम् ।२५॥

विष्वक् संस्कृतभारतीनिपुणता ख्याता यदीयावनौ
यो भाति क्षितिमण्डले लखनऊस्थाने त्रिवेदी सुधीः ।
विख्याते सुरभारती बुधवरः श्रीविश्वविद्यालये
साहित्यस्य महाविदग्धकुशलः श्रीमातृदत्तोऽस्ति सः ॥२६॥

एस्०एन्० डॉक्टरविज्ञवंद्यसुमतिः शुक्लः प्रवक्तोत्तमो
विद्वान् देववचोविभागविशदे श्रीविश्वविद्यालये ।
शश्वत् पावनतीर्थराजदुरितध्वंसक्षमे राजते
शास्त्राणामनुशीलने गमयति स्वं जीवनं सोऽनिशम् ॥२७॥

वाणी नृत्यति यस्य हन्त रसनायां विन्दमाना मुदं
विज्ञानां जगतीं भृशं शुचिधिया प्रीणाति विद्याम्बुधिः ।
सिंहोऽलीगढ़संस्थिते मुसलिमे श्रीविश्वविद्यालये
पुण्ये संस्कृतभारतीशुभविभाभव्ये विभागप्रिये ॥२८॥

हिन्दूविश्वमनोज्ञमङ्गलमये श्रीविश्वविद्यालये
काशीस्थे जगतीप्रसिद्धविभवे कार्येऽनुसंधानके ।
विद्वद्वीरउमेशदीप्तधिषणो विद्यानवद्यप्रियः
संलग्नो मनसा प्रकर्षगरिमश्रीशोभितः शोभते ॥२९॥

श्रीमान् ठक्कुरकृष्णमोहनसुधीविद्यानुरागी महान्
मान्यो व्याकरणादि शास्त्रनिपुणो देशेऽस्मदीये प्रियः ।
प्राचार्यो रणवीरसंस्कृतमहाविद्यालयेऽसौ भवन्
काश्यां संस्कृतपण्डितेषु नितरां श्रेष्ठोऽद्वितीयः स्थितः ॥३०॥

काश्यां संस्कृतभारतीविषयके श्रीविश्वविद्यालये
श्रीकैलासपतिस्त्रिपाठिमतिमद्वृन्दाग्रणीः पण्डितः ।
साहित्याख्यजगत्सुशिक्षककुले मुख्यो मनीषी महान्
विद्वान् डॉक्टरशास्त्रमानससरो हंसो हि विद्योतते ॥३१॥

विज्ञानन्दनरेन्द्र उज्ज्वलमनाः सौम्यो मनीषिप्रियो
ग्रन्थानामभिचिन्तने भरतभूभावश्रियालङ्कृतः ।

श्रीश्रीवास्तवकोविदोऽनुदिवसं संसेवते संस्कृतिम्
सद्वैद्यो हि विशारदो लखनऊरम्ये पुरे राजते ।।३२।।

आचार्यो भरतक्षितेर्बुधवरस्तुत्योऽस्ति वाचस्पतिः
प्राच्यव्याकरणस्य पण्डितवरोऽध्यक्षो विभागे प्रधीः ।
दिक्षु स्वं च यशस्त्रिपाठिसुजनो रामप्रसादाभिध-
स्तन्वन् संस्कृतवाङ्महीसुविदितः काश्यां भृशं शोभते ।।३३।।

विद्योत्कर्षगुलामदस्तगिरिविद्विख्यातविज्ञो महान्
धीमद्भूषणदेववाक्सुनिपुणः पाण्डेचरीसंज्ञके ।
धाम्नि द्योतितविश्वसंस्कृतप्रतिष्ठानस्य मान्यः प्रियः
अध्यक्षस्य सहायकस्य हि पदे संशोभते तिग्मधीः ।।३४।।

ए० एन्० पण्डितभूषणं सुरगिराविद्वज्जगद्वल्लभो
विद्यापीठमहीनितान्तविदितः काश्यां बुधोऽध्यक्षताम् ।
पाण्डेयः परिगृह्य भाति सुरवाग्विज्ञेशवंद्यो महान्
सः सम्पादयति क्षितौ सुविदितां श्रीभास्वतीपत्रिकाम् ।।३५।।

पाण्डेयव्रजमोहनो हितमना राज्ये विहाराभिधे
विख्याते मगधप्रियेऽतिरुचिरे यो विश्वविद्यालये
हिन्दी-संस्कृतभारतीसुविदितज्ञानप्रदातास्ति सः
तीर्थे बोधगयागरीयसि महानाचार्यधीमत्प्रियः ।।३६।।

नव्यव्याकरणप्रधीप्रवरगायत्रीप्रसादाभिधः
पाण्डेयः प्रथितप्रवक्तृविमलज्ञानाम्बुधिः कीर्तिमान् ।
विद्वान् ज्ञानपुरस्थकॉलिजवरे काशीनरेशस्य हि
विद्याबन्धुरवंद्यकोविदजगत्संस्तूयमानोऽनिशम् ।।३७।।

पूनाडेकिनकालिजे विजयते कोषप्रणेता महान्
विद्योद्यानविहारमोदितमनाः पूतः प्रकृत्या गुणी ।
सेवायां सततं रतः सुरगिरो निःस्वार्थभावश्रितः
श्रीएच्०सी० पटयालकीर्तिललितः शिक्षाविदामग्रणीः ।।३८।।

ख्यातो व्याकरणे सुधीः प्रियसुधाबिन्दो हि पत्रस्य यः
पाण्डेयो बुधराजनाथसुकृती सम्पादको विश्रुतः ।
कालेजे महिमान्विते त्वहमदाबादे पुरश्रीयुते
आचार्यः सुरवाग्विभागविमलेऽध्यक्षः स विद्यार्णवः ॥३९॥

एच्०एल्० संज्ञसुधीरयं लखनऊस्थे कीर्तिपात्रप्रियो
रस्तोगी प्रियकोविदो धृतिमनाः शास्त्रेषु विज्ञर्षभः ।
आचार्यप्रवरः प्रधीः सुरवचः श्रीविश्वविद्यालये
शास्त्रालोडनधीरमानसबुधो रात्रिन्दिवं वीक्ष्यते ॥४०॥

तं विज्ञेन्द्रं भुवि सुरगिरः पण्डितं को न वेत्ति
जातो विद्वाननुपम इहासौ पदे च प्रमाणे ।
वाक्ये चापि प्रथितमतिमान् शास्त्रिसेव्योऽभवत् सः
मान्यो मह्यां श्रितशिवशिवो दत्त आचार्यवर्य्यः ॥४१॥

आसीद् व्याकरणाटवीहरिरसौ श्रीश्रीवरः पण्डितः
श्रीमद्भागवते परां कुशलतां स्तुत्यां भृशं नैपुणीम् ।
वेदान्तादिकदर्शनेषु च बुधः श्लाघ्यं न्यधाददद्भुतं
वैदुष्यं मथुरानिवासिविदुषां मान्यश्चतुर्वेदिनाम् ॥४२॥

सञ्जातोऽवनिदेववंद्यविमले ओट्टूरमन्नामके
राज्ये केरलसंज्ञके सुविमले नम्बूदिरी उण्णिवित् ।
वेदाकाशनवेन्दुवत्सरशुभे विद्वज्जगत्मण्डनं
राधाकृष्णरसायनं रचितवान् काव्यं हि भक्त्यास्पदम् ॥४३॥

गौडोपाह्वमनोहरो मतिमतां लालोत्तरः सात्त्विकः
आचार्यः पदवाक्ययोरनुपमो विद्वांश्च हिन्द्यां महान् ।
पाश्चात्यागमकोविदश्च सरलो विख्यातवैदुष्यभृत्
कीर्त्यासौ कृतवान् दिशः सुविमलाः सर्वा मनीषिप्रियः ॥४४॥

विद्वत्तल्लजदीक्षितो बुधजगद्भूषा सुरेन्द्रः सुधी
साध्वाचारविचारचारुचरितः स्वान्तोज्ज्वलः सज्जनः ।

हिन्दी-संस्कृतविज्ञवृन्दजगता स्तुत्यो गुणालङ्कृतः
पुण्यश्लोकविहारभूमितिलकं विद्यानवद्यार्चितः ।।४५।।

आचार्यः स्वयशःसितीकृतदिशः साहित्यशास्त्राग्रणीः
विख्यातोत्कलविश्वगेयचरितः श्रेष्ठे हि विद्यालये ।
विद्याभूषणभूषितः सुरगिरारम्ये विभागप्रिये
के०सी० संज्ञककोविदः स्वकृतिभिः सर्वत्र विद्योतितः ।।४६।।

संस्थाने महिलाहिते लखनऊ - संशोभिते राष्ट्रिये
प्राचार्या विदुषीजगत्सुविदिता विज्ञोत्तमा दर्शने ।
शुक्ले पावनमन्त्रमण्डितयजुर्वेदे महापण्डिता
श्रीमद्वैश्यकुलेऽग्रवालविमले नाम्नेत्युमा विश्रुता ।।४७।।

आचार्यर्षभरामकृष्णमतिमान् भक्ति दधच्छङ्करे
नित्यं संस्कृतभारतीं शुचिहृदा संसेवमानो मुदा ।
कॉलेजे बलवन्तराजरुचिरे विद्यारतश्चागरा-
ख्ये श्रीमत्प्रथिते पुरे विजयते भावोदधिर्भावुकः ।।४८।।

डाँगे सिन्धु महीयसी सहृदया बोम्बेस्थिते विश्रुते
एल्फिन्स्टन् इतिनामकेऽवनितले कीर्ति प्रभूतां श्रिते ।
कॉलेजे विदुषी मुदा गुणवती मान्या यशःशोभिता
विद्याभास्वरभासुरा सुरगिराचार्या जयत्वादृता ।।४९।।

श्रीजी०वी० इति संज्ञया सुरुचिरा देवस्थलीख्यातिभाक्
पूनासंस्कृतविश्वविश्रुतयशोविद्यामहासद्मनि ।
अध्यक्षः सुरवाग्विभागविमले प्रौफेसरः श्रीवृतः
संस्थाने प्रथिते हि शोधपरके जातो निदेशस्थितः ।।५०।।

कल्लोपाह्वबुधेन्द्रशास्त्रकुशलः काश्मीरभूभूषणं
ख्यातश्रीनगरे मनोज्ञमधुरे श्रीविश्वविद्यालये ।
वक्तृश्रेष्ठमहामनीषिसुकृती साहित्यतेजोऽर्चितः
श्री वी.एन्. हृदयोज्ज्वलः प्रगतिमान् शास्त्रिप्रियो भूतले ।।५१।।

विख्यातोत्कलसंज्ञके सुविशदे रम्ये प्रदेशे प्रिये
वक्ता संस्कृतवाग्विभागरुचिरे जी०एम०विद्यालये।
क्षोणीख्यातिगते हि सम्बलपुरे विद्योतमानः प्रधीः
नेत्रे पद्मसमेऽत एव विदुषो नामास्ति युक्तं खलु ॥५२॥

केङ्घेकोविदमौलिरत्नसुजनश्चिन्तामणिस्त्र्यम्बको
विख्यातोऽयमलीगढ़े मुसलिमश्रीविश्वविद्यालये।
मान्यो रीडरनाम्नि तिष्ठति पदे गीर्वाणवाणीविदां
लोके शास्त्रसमुद्रमन्थनपटुर्विभ्राजते भारते ॥५३॥

लद्दूपाह्वपवित्रचारुचरितः एस्०डी० प्रसिद्धाख्यया
विख्यातो भरतक्षितौ गुणिवरः पूनानगर्यां स्थिते।
भाषाशास्त्रबुधो महान् सहृदयः श्रीविश्वविद्यालये
विद्यासागरदिव्यकान्तिकलितो विज्ञानभाषासुधीः ॥५४॥

जी०बी० संज्ञककोविदः पलसुले पूनास्थिते विश्रुते
वाग्मी शास्त्रविचक्षणः सुरगिरो यो विश्वविद्यालये।
वी०ओ०आर० निदेशको बुधजगन्मान्यो भवन् राजते
धीमल्लेखकवृन्दमस्तकमणिः सत्कीर्तिदीप्त्युज्ज्वलः ॥५५॥

पालीप्राकृतपण्डितो वसुमतीविख्यातविद्वत्प्रियो
जैनाख्याखिलशास्त्रविज्ञविदितो यो विश्वविद्यालये।
क्षोणीगीतयशःशुभोदयपुरे संशोभमानेऽनिशं
श्रीजैनोदयचन्द्रदर्शनसुधीः विद्यावदातो हि सः ॥५६॥

शर्मोपाह्वो विबुधवचसो डॉक्टरो रामकर्णः
विद्वद्वृन्दस्तुतशुचिमतिः शास्त्रवित्स्वग्रगण्यः।
काश्यां धीमानुपकुलपतिर्विश्वविद्यालयस्य
ज्ञानज्योतिः सहृदयशिरोभूषणं स्तुत्यशीलः ॥५७॥

वंदुष्यश्रीसुभगसुजनो विज्ञवृन्दाभिवंद्यो
श्रेष्ठोदारः प्रकृतिसुजनः शास्त्रवित् साधुचित्तः।
नानाकाव्यप्रणयनपटुः केन्द्रशिक्षाशुभंयु-
क्षेत्रोत्कृष्टे ह्यधिकृतिपदे शोभते स्वामिनाथः॥५८॥

श्रीमल्लालबहादुरस्य सुधियो नाम्ना प्रतिष्ठापित-
संस्थाया गुणितल्लजः शुचिमवा प्राचार्यमान्यो महान् ।
विद्वन्मण्डनमण्डनो बुधवरः विद्वज्जगत्यादृतो
मीमांसादिकदर्शनेष्वनुपमां पुष्णाति सच्चातुरीम् ॥५९॥

वेदानन्दः शुचिमतिपद-न्यायशास्त्रादिविद्वान्
आचार्योऽसौ परमकुशलां शेमुषीं प्राप्य भाति ।
शास्त्रार्थे च प्रथितधिषणः पण्डितानामुपास्यो
'झा' व्याख्यातोऽवनिमणिविहारप्रदेशाधिवासी ॥६०॥

विद्योद्दामद्युतिसुरुचिरश्चारुदेवश्चकास्ति
विद्वल्लोके ह्यधिगतयशाः शब्दशास्त्रप्रवीणः ।
ग्रन्थान् श्रेष्ठानकुरुत सुधीः लेखकेषु प्रकृष्टो
दिल्ल्यां मान्यस्त्रिदशवचसः पण्डितानां समस्ते ॥६१॥

साहित्योपवनस्य मञ्जुलपिकः साहित्यशास्त्राम्बुधिः
साहित्ये रमते सदैव भरतक्षोण्याः महागौरवम् ।
विद्वद्भूषणपण्डितोऽस्ति बटुको नाथः सुधीवन्दितः
काश्यां काव्यविचक्षणः कविवरः प्रज्ञाप्रकर्षोज्ज्वलः ॥६२॥

मान्यः श्रीमिथिलेशमिश्रमतिमान् विद्वत्समाजप्रियो
हंसो दर्शनमानसे सरसि सः पुण्यप्रयागस्थितः ।
कीर्तिस्तस्य पुरे पुरे विलसति प्रध्यां जनानां भृशं
विद्योत्तुङ्गतरङ्गराजिजनिता मेधाविनो मञ्जुला ॥६३॥

विद्वन्मान्यथिटेगणेशमतिमत् क्षोणीप्रसिद्धः प्रधीः
पूनास्थे सकलक्षमासुविदिते श्रीविश्वविद्यालये ।
आचार्यः सुरवाग्विभागसरसे कात्यायने विश्रुते
कार्यं तस्य विभाति मञ्जुलतरं शास्त्रज्ञचित्तप्रियम् ॥६४॥

चञ्चच्चारुमनीषिवृन्दविदितः श्रीराममूलः प्रधीः
कार्यं तस्य नितान्तमेव ललितं सत्सेवितां संहिताम् ।

आगस्तीमधिकृत्य साधु विहितं शोधस्य दृष्ट्या मुदा
चेतोहारिकलां च वर्ष्मपरकामुद्दिश्य विद्याजुषा ।।६५।।

देवीदत्तमहामतिः क्षितिसुरश्चण्डीगढ़े राजते
कालस्तस्य सतः प्रयाति सुधियः प्रीतिं सदा गृह्णतः ।
शास्त्रेष्वत्र हि तेन देववचसि प्राकट्यमासादिता
नूत्ना कापि विभा प्रयोगपरकालेखीति भाषाविदा ।।६६।।

वेदेऽसौ यजुषि व्यधाद् गुणनिधिः श्रीविश्वविद्यालये
हिन्दूनां प्रथिते सुधीहितकरे काश्यां जगद्विश्रुते ।
श्री वी०के० सुरभारती प्रियविभाभव्ये विभागे महान्
अध्यक्षः सुरवाचि वंद्यनिपुणः पाल्यां च विज्ञर्षभः ।।६७।।

शुक्लो डॉक्टरकृष्णकान्तसुकृती मान्यो महीयान् सताम्
आचार्योऽखिलशास्त्रसेतुसुभगो विद्यावतामर्चितः ।
ग्रन्थः शोधपरो हि तेन रचितो रत्नाकरे कॉलिजे
ह्यध्यक्षः सुरवाग्विभागरुचिरेः ख्यातो बरेल्यां प्रधीः ।।६८।।

शङ्करपाण्डुरङ्गस्य विद्यागुणनिधिः सुता
डॉक्टरराघवेन्द्रस्य भार्या परमसुन्दरी ।।६९।।

पूनां स्वजनुषा विज्ञा निनाय गौरवं महत् ।
राष्ट्रियभावधारायाः परमोज्ज्वलसागरः ।।७०।।

प्रायोऽष्टादश साचार्या ग्रन्थानररचत् प्रियान्
स्वराज्यविजयं काव्यं सत्याग्रहपरां हिताम् ।।७१।।

गीतां किञ्च महाकाव्यं रामदासपरं महत् ।
विख्याताः रचनास्तस्याः पण्डितताया इमा भुवि ।।७२।।

विद्वद्वंद्यकविक्षमा भरतभूभूषाभवच्छ्रेयसी
धन्येयं धरणी गुणप्रियधृता यत्रानवद्या जनुः ।
गृह्णातिस्म यया दिशाः स्वयशसा शुक्लीकृताः सर्वथा
संसारस्य मनोज्ञशीलमृदुतारम्याम्बुधिः सा क्षितौ ।।७३।।

उमाकान्तः शुक्लः सरसकवितायाः प्रणयने
कवीन्द्रो विख्यातो बुधवरसमाजादृतपदः ।
प्रधीशः सौम्योऽसौ प्रकृतिसरलः शास्त्रकुशलः
सदा स्वाध्याये स्वं गमयति मुदा सर्वसमयम् ॥७४॥

वाग्मिश्रेष्ठकविप्रियः परिषदो वाचः सुराणां महान्
मन्त्री भारतभूबुधोत्तमरमाकान्तो हि शुक्लो युवा ।
सर्वस्मिन् भुवने स देववचसस्तन्वन् यशः शोभते
कालेजेऽथ च शिक्षकः सुविदितः श्रीराजधानीस्थिते ॥७५॥

साहित्याम्बरचन्द्रगौरवधरोऽसौ स्वाभिमानप्रियो
वाणीकौशलपेशलः सुरुचिरः प्रज्ञाश्रियाराधितः ।
शुक्लः शिक्षकलोकविश्रुतयशा विद्यानवद्यो महान्
साध्वाचारविचारचारुचरितः श्रीविष्णुकान्तः सुधीः ॥७६॥

हृद्यश्रीहरिवंशलालमतिमान् बुन्देलखण्डस्थिते
विश्वैतिह्यसुकीर्तिताखिलगुणः श्रीविश्वविद्यालये ।
विद्याधाम महोज्ज्वलः कुलपतिर्वैदुष्यवन्द्यान्वितः
श्रीमान् डॉक्टरनीतिनेतृनिपुणः प्रख्यातमेधार्चितः ॥७७॥

श्रीमन्मान्यबुधो विभात्यतितरां श्रीश्रीनिवासो मही-
धन्ये धर्मसमाजकालिजमहाभव्ये विभागे गिरो-
देवानां मतिमानलीगढ़पुरेऽध्यक्षासने शोभितो
मिश्रो डॉक्टरविश्रुतो भुवि भृशं मान्यप्रतिष्ठास्थितः ॥७८॥

विद्यातीर्थं त्रिदशवचसः पण्डितो माननीयः
शास्त्राम्भोधिर्गणपतिसुधीः केरलेषु प्रसूतः ।
ग्रन्थानेकप्रणयनपटु ह्युद्दधारात्र भासं
प्राच्यग्रन्थप्रथितभवनेऽध्यक्षतां सश्चकार ॥७९॥

शर्मा पण्डितभूषणं गिरिधरो विद्वत्समाराधितः
सञ्जातोऽखिलशास्त्रकौशलधरो वंशे चतुर्वेदिनाम् ।

विद्वान् संस्कृतकालिजे जयपुरे प्राचार्यतां भूषयन्
कीर्तिं देवगिरोऽत्र विश्वभवने तन्वन् भृशं दिद्युते ॥८०॥

शास्त्रार्थप्रथितो नितान्तनिपुणो वक्ताऽद्वितीयो महान्
विद्वद्भूषणविज्ञमौलिरखिलानन्दः प्रधीवल्लभः ।
तस्याग्रे न च कोऽपि वादिकुशलः स्थातुं क्षमोऽजायत
स्थानं तस्य पुरं ह्यनूपशहरं पुण्यं महीयोऽभवत् ॥८१॥

मैसूराधिपतिप्रतिष्ठितबुधः कस्तूरिविज्ञाग्रणीः
रङ्गाचार्यसुधीनिषेव्यविदितस्तन्त्रेषु विद्वान् महान् ।
श्रोजिष्ठादिवचः सुधादिबहुलान् ग्रन्थान् व्यधात् पण्डित-
रत्नं तर्कविदां वरः समभवत् कश्चिद् गुणानां निधिः ॥८२॥

द्राविड्यां सुरवाचि चातिमधुरः कश्चित् प्रभावोऽधुना
चेत्येतं वरदः करोति प्रकटं स्वीयं विचारं सुधीः ।
हिन्दी-संस्कृतकोविदस्तमिलविद् भाषात्रये पण्डितो
वक्ता भातितरामलीगढपुरे श्रीविश्वविद्यालये ॥८३॥

श्रीगोवर्धननाथशुक्लसुजनः शीलश्रिया शोभितो
मन्येऽस्यामवनावभून्मनुजतामूर्तिः प्रकाशं गता ।
आचार्यर्षभवल्लभस्य विषये श्रीडॉक्टरो गौरवो-
त्कर्षोद्भूतसमुज्ज्वलाधिकशुभं कार्यं व्यधात् पावनम् ।८४॥

विद्यासक्तसरोजशर्मविनयश्रीसेविताहर्निशं
प्राज्यद्योतितराजनीतिनिपुणा साध्वीसमूहादृता ।
शीलक्षीरसरोवरस्य विनता हंसी गुणानां निधिः
सौम्याचारविचारचारुचरिता सत्यप्रकाशश्रिता ॥८५॥

विद्यावारिधियादवो व्यरचयल्लेखाननेकान् गुरून्
जाता सृष्टिरियं कथं लिखितवानित्यत्र सः कोविदः ।
वार्ष्णेये सुरवाग्विभागविशदे विद्यालये राजते
भूत्वाध्यक्षपदे ह्यलीगढपुरे वी० आर० संज्ञान्वितः ॥८६॥

शास्त्री व्याकरणे मनोज्ञसुरवाक्सेवारतः शिक्षको
गौडः कर्मठमानवेषु विदितः श्रीसोमदत्ताभिधः ।
उत्थानाय समाजगौरवगिरेर्लग्नः सदा चेतसा
गोप्ता भारतसंस्कृतेरनलसो धत्ते नितान्तं रुचिम् ॥८७॥

आचार्यादिमहोच्चमान्यपदवीसंशोभितः शीलवान्
विद्योद्दीप्तसमाजगेयचरितश्चारित्र्यचारूज्ज्वलः ।
विख्यातोऽयमलीगढ़े मुसिलमश्रीविश्वविद्यालये
विद्यादातृपदे स्थितः कृतिकृती सत्यप्रकाशाभिधः ॥८८॥

भूख्याते भुवनेश्वरे सुरुचिरेश्रीविश्वविद्यालये
वक्ता संस्कृतभारतीशुभविभस्थाने मनोज्ञे महान् ।
ए०सी० नामकडॉक्टरः शुचिमनाः सारङ्ग्युपाह्व प्रधीः
साहित्येऽथ च जर्मनीयविदिते वैदुष्यभृद् भारते ॥८९॥

शुक्लो विश्रुतलेखकः सुविदितो वक्तेतिहासप्रधीः
स्रष्टैतिह्यततेः रणेऽतिपरुषे जाते प्रवृत्ते सति ।
स्वातन्त्र्यस्य स देशभक्तमतिमान् कष्टान्यसह्यान्यपि
सेनानीः प्रथितो मुदा धृतिनिधिश्चिन्तामणिः सोढवान् ॥९०॥

विद्वान् डॉक्टरकर्णसिंहसुजनः काश्मीरभूपर्षभः
स्वातन्त्र्यं लभतेस्म भारतमही धीमान् तदा सत्वरम् ।
सम्प्रेक्ष्येति समग्रराज्यमतुलं लीनं व्यधाद् भारते
स्वाधीनश्वसने सुविज्ञजगतीमौलेर्मणिः सादरम् ॥९१॥

हिन्दूनां समुदायमद्य सबलं श्रीकर्णसिंहोऽनिशम्
उद्धर्तुं तरसा च तं समुदितं कर्तुं प्रकृष्टप्रियम् ।
स्थित्वाध्यक्षपदे नितान्तकुशलो देहेन चित्तेन च
प्रीत्यार्थेन च सर्वथा प्रयतते श्रेष्ठो मनस्वी सुधीः ॥९२॥

श्रीमद्डॉक्टरवासुदेवललितः कृष्णो हि वृन्दावने
विद्याधाम समग्रदर्शनविभाविद्योत्यमानो महान् ।
अध्यक्षः सुरवाग्विभागरुचिरे विद्यालये दार्शने
विद्वन्मौलिमणिः क्षितौ विजयते मध्ये चतुर्वेदिनाम् ॥९३॥

आचार्यो मधुरस्वभावरुचिरो वाचस्पतिर्भावुकः
प्रह्वे निर्मलमानसः शशिधरो विद्यानवद्यः प्रधीः ।
ज्ञानस्तम्भसमोऽत्र भाति सुतरां श्रेयस्करोऽस्यां भुवि
अज्ञानाख्यतमोनिवारणकृते मन्येऽवतीर्णो रविः ॥९४॥

संस्थाने ज्ञानपुरे निदेशकवरो विश्वार्चिते भारती-
संस्थाने कृतिनां गणस्तुतयशा वक्ता महाँल्लेखकः ।
आचार्यः कपिलद्विवेदि सुजनः शास्त्राब्धिपारं गतो
ग्रन्थश्रेष्ठविधायकः सुकुशलो भूमण्डले विश्रुतः ॥९५॥

स्वच्छस्वान्तो मृदुलहृदयो देववाणीबुधानां
सेव्यो विद्यावनमृगपतिः सात्त्विकैर्भावभव्यैः ।
वंद्यो विद्वद्गुरुशुचिमतिः पण्डितेन्द्रो भवानी-
दत्तः शास्त्राखिलपटुवरः सोऽभवत् पर्वतीयः ॥९६॥

विद्वद्वंद्यं त्रिदशवचसः पण्डितोपासनीयं
श्रेष्ठप्रज्ञं प्रकृतिसरलं पाठशालागुरुंतम् ।
पूजार्हं श्रीगुरुवरपदाम्भोजयुग्मातिमान्यं
नित्यं सर्वे नगरमनुजा वैद्यनाथं प्रणेमुः ॥९७॥

कृष्णानन्दं गुरुवरमिमं वन्दते सर्वभूमिः
शास्त्राचार्यं मृदुलहृदयं पूज्यविद्यापयोधिम् ।
साधुश्रेष्ठं प्रखरचतुरं न्यायविद्योत्तमायां
गङ्गाधाम्नि स्वकृतवसतिं तर्कवादप्रकृष्टम् ॥९८॥

एषा क्षोणी गुरुवरमिमं सौम्यभावप्रशस्तं
भट्टाचार्यं परममृदुलं सर्वशास्त्रप्रवीणम् ।
तीर्थं ताराचरणसुधियं शास्त्रसाहित्यहंसं
काशीविद्वत्प्रवरविदितं वङ्गरत्नं हि नौति ॥९९॥

साहित्योपवनस्य कोकिल इवाचार्यः सुधी विश्रुतो
विज्ञेन्द्रो वनमालिशास्त्रिविदितः श्रीमच्चतुर्वेदिनाम्
वर्गे ख्यातिगतो भृशं व्रजमहीसेव्यः प्रधीभूषणं
काव्योद्यानविहर्तृ शास्त्रकुशलो मान्यो महान् भावुकः ।१००॥

विद्यालोकमयः कुशाग्रधिषणः श्रेष्ठः कविर्भावुकः
आचार्यो रघुनाथसौम्यसरलो मान्यश्चतुर्वेदिनाम् ।
काव्याराधनदत्तबुद्धिहृदयश्छन्दो यदीयं प्रियं
श्लोकेऽनुष्टुपि वा रुचिः स मथुरां सम्भूषयन् राजते ॥१०१॥

औदीच्यान्वयभूषणं बुधकुलाराध्यो महीयान् सुधीः
विद्याम्भोनिधिकर्मकाण्डकुशलः सङ्गीतविद्याविदाम् ।
मान्यः पण्डितपूज्यशुक्लमथुरानाथो विनोदप्रियः
श्रीमद्वल्लभसम्प्रदायविधिविच्छिक्षाप्रदातृप्रियः ॥१०२॥

गुप्तः कोविदमैथिलीशरणभूसर्वप्रियो विश्रुतः
साकेतं कृतवान् कृतीश्च सरसाः भावोन्नतैस्तस्य च
रम्या भारतभारती भरतभूमर्त्यान् प्रबुद्धान् द्रुतम्
उत्कृष्टोत्तमकाव्यकर्तृषु कवी राष्ट्रस्य जातो महान् ।१०३॥

द्रष्टव्या यदि सन्ति भारतभुवो ग्रामाः समाजाः पुरः
संसारादृतप्रेमचन्द्ररचितान् ग्रन्थान् पठन्तु प्रियान् ।
चित्रं यत्र चकास्ति भारतजुषां सत्यं समस्तं प्रियम्
अत्रत्याखिलसंस्थितिं जनमनोवृत्तीश्च पश्यन्तु ताः ॥१०४॥

श्रीश्रीसुन्दरराजकोविदकुलालङ्कारधीनवत्कविः
आचार्योऽस्ति रसायने सहृदयः शास्त्रे सुधीः संस्कृते ।
प्राणैषीत् सरसानि काव्यविविधान्यायोगगायोजना-
संयुक्तः सचिवोविभाति भरतक्षोण्याः प्रियेशासने ॥१०५॥

विज्ञः श्रेष्ठोऽस्ति शास्त्रेऽखिलभुवि गणिते कण्णनो डॉक्टरोऽयं
मान्यो विद्वद्वरेण्यः शुचिमतिवरदाचार्यचारुस्वभावः ।
हैद्राबादेऽद्वितीयं नवलपकमवित् प्राणयत् काव्यरम्यम्
आचार्यो विश्वविद्यालयविदिततरे मातृलक्ष्मीप्रधानम् ।१०६॥

एषः साधुचरित्रतिग्मधिषणो विद्योज्ज्वलस्वान्तभृत्
श्लाघ्यां संस्कृतमञ्जुलां सुकवितां कर्तुं क्षमः सत्कविः ।
अस्मात् काव्यरसं निपीय जगती सर्वा सतां प्रीयते
विख्यातः परमेश्वरोऽय्यरकृती लोके कवीनामिह ॥१०७॥

प्रख्यातो बुधपुंगवः शुचिमनाः रामस्वरूपः सुधीः
शास्त्राणां नितरां विशाल जलधिर्मान्यो जगत्यामभूत् ।
सर्वत्रैव हृदार्चिता समभवत् प्रज्ञा तदीयाद्भुता
शास्त्री सः कृतवान् अलीगढपुरे वासं स्वकीयं शुभम् ॥१०८॥

गीर्वाणवाक्-प्रगतिवर्त्मग-सवगन्धा-
सम्पादको निशितबुद्धिसुशोभितोऽसौ
विद्वान् महान् विदितडॉक्टरवीरभद्रः
लोकेऽत्र साधु कुरुते सुरवाक्प्रचारम् ॥१०९॥

प्रसिद्धपत्रं प्रियसंस्कृतामृतं
करोति सम्पादितमोड्यधीधरः ।
प्रभाकरः शास्त्रिषु रामरत्नसद्-
सभादृतः संस्कृतसेवने रतः ॥११०॥

विख्यातं भुवि पारिजातमधुना पत्रं सुराणां गिरः
ख्यातात् कानपुरात् प्रियं सुविदितं निर्याति तन्मासिकम् ।
विद्वन्मान्यप्रकाशमित्रसुजनो मुख्योऽस्ति सम्पादकः
पत्रोक्तस्य मुदा हि डाक्टर सुधीः संसेवते संस्कृतम् ॥१११॥

आचार्यो रघुनाथशर्मसुमती रत्नाकरो भारते
शास्त्राणां बलियागते परिसरे छाताधिवासीसुधी ।
विद्वान् वाक्यपदीयविश्रुतकृतिं व्याख्यादिना भूषितां
कृत्वा सौ व्यदधाद्धितं भुवि सतां तन्वन् यशः शोभते ।११२॥

अस्माकं भारतेऽस्मिन् प्रचुरसुरवचोमेधविशुजनाः
तेषां नो सम्भवं वर्णनमिह लघुकृत्यां सर्वकृतिनाम् ।
स्वस्पाल्तस्माद् गृहीताः परमविवशताहेतोर्बुधजनाः
क्षंस्यन्ते पण्डिताः संस्कृतगिरिनिरताः स्वान्तोज्ज्वलतराः ।११३।

महात्मानः :—

दृष्टिर्यत्र समा व्यराजत शुचिज्ञानप्रभाभास्वरा
स्वर्णं लोष्ठमसौ सदैक्षत समं तस्याभवन्मानसम् ।
प्रैक्षिष्टापि यतिर्महर्षिरमणो भूतानि सर्वाण्यपि
ह्यात्मेवाखिलोकनाथभगवद्भक्तोऽर्चितः प्रज्ञया ॥११४॥

शास्त्रज्ञः करपात्रसाधुजगतीपूज्यः परिव्राजको
विद्यातीर्थसनातनस्थितमतिर्मान्यो महात्मोन्नतः ।
ग्रन्थान् शास्त्रपरान् बहून् व्यररचत् ज्ञानश्रिया द्योतितो
विज्ञाने कुशलश्च शास्त्रसरसीहंसावलीनायकः ॥११५॥

शास्त्राम्भोधिविलोडनेऽनुदिवसं प्रज्ञा यदीया रता
संगीते च रतं यदीयहृदयं सम्प्रेक्ष्यते सन्ततम्।
यस्यात्येति सतः सदैव समयः शास्त्रोपदेशामृतं
दत्त्वासौ यतिविष्णुदासभगवद्भक्तो मया नूयते ॥११६॥

इति नवभारतपुराणे संस्कृतविद्वन्महात्मनां वर्णनं नाम सप्तमोऽध्यायः।

भारतं भजामः

(श्री अरविन्दनाभ शुक्लः, मुजफ्फरनगरम्)

यस्य प्रसन्नाः सरितो विशालाः प्रोच्चैर्महीध्रा रमणीयशोभाः ।
हरन्ति चेतः प्रसभं सुराणां तद्भारतं भूतिकरं भजामः ॥१॥

यत्पूतगात्रे परिचुम्ब्य सूर्यो
ज्योतिष्मतामग्रसरो विभाति ।
तापत्रयं नश्यति यस्य नाम्ना
तद्भारतं भूतिकरं भजामः ॥२॥

यद्वक्षसि क्रीडति चन्द्रलेखा
स्नाताः प्रसीदन्ति यदप्सु ताराः ।
नीलं नभो नन्दति यत्र नित्यं
तद्भारतं भूतिकरं भजामः ॥३॥

यत्पौष्पमामोदभरं दधानः
सदागतिर्दन्तिगतं प्रयाति ।
यच्छौर्यदीप्तोऽग्निरदभ्रताप-
स्तद्भारतं भूतिकरं भजामः ॥४॥

औदार्यमन्तःकरणे यदीये
कृपाश्रुधारा विभवश्च नेत्रे ।
सर्वोदयो यद्द्रविणे विभक्त-
स्तद्भारतं भूतिकरं भजामः ॥५॥

यस्मिन्प्रसन्नानि जलानि शश्वत्
स्वादूनि वान्नानि बलप्रदानि ।
यस्मिन्नवा गीतिरनल्पविद्या
तद्भारतं भूतिकरं भजामः ॥६॥

यदर्चनार्चितमानसानां
कामाः सदा मूर्तिमहो प्रयान्ति ।
अत्यद्भुतं सौख्यभरप्रभावं
तद्भारतं भूतिकरं भजामः ॥७॥

यत्रागतानां न हि मोक्षचिन्ता
स्वर्गोऽग्रतो यस्य च को वराकः ?
यस्य क्रिया सारवती फलाढ्या
तद्भारतं भूतिकरं भजामः ॥८॥

राष्ट्रदेवते !

(डा० रमाकान्त शुक्लः, दिल्ली)

राष्ट्रदेवते ! कथं नु पूजनं करोमि ते ?
ब्रूहि देवते ! समर्चनं कथं करोमि ते ?
उग्रताविहिंसनोत्थचीत्कृतीः शृणोमि चेत्
राष्ट्रदेवते ! कथं नु कीर्तनं करोमि ते ॥
यावदाननानि हर्षफुल्लतां न चाप्नुयुः
ब्रूहि देवते ! सुमार्पणं कथं करोमि ते ॥
दन्दशूकवेष्टितं हि कार्यतन्त्रमस्ति चेत्
चन्दनं कथं समर्पयामि राष्ट्रदेवते ॥
वीक्ष्य कर्दमावृता हि कोटि-कोटिवीथिकाः
राष्ट्रदेवते ! कथं सुगन्धमर्पयामि ते ॥
सौमनस्यसूत्रगुम्फिता न चेत्स्थिता जनाः
राष्ट्रदेवते ! कथं सुमाल्यमर्पयामि ते ।
राष्ट्रदेवते ! कथं नु हारमर्पयामि ते ॥
पेयवारि दृश्यते यदा च वै सुदुर्लभं
स्नानवारि पावनं समर्पयामि किं नु ते ॥
हा ! वधूप्रदाहचीत्कृतीर्निशम्य नित्यशः
स्तोत्रमापठामि ते कथं नु राष्ट्रदेवते !
द्वेषकृत्प्रभंजनो हि यावदेति नो शमं
दीपकं कथं प्रदर्शयामि राष्ट्रदेवते !
एकलोऽपि वीक्ष्यतेऽन्नपीडितो मया यदि
राष्ट्रदेवते ! कथं नु भोज्यमर्पयामि ते !
वर्धते धनं हि, किन्तु निर्धनेषु तन्न चेत्
राष्ट्रदेवते ! कथं नु दक्षिणां ददामि ते ॥
मिष्टमर्पितं पुरैव 'भाति भारतं' हि ते ।
यन्मया कटूक्तमत्र तत्क्षमस्व देवते !

ज्योत्स्ना मेघासनमधिशयिता !

(डा० उमाकान्त शुक्लः, मुजफ्फरनगरम्)

रोचन्ते कैरव - रणरणका जृम्भन्ते ता मधुकर रचनाः ।
कुन्दे कुन्दीभवति मुकुलिता ज्योत्स्ना मेघासनमधिशयिता ॥१॥

मेघो विद्धः शतशितकिरणैश्चन्द्रेणाच्छादितधरणितलैः ।
शूले शूलीभवति च निशिता ज्योत्स्ना मेघासनमधिशयिता ॥२॥

पर्णे पर्णे वितरितविभवाश्चञ्चन्त्येतेऽञ्चितगतिपवनाः ।
शैले शैलीभवति समुदिता ज्योत्स्ना मेघासनमधिशयिता ॥३॥

लोक्यन्ते भाविनि भुवि पतिता लाजापूगाः शशिरुचिविहगाः ।
तीरे तीरीभवति तरलिता ज्योत्स्ना मेघासनमधिशयिता ॥४॥

अद्रौ रासं रचयति तरसा मेदिन्यां खेलति सखि सरसा ।
सिन्धौ सिन्धूभवति पुलकिता ज्योत्ना मेघासनमधिशयिता ॥५॥

नेपथ्यान्यारचयति विविधं शैलूषीवाचरति च निभृतम् ।
गीते गीतीभवति सुललिता ज्योत्स्ना मेघासनमधिशयिता ॥६॥

रम्यं गेया स्वर-लय-ललितै रक्तैः कण्ठैः सरगमपधनैः ।
ताले तालीभवति निपतिता ज्योत्स्ना मेघासनमधिशयिता ॥७॥

राकाऽऽरामे विहसति समदा वाचालेवाह्वयति शरणदा ।
तूले तूलीभवति विगलिता ज्योत्स्ना मेघासनमधिशयिता ॥८॥

त्व शेषे जाग्रति मधुमधुराः प्रौढानन्दा निधुवननिनदाः ।
काशे काशीभवति विकसिता ज्योत्स्ना मेघासनमधिशयिता ॥९॥

शङ्के राधा रमयति दयितं कुञ्जे कृष्णं ननु विपरीतम् ।
हंसे हंसीभवति धवलिता ज्योत्स्ना मेघासनमधिशयिता ॥१०॥

मौनं मुञ्चाद्य वितर वचनं धम्मिल्ले दापय नवकुसुमम् ।
हारे हारीभवति विलुलिता ज्योत्स्ना मेघासनमधिशयिता ॥११

शुक्लोमाकान्तभणितिवलितं जीव्यादेतद् भ्रमरविलसितम् ।
स्फीतं त्वामुत्किरति परिणता ज्योत्स्ना मेघासनमधिशयिता ॥१२॥

इह तमसां राज्ये

[डा० लीना रस्तोगी, उमरेड (नागपुरम्)]

इह तमसां राज्येऽन्धीभवति चेतना ।
करणीयं किमिति न परिचलति कल्पना ।।

पाट्वमिति यत्र धूर्तता हि संज्ञिता,
शिष्टानामाचारश्चाटुकारिता
पाण्डित्यं केवलमिह दर्पजल्पना
इह तमसां राज्येऽन्धीभवति चेतना ।।१।।

प्राञ्जलिता ह्येव यत्र भवति नु हास्या
ज्ञानदानमपि हि यत्र भवति वणिज्या
हास्यास्पदतामुपैति सत्यसाधना
करणीयं किमिति न परिचलति कल्पना ।।२।।

शमस्थापनार्थमत्र शस्त्रनिर्मितिः
सेतूनां केवलमिह पुस्तके स्थितिः
ग्रामाणामुद्धारे सिंहगर्जना
इह तमसां राज्येऽन्धीभवति चेतना ।।३।।

जीवनं हि नाम, प्रश्नचिह्नवत् स्थितं
पूर्णविरामं प्राप्तं हृदयचेष्टितम्
चेतनैव सञ्जाता विधिविडम्बना
इह तमसां राज्येऽन्धीभवति चेतना ।।४।।

दंश-वेदना

(डॉ॰ भास्कराचार्यः त्रिपाठी)

अद्य दुर्विधं विवर्त-धारया तरामि रे
वृथा कटि-लग्न-दारुकं परामृशामि रे ।
हन्त कज्जलं पिबामि, शून्य चेतसा भ्रमामि
किं वा बालुकासु वक्त्रकं निमीलयामि रे
परं कतर-पिपासया पलं नयामि रे
नूनं व्रणितगलेन वाक्छलं वहामि रे।

मज्जिता तरी कदा न वेद्मि सख्यसंविदा
विलोलदिङ्मुखी हसत्यसौ पुरस्कृतापि रे
सद्यो रोमकीलितं स्वमन्दिरं दशामि रे
निजनाम-रूपसम्पदो मृशं शपामि रे ।
यामितः समाश्रयम्, विमुक्तयातनाभयम्
इयन्तु वंवमीति सैव शिला वह्निचयं रे
खेलद्-वीचिमालिकासु बाडवं स्पृशामि रे
वृथा विस्मयेन लुप्तदर्शनो हसामि रे ।

फूत्करोति डुण्डुभः प्रलम्बशैवल - प्रभः
कपोतकर्बुरञ्च कृन्ततीव सान्ध्यनभो रे
मेघ-मालिकासु चित्रदुर्लिपिं पठामि रे
प्रकाशकीटकेषु चाटुगीतकं रटामि रे ।
नवीन-शक्र-वीथिका विभाति नक्र-वीथिका
कथन्नु तर्जयन्ति तन्तुजाल-भङ्गकथा रे
स्वप्नलालितोऽपि दंशवेदनं वहामि रे
ननु शोणितव्ययेन भूर्जकं लिखामि रे।

मुक्तकानि

(डा० रमेशकुमार लौ, मुजफ्फरनगरम्)

देवः स एको हृदि संनिविष्टो
दिवानिशं वेत्ति यदीहितं मे।
अद्यापि विघ्नैर्यदि बाध्यते तत्
प्रभोः प्रसादः किमु चिन्तया स्यात् ॥

सरसि कृतविहारो राजहंसः सुखेन
जलधर-रव-खिन्नस्त्यक्तप्रीतिः प्रयाति।
इह विहितसपर्या सज्जना भ्रान्तिबद्धा
उपकृतिमपि हृद्यामन्यथा भावयन्ति ॥

निद्रे! त्वमसि कृपणा, विशेषतो मे इति चिन्तयामि।
किमन्यथा त्वदधीनो जनस्तु दृश्यो दिवापि बहुधा।
सम्पादक नमस्तुभ्यं लोकाराधनतत्पर !
लेखनीबलसम्पन्नः सर्वत्रैव विराजसे ॥

त्वं किं न वा वितनुषे जनताहिताय
गोप्यं यदेव ध्रियते प्रकटीकरोषि
दूरान्नु वृत्तमपि सञ्चितमादधासि
साक्षात् करोषि नृपनीतिमचिन्त्यरूपाम् ॥

हुतात्मानः कथं न स्युर्वन्दनीयाः सदा सताम् ॥
आत्मनैव समिद्धोऽग्निर्यैरद्यापि प्रकाशते ॥
सतां स्वत्वपरित्यागः सुखायैव न सर्वदा।
वर्षादाने प्रवृत्तोऽपि जलदो नाभिनन्द्यते ॥

क्व कालिदासस्य जगाम भारती !

(डॉ० बच्चूलाल अवस्थी, सागरः)

अनुल्वणस्फीतरसस्फुरत्पदा सदर्थसारप्रसवा पुनर्नवा ।
विविक्त-निर्व्याज-विनिक्त-विग्रहा क्व कालिदासस्य जगाम भारती ।।१।।

दिलीपता लोकहितप्रतारिणी
सुदक्षिणा हन्त करप्रसारिणी ।
वसिष्ठतानर्गल-लाभ-लुण्ठना
क्व नन्दिनी वृत्तिरवैतु निर्वृतिम् ।।२।।

गता सदालम्बन-निर्मला रति-
र्मृतं च लावण्यचमत्कृतं मनः ।
कवेत किं साधननिर्धनः कविः
स्वदेत कस्मै रसिकाय किं वचः ।।३।।

उपोषिताक्षी न पतिं प्रतीक्षते
न चुम्बति प्रस्नुवती स्तनन्धयम् ।
बताङ्गना भुग्नतनुर्वृकानना
न नाद्य दुःखाकुरुते मनस्विनः ।।४।।

महार्हशय्यास्वपि दूयते स्म या
क्व साद्य गौरीशिखरे तपस्विनी ।
अधीतिनी धीरमना धृतव्रता
निबद्धबालारुण-बभ्रु-वल्कला ।।५।।

क्व गात्रयष्टेः स्तनभारनम्रता
तपोभिरक्लिष्टजयं क्व यौवनम् ।
अपापवृत्ति क्व च रूपवैभवं
प्रियेषु सौभाग्यफला क्व चारुता ।।६।।

वरं विरञ्ची रचयांचकार य-
न्निसर्गनिश्च्योतितरूपसम्पदा ।
विलोक्य तत् स्त्रैणमरक्षितं पथि
प्रजानतः किं न मनो हृणीयते ।।७।।

उतस्विदास्तां बहु वादजल्पनं विकल्पनं तावदमुष्य तिष्ठतु ।
कुतः फलानीह कुतश्च पल्लवाः समूलघातं हत एव पादपः ।।८।।

सा गीर्वाग् रमतां सदा मम मनः

(कु० सुस्मिता शुक्ला, मुजफ्फरनगरम्)

काश्यां क्रीडति या शिवार्चनपरा, वाचां परा या विभा
काश्मीरेषु च मोदते सह सदा वागीशया या हृदा।
सर्वत्रापि कृतैकरम्यवसतिर्दिल्ल्यां पुनः प्रोज्ज्वला
सा गीर्वाग् रमतां सदा मम मनः क्रोडे सुरैः सेविता॥

कालातीतः

(डा० सी०आर० स्वामिनाथः, दिल्ली)

कालातीतः सर्वकाराधिकारी
वृद्धा वेश्या दुग्धदोहा च धेनुः।
निःस्वो दाता वारिहीनश्च मेघः
सेव्यन्ते यैस्ते हि दुःखं भजन्ते॥
"धीमानयं गुणनिधिर्बहुकार्यदक्षः
लोकप्रियः कविवरो निरवद्यशीलः।"
इत्थं जनः कथयतिस्म पुरा त्विदानी-
मासन्दिना सह गुणाश्च मयोज्झिता किम्?॥

कविर्मानवश्च

(डा० रामसुरेश पाण्डेयः दिल्ली)

तुलना कविभिः साकं, कवीनां यन्न साम्प्रतम्।
अ न्वयोऽप्यलंकारः, कविभ्यो जायते मुधा॥
कविमानवयोर्भेदं, जोषं जानन्तु तत्त्वतः।
कविर्यः श्रावयत्येव, मानवस्तु शृणोत्यपि॥

देववाणी-परिषद्वार्ता

(१) परिषदो दशमः स्थापनादिवसः सम्पन्नः

१३-१२-१९८५ ई० तारिकायां देववाणी-परिषदो दशमः स्थापनादिवसः सम्पन्नोऽभूत् । अस्मिन्नवसरे 'अक्षरश्लोक'-कार्यक्रम आयोज्यत । किञ्च बालनाट्यकलाकारेभ्यः परिषन्महासचिवेन पुरस्काराः प्रदत्ताः ।

(२) अखिलभारतीयं संस्कृतकविसम्मेलनं संस्कृतनाट्यसमारोहश्च

देववाणी-परिषदा २९-१२-१९८५ ई० तारिकायां दिल्लीविश्वविद्यालयस्य टैगोरसभागारे अखिलभारतीयसंस्कृतकविसम्मेलनस्य नाट्यसमारोहस्य च समायोजनं कृतम् ।

संस्कृतनाट्यसमारोहे कालिन्दीकालेजस्य छात्राभिः 'कीचकवधम्' इत्येतन्नामधेयं नाटकं श्रीबलदेवानन्दसागरस्य निर्देशने प्रयुक्तम् । नाटकमिदं पं० ओगेटिपरीक्षितशर्मविरचितस्य 'नर्तनशाला' नामनाटकस्य सक्षिप्ता प्रस्तुतिरासीत् । इतः पूर्वं ९-१२-१९८५ तारिकायां 'गुडविल पब्लिक स्कूल' संस्थायाश्छात्रैः पञ्च बालनाटकानि संस्कृतनाट्यसमारोहक्रमे प्रस्तुतान्यासन् ।

नाट्यसमारोहस्य प्रारम्भः काशीहिन्दूविश्वविद्यालयस्य प्राच्यविद्याधर्मविज्ञान-संकाये साहित्यविभागाचार्यं डा० रेवाप्रसादद्विवेदिमहाभागेन रङ्गदेवतायै माल्यार्पणेन कृतः । नाट्यकलाकारेभ्यः पुरस्काराः उज्जयिनीस्थविक्रमविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण श्रीश्रीनिवासरथमहाभागेन समर्पिताः ।

अखिलभारतीयसंस्कृतकविसम्मेलनस्य शुभारम्भः श्रीछोटेलालस्य निर्देशने सङ्गीत-प्रतिभाविकास-परिषत्कलाकारैः प्रस्तुतया भारती-सुरभारती-वन्दनयाभूत् ।

अन्ताराष्ट्रिकस्य युववर्षस्य समापनवेलायाम् आयोजिते अखिलभारतीयसंस्कृतकविसम्मेलने मुजफ्फरनगरतः समायाता कुमारी सुस्मिता शुक्ला स्वकाव्ये देववाण्या जयघोषं चकार, तत एव समायातो युवा कविः श्रीअरविन्दनाभ शुक्लो भारतस्य गौरवं स्वरचनायां समुन्मीलयामास, नेपालत सम्प्राप्तेन कविरत्न श्रीकृष्णप्रसादघिमिरे-महाभागेन गौरीगिरीशगीतकाव्यस्य अंशाः प्रस्तुताः, युवा कविः श्रीबलदेवानन्दसागरः पण्डिताष्टकं प्रस्तुवन् शिक्षा जगतः

दुरवस्थां संकेतयामास, इलाहाबादतः समागतेन डा० हरिदत्तशर्मणा विप्रल... गीतं प्रस्तुतं, डा० शङ्करदेव अवतरे नारीगीतं प्रस्तुतवान्, डा० नित्यानन्द... वर्तमानकालिकदुर्वृत्तीः अभिलक्ष्य रचनां प्रास्तावीत्, डा० रमेशकुमार... सम्पादकस्य महिमानं गीतवान्, डा० रामसुरेशपाण्डेयः कविमानवयोस्तुलना... करोत्, डा० सुरेन्द्रनारायणत्रिपाठी कनिष्कदुर्घटनां लेखबद्धां चकार, कवि... श्रीकृष्णसेमवालेन अन्योक्तयः प्रस्तुताः, डा० श्रीकृष्णलालनादानेन मान... महत्त्वं चित्रितं, डा० सत्यपालनारङ्ग अनुरणनात्मकशैल्या काव्यं समुपस्था... मास । कविसम्मेलनस्य प्रथमसत्राध्यक्षेण डा० सत्यव्रतशास्त्रिमहाभा... क्यूबिघननगरस्य शोभा पद्यैः वर्णिता । द्वितीयसत्रस्य अध्यक्षतां कुर्वा... श्रीश्रीनिवासरथमहाभागेन महानगराणाम् कोलाहलमयी स्थितिर्व... अथ च ज्ञानविज्ञानयोः समन्वय आकांक्षितः । डा० भास्कराचार्य त्रिपाठि... भारतस्य सुषमा उपवर्णिता । डा० रेवाप्रसादद्विवेदिना श्रीलालबहा... शास्त्रिणमधिकृत्य काव्यं प्रस्तुतं, डा० उमाकान्त शुक्लेन मेघासनमधिशयित... ज्योत्स्नाया रम्यता आलेखिता, श्री विष्णुकान्तशुक्लेन युववर्षे यूनां मनो... हास्यव्यङ्ग्यगीतरचनायां मुखरीकृता, डा० कृष्णकान्तशुक्लेन आर्यामुक्तक... प्रस्तुतानि, डा० रमाकान्त शुक्लेन राष्ट्रदेवतामभिलक्ष्य प्रश्नाः प्रस्तु... डा० रुद्रदेव त्रिपाठिना शिवंपार्वत्योर्विनोदपूर्णः संवादः समुपन्यस्तः, डा०... आर० स्वामिनाथेन कालातीतस्य सर्वकाराधिकारिणः दशा उपवर्णि... पण्डित आगेटिपरीक्षितशर्मणा प्रणयगीतानि प्रस्तुतानि, डा० लीना रस्तो... वर्तमानसमाजस्य: विकृतीः प्रस्तुतवती ।

अस्मिन्नवसरे डा० सी० आर० स्वामिनाथमहाभागेन सङ्गीतकला... सत्कृताः । देववाणी-परिषदः कार्यवाहकाध्यक्षेण डा० उमाकान्तशुक्लेन कवि... स्वागतं कृतम् ।

समारोहावसरे 'काव्याञ्जलि' शीर्षका एका स्मारिकापि प्रकाशिता जा...

२९-१२-१९८५ तारिकायामायोजितस्यास्य अखिलभारतीयसंस्कृत... सम्मेलनस्य केचन अंशा आकाशवाण्या दिल्ली-केन्द्रात् १३-१-१९८६ तारि... रात्रौ ११-१० वादनतः १२-०० वादनं यावत् दिल्लीदूरदर्शनकेन्द्र... ३०-१-१९८६ ई० तारिकायां सायं ७-०० वादनतः ७-३० वादनं याव... रिताः ।

—रमा शु...

संस्कृतजगद्वार्ता

अहमदाबादे अखिलभारतीयप्राच्यविद्यासम्मेलनम्

६-८.११.१९८५ तारिकासु अहमदावादस्थगुजरातविश्वविद्यालये अखिल-भारतीयप्राच्यविद्यासम्मेलनस्य द्वात्रिंशत्तमधिवेशनं सम्पन्नम् ।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयविद्वत्परिषन्निर्वाचनम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विद्वत्परिषदः दश स्नातकसदस्याः निर्विरोधं निर्वाचिताः । देववाणी-परिषदः प्राक्तनाध्यक्षो डा० कृष्णकान्त शुक्लोऽप्येतेष्वन्यतमः । सर्वेऽप्येते सदस्याः वर्धाप्यन्ते ।

मध्यप्रदेशसंस्कृताकादम्याः 'समन्वय' समारोहः

मध्यप्रदेशसंस्कृत-अकादेम्या २५-२६.१.१९८६ ई० तारिकयोः 'समन्वय'-समारोहः समायोजितः । समारोहस्योद्घाटनं मध्यप्रदेशस्य मुख्यमन्त्रिणा श्रीमोतीलालवोरामहाभागेन कृतम् । तेन अकादेम्या 'दूर्वा' नाम पत्रिकायाः प्रवेशांकोऽपि समुन्मीलितः । तेन डा० भगवतीलालराजपुरोहितमहाभागाय 'भोजराज'-पुरस्कारोऽपि समर्पितः ।

समारोहेऽस्मिन् तिसृषु गोष्ठीषु नैकेषां विदुषामालेखपाठाः, कलापद्म-भरतनाट्य-अकादमी - कलाकारैः गीर्वाणनाट्यम्, 'व्यञ्जना' नाम संस्कृतकवि-सम्मेलनं च समायोज्यन्त ।

रायपुरसम्भागीयसंस्कृतपरिषदः कालिदास समारोहः

रायपुरसम्भागीयसंस्कृतपरिषदा १९-२४-१-१९८६ तारिकासु कालिदास-समारोहः समायोजितः ।

उज्जयिन्यां कालिदास-समारोहः

उज्जयिन्यां २३-२९.११.१९८५ तारिकासु अखिलभारतीयकालिदास समारोहः सम्पन्नतां गतः । मध्यप्रदेशशासनस्य कालिदाससमारोहसमित्या-स्तत्त्वावधाने उज्जयिनीस्थकालिदास अकादेमी-विक्रमविश्वविद्यालयाभ्यां सप्तदिवसीयस्यास्य समारोहस्यायोजनं कृतम् ।

२३-११-८५ तारिकायां समारोहं समुद्घाटयता भारतस्य महामहिम-राष्ट्रपतिना श्रीज्ञानीजैलसिंहमहाभागेन सर्वासु भाषासु अल्पमूल्येनैव कालिदास-कृतीनामनुवादानांमौलभ्यस्यावश्यकता रेखांकिता ।

गोरखपुरे मण्डलीयं संस्कृतसम्मेलनम्

१३-१५.२.१९८६ ई० तारिकासु गोरखपुरे उत्तरप्रदेशसंस्कृत-अकादमी-साहाय्येन गोरखपुरविश्वविद्यालयीयसंस्कृतविभाग - नागार्जुनबौद्धप्रतिष्ठान-विश्वसंस्कृतप्रतिष्ठान-संस्कृतसेवासंस्थानां तत्त्वावधाने मण्डलीयं संस्कृतसम्मेलन-मायोज्यते यत्र निखिलभारतीयसंस्कृतकविसम्मेलनादिकार्यक्रमा आयोज्यन्ते-इति सूचयति संयोजको डा० करुणेश शुक्लः ।

(रमा शुक्ला)


21वीं सदी की ओर
ज्ञान-विज्ञान की नई मंजिलें
कम्प्यूटर युग की हलचलें
सागर की गहराइयों में हमारे कीर्तिमान
अंतरिक्ष में उड़ते यान, अंटार्कटिका के सफल अभियान।
एक महापरिवर्तन, हरेक मोड़ पर
हमारी प्रतीक्षा करता हुआ......
एक नई क्रान्ति दरवाजे पर दस्तक देती हुई....
हमें तत्पर रहना है इसके स्वागत के लिए।
अवश्य ही विज्ञान और उद्योग से
हम दूर करेंगे—गरीबी और अन्य समस्याएं....
और बढ़ते चलेंगे
हम सब मिल कर आगे ही आगे
davp 85/418



संस्कृत-नाट्यसमारोहः 'कीचकवधम्' २६-१२-१९८५

अष्टमाखिलभारतीयसंस्कृतकविसम्मेलनस्य सत्रद्वयम्   २६-१२-



संगीतनिर्देशकः श्रीछोटेलालः विशिष्टातिथिना डा० शास्त्रपुरम् रामकृष्णस्वामिनाथेन सम्मान्यते

↓ 'कीचकवध'-नाटककलाकाराः २९-१२-१९८५

उज्जयिन्यां कालिदास-समारोहः
(२३—२९-११-१९८५)



↑ कालिदास-अकादमी-भवने 'अश्वघोष-कालिदास'-संगोष्ठ्यां विमृशन्तः (वामतो दक्षिणम्) डा० कमलेशदत्त त्रिपाठी, प्रो० रेवाप्रसाद द्विवेदी, प्रो० वि० वेंकटाचलम्, डा० रामचन्द्र तिवारी (२५-११-१९८५)



↑ विक्रमकीर्तिमन्दिरे समापनसमारोहे (वामतो दक्षिणम्) मुख्यातिथिः श्रीजैनेन्द्रकुमारः (भाषमाणः) कालिदास-समितिसचिवः श्री श्रीनिवास रथः, कालिदास-अकादमी-सञ्चालको डा० कमलेशदत्त त्रिपाठी, समारोहाध्यक्षः श्री राहुल बारपुते, जिलाधिकारी श्रीप्रकाशचन्द्रः, अभ्यागत-विद्वत्प्रतिनिधिः डा० रमाकान्त शुक्लश्च ।

अर्वाचीनसंस्कृतम्

(R.N. 34554/79)

★

१. प्रकाशन का स्थान	नयी दिल्ली
२. प्रकाशन की आवधिकता	त्रैमासिक
३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
४. सम्पादक का नाम, राष्ट्रीयता तथा पता	डा० रमाकन्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्र तशत से अधिक के हिस्सेदार हैं	देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नई दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद, दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिता ग्रन्था:

१. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु०
२. भाति मौरीशसम् (डा० रमाकान्त शुक्लः) रु०
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्) रु०
४. श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः) रु०
५. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु०
६. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु०
७. आभाणकमञ्जरी („ „) रु०
८. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु०
९. रघुवंश : एक विश्लेषण („ „) रु०
१०. अभिज्ञानशाकुन्तल : एक विश्लेषण („) रु०
११. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु०
१२. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („) रु०
१३. „ „ „ (द्वितीय खण्डः) („) रु०
१४. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु०
१५. अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः) रु०
१६. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु०
१७. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु०
१८. संस्कृत साहित्य में राष्ट्रिय भावना
(डा० हरिनारायण दीक्षित) रु० १५०
१९. साधारणीकरण और समानान्तर चिन्तन
(डा० मुलेखचन्द्र शर्मा) रु०
२०. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु०
२१. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु०
२२. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु०
२३. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु०
२४. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु०
२५. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु०
२६. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु०
२७. सुरश्मिकाश्मीरम् („) („) रु०
२८. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु०
२९. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु०
३०. महाप्रयाणम् (श्रीकृष्ण सेमवालः) रु०
३१. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु०

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५८

अर्वाचीनसंस्कृतम्

(अष्टमवर्षे द्वितीयोऽङ्कः)

१५ अप्रैल १९८६

सम्पादक :

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली - ११००५९

अर्वाचीनसंस्कृतम् (८/२)

विषय-सूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्	सम्पादकः	१०३
२. देशरक्षा कथम् ?	(पं० विष्णुकान्त शुक्लः, सहारनपुरस्थ-जे०वी० जैन कालेजे हिन्दी-विभागाध्यक्षः)	१०४
३. विमानवातायनतः	(डा० प्रभाकरनारायण कवठेकरः, इन्दौरः)	१०५-१०६
४. नवभारतपुराणम (८—११ अध्यायाः)	(आचार्य रमेशचन्द्र शुक्लः, ए १/२०३, जनकपुरी, नई दिल्ली)	१०७-१७२
५. श्रीनिवासरथाभिनन्दनपत्रम्	(डा० भास्कराचार्य त्रिपाठी भोपालः [म०प्र०])	१७३-१७४
६. देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता	(रमा शुक्ला)	१७५-१७६

पाठकैः ११५—१३० संख्यकेषु पृष्ठेषु ११७—१३२ पृष्ठसंख्या कार्या ।

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20.00 (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नई दिल्ली-११००५९' तः प्रकाशितम्- अर्वाचीनसंस्कृतम (८/२) प्रधानसम्पादकः—डा० रमाकान्तशुक्लः । प्रकाशनतिथिः १५.४.१९८६ ।

सम्पादकीयम्

अथायं प्रस्तूयते 'अर्वाचीनसंस्कृत'स्य अष्टमवर्षीयो द्वितीयोऽङ्कः । अस्मिन्नङ्के मुख्यत आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतस्य 'नवभारतपुराण'स्य चत्वारोऽध्यायाः प्रकाश्यन्ते । सप्ताध्यायाः पूर्वस्मिन्नङ्के प्रकाशिता आसन् । तदङ्कप्रकाशनानन्तरं सप्तमाध्यायस्य परिशिष्टरूपेणाचार्यशुक्लैः अन्यान्यपि कानिचित्पद्यानि विरचयितुमिष्टान्यासन् किन्तु १९८६ तमेशवीयाब्दस्य फरवरी-मार्चमासयोरत्यन्तं रुजाक्रान्तत्वात्तैरधिकं किमपि लेखितुं नापार्यत । अस्मिन्नेवान्तराले प्रस्तुतस्याङ्कस्य मुद्रणं प्रारब्धम् । आचार्यशुक्लैस्तदवधि श्लोकद्वयमेव विरचितमासीत् तद्यथा —

विद्वान् गाडगिलो वसन्तमतिमान् सम्पादकः शारदा-
नाम्न्याः विश्वपरोपकारहृदयः सः पत्रिकाया इह ।
शास्त्रज्ञोऽस्ति सतां मतोऽखिलभुवो मेधाविनामादृतः
सेवायां सुधियोऽनिशं सुरगुरो व्यत्येत्यनेहा मुदा ॥
काशीवासो मनीषी बुधवरभुवनख्यातमान्यो विपश्चित्
काव्यं सीताचरित्रं करुणरसमयं तस्य काव्योत्तमेषु ।
लोके विद्वज्जनानामखिलमपि कुले प्रीणयद्राजतेऽद्य
नानाग्रन्थप्रणेता कविषु सुविदितो भाति रेवाप्रसादः ॥

एतत्पद्यद्वयं पाठकैः नवभारतपुराणस्य सप्तमाध्याये परिशिष्टरूपेण योजनीयम् । आचार्यशुक्लमहाभागानां विचार आसीद्यत् सप्तमाध्याये वर्णितानां समकालीनसंस्कृतविदुषां सूची पर्याप्तं वर्धयितुं शक्यते । आशासे, समकालीनसंस्कृतविदुषां कवीनां च पद्यबद्धं परिचयं केऽप्यन्ये रचनाकारा विद्वांसश्च प्रदास्यन्ति ।

नवभारतपुराणातिरिक्तमस्मिन्नङ्के रचनात्रयमन्यदपि प्रकाश्यते । राष्ट्रपतिपुरस्कृतैः डा० प्रभाकरनारायणकवठेकरमहाभागैः विमानवातायनतो यदपि दृष्टम् तद्वर्णितम्, पं० विष्णुकान्तशुक्लमहाभागैर्देशस्य साम्प्रतिक्यः समस्याः संकेतिताः, डा० भास्कराचार्यत्रिपाठिमहाभागैराचार्यश्रीश्रीनिवासरथ महाभागानां व्यक्तित्वं वर्णितम् ।

अर्वाचीनसंस्कृतस्याग्रिमेऽङ्के श्रीकेशवचन्द्रदाशप्रणीतस्य 'निकषा' नामलघूपन्यासस्य प्रकाशनं भविष्यति । पाठका यथाकालमङ्कावाप्त्यै प्रतीक्षन्ताम् ।

विदुषामाश्रवः

१५.४.१९८६
६ वाणी-विहारः
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

देशरक्षा कथम् ?

(पं० विष्णुकान्त शुक्लः, सहारनपुरम्)

स्वेच्छया शोभराजस्तिहाडाद्गतो, रक्षिभिर्मोह-मैरेयमास्वादितम्।
दृश्यते दुष्कृतीनां समाराधनं, देशरक्षा कथं हा सुरक्षा कथम् ?॥

हाऽद्य पञ्जाबराज्ये सतां हिंसनं, शिष्यपापैर्गुरोगौरवं नाशितम्।
फूत्करोति क्षुधेदं सुधायाः सरो, देशरक्षा कथं हा सुरक्षा कथम् ?॥

स्वर्णगेहाजिरे धूर्तसरक्षणं वेशतः केशतो मानवेष्वन्तरम्।
मानवो दानवेन्द्रायते प्रत्यहं देशरक्षा कथं हा सुरक्षा कथम् ?॥

अग्निकाण्डे वधूर्दह्यते शोभना, तापमाप्नोति नो तत्पतिहस्तयोः।
सर्वमुत्कोचसाफल्यमालक्षितं, देशरक्षा कथं हा सुरक्षा कथम् ?॥

योऽभियन्ता स एवापहर्त्ता वसोः, कीदृशीयं बुभुक्षा न शान्तिं गता।
योऽपि मन्त्री स एवार्थकोषः स्वयं, देशरक्षा कथ हा सुरक्षा कथम् ?॥

दूषिता जाह्नवी धेनवो नाशिताः पालिताः कुक्कुटाः कुक्कुरा शूकराः।
लुण्ठकास्तस्कराः कञ्चुके सवृता, देशरक्षा कथं हा सुरक्षा कथम् ?॥

कृत्रिमं जीवनं कृत्रिमा ह्योषधी, कृत्रिमं भोजमं, कृत्रिमं तत्पयः।
प्राप्यते नो विशुद्ध विषं का कथा जीवनस्य स्वदेशस्य रक्षा कथम् ?॥

प्रत्यहं कार्यरोधो विरामस्तथा, दृश्यते हिंसनस्यैव विस्फूर्जितम्।
नित्यनूत्नैः करैः पीडिताश्चेत्प्रजाः, देशरक्षा कथ हा सुरक्षा कथम् ?॥

शाहबानो न नारी परा भावना विद्यते मानसेषु प्रबुद्धा सदा।
त्राससंत्रासबद्धा यदा सा तदा देशरक्षा कथं हा सुरक्षा कथम् ?॥

एकलव्यो गरून् याचते वैभवं, चन्द्रमा जीवनारीं पुनः पश्यति।
नो पुरस्कारमाप्नोति शीलाकृतिर्ब्रू हि बन्धो ! तदा देशरक्षा कथम् ?॥

संस्कृतिः सा गता संस्कृता वाग्गता तद् ऋतं चामृतं क्वापि दूरे गतम्।
सिंहवृत्तिर्हता यत्नतः पूजिता सा श्ववृत्तिः सदा देशरक्षा कथम् ?॥

सत्यवादादभयं धर्मवादादभयं संस्कृतिः सम्प्रदायस्य रूपान्तरम्।
धर्मशास्त्राणि मोहप्रदानीति धीर्नेतुरुत्पद्यते देशरक्षा कथम् ?॥

वायुयाने भयं रेलयाने भयं वारियाने भयं राजमार्गे भयम्।
भीतिसंत्रासकाले नराणां भयं सर्वतो लक्ष्यते देशरक्षा कथम् ?॥

विमानवातायनतः

डा० प्रभाकरनारायण कवठेकरः, इन्दौर)

विमानवातायनवीक्षणीयं
महीतलं मोहयति प्रसन्नम् ।
केदारखण्डा हरितास्तथैव
वक्रा नदीनां तनुतोयरेखाः ॥१॥

किं सर्पिणी मन्त्र-विलुप्त-वीर्या
नदी नगानां परितो विभाति ।
बालेन केनाप्यथवा विसृष्टा
मध्येऽङ्गणं खेलपरेण रज्जुः ॥२॥

किंवा धृता मुक्तलता पृथिव्या
मार्गोऽथवा किं वनदेवतायाः ।
द्यावा-पृथिव्योर्नु विवाह-सूत्र—
मालेयमद्यापि विलक्ष्यतेऽत्र ॥३॥

जनैर्विहीने वनमात्रलक्ष्ये
विमानदृश्यं हि विलोभनीयम् ।
काचिन्नदीयं पुलिनैकवस्त्रा
गृह्णाति बालार्ककरान् स्तनाग्रे ॥४॥

नदी - कटी - लग्न - विमुग्ध - सेतुः
नितम्बलम्बी कटिभूषणाभः ।
स्वैरं प्रयान्त्या अभिसारिकाया
मुखं चिरं चुम्बति सुप्रियोऽयम् ॥५॥

दृष्टः क्वचित् पर्वतराजिमध्ये
जलावरोधो जलकुम्भरम्यः ।
प्रियो दुकूलं वनदेवतायाः
स्रस्तं नितम्बात् पुनरावृणोति ॥६॥

स्रोतो न, हारो वनदेवतायाः
कण्ठेऽर्पितो भूधर-सङ्गतायाः ।
श्रोणीमिवैनां गिरिश्रेणिरेखाम्
संस्पृश्य सौख्यं लभतेऽत्र मेघः ॥७॥

देवेन्द्रमातङ्ग इवाभ्रखण्डो
विभिन्न रूपोऽत्र पुरः स्थितोऽयम् ।
तदन्तरं सूचिमुखेन यानं
प्रविष्टमुद्वेलितमभ्रवातात् ॥८॥

विमान - बाला - विनिवेदितोऽहम्
बध्नामि पट्टेन कटिं मदीयाम् ।
मेघे प्रविष्टा रविरश्मयस्ताः
दृष्टाश्च वक्राः शतधा विशीर्णाः ॥९॥

संगोप्य विद्युद् हृदयेऽपि शान्तः
मरुत्सखोऽपि स्थिरतामवाप ।
रसान्वितोऽयं गिरि - राजि - लग्नो
बभूव दृष्ट्वा निभृतं पदं किम् ?१०॥

निम्नोन्नता वा मरु - कृष्ण - भूमि -
ग्रामा नगर्यो विजनाश्च प्रान्ताः ।
आख्यापयन्तीव समत्व - योगं
समानरूपेण सुखप्रदास्ते ॥११॥

अथाष्टमोऽध्यायः

भारतशासननीतिनिर्धारणम्

एकोनविंशशतके ब्रिटिशेऽथ राज्ये
शिक्षार्थशास्त्रनृपनीतिविधानमध्ये ।
जातादभूच्च परिवर्तनहेतुमुख्यात्
सामाजिकं विकृतमार्थिकजीवनं च ॥१॥

तज्जीवने समुदिता नवताविचाराः
घोरप्रभूतपरिवर्तनहेतुभिर्वै ।
प्राचीनकालपरकां गतजीवनाभां
लुप्तां शिवे हि विदधुः परमप्रगल्भा ॥२॥

शक्यं धनाधिकमितः परिभाव्य गौरैः
अङ्गीकृतो झटिति नीतिपथो तथा तैः ।
द्रव्यस्थितिर्भरतभूमिजुषां समेषां
स्वालम्बिनी क्षयमुपैतु यथानुदारैः ॥३॥

शिक्षाञ्च यां सपदि शासनचालनार्थं
स्वीचक्रिरे लिपिकजन्मकरीं निकृष्टाम् ।
ते राजनीतिकुशलाः कुटिलस्वभावाः
तत्राभवंश्च सफलाः किल सर्वथैव ॥४॥

नो भारतीयसुधियो निजदेशविद्या-
पारंगता अपि हि शासनकार्यहेतोः ।
उद्देश्यमेतदभवन्नितरां गृहीताः
ग्रेटब्रिटेनजनता लभतां हि लाभम् ॥५॥

आसीन्न भारतहितं तु कदापि तेषां
दृष्टिं गतं प्रतिदिनं धनहीनतां तत् ।
याति स्म तस्य विपुलानि महान्ति दुःख-
कष्टानि चापि विपदोऽधिकतामगच्छन् ॥६॥

तन्निन्द्यनीतिपरिणामवशादयासुः
हानिं नितान्तमनिशं विविधाः कलास्ताः ।
उद्योगकार्यमखिलं भरतक्षितेस्तु
हा शासनं झटिति नाशयति स्म निन्द्यम् ॥७॥

यद् भारतं जगति हेमपतत्रिनाम्ना
ख्यातं बभूव तदिदं सितशासनेन ।
विश्वस्य देशनिखिलेषु परां च काष्ठां
नीतं दिनैः कतिपयैर्हि दरिद्रतायाः ॥८॥

व्यापारहेतुमवलम्ब्य च गौरगात्राः
स्वामिष्टनीतिमधिकाभिमतामजानन् ।
वस्तु स्वदेशपरकं क्षतिमाजगाम
वैदेशिकं तु ववृधेऽतितरामतोऽत्र ॥९॥

नष्टं बभूव निखिलं गृहकार्यवृन्दम्
उद्योगनिष्ठविविधप्रचुरं समूलम् ।
आंग्लैरनेन विषमक्षतिपातनेन
ग्रामाः कृताः प्रबलनिर्धनतागृहीताः ॥१०॥

रेलाख्ययानततता परकीयदेश-
वस्तुप्रभूतनिवहं व्यतनोन्नितान्तम् ।
जातं फलं भरतभू भवतिस्म नग्ना
दारिद्र्यदोषहतसर्वबलप्रतापा ॥११॥

देशस्य तत् प्रतिदिनं विततां प्रयातं
दारिद्र्यदारुणतरं च ततोऽप्यकार्ष्टाम् ।

शिक्षा विचारमुदितं जनता हृदीमं
दोषं दधाति सितशासनमेतदेव ॥१२॥
एतं विचारमुदितं व्यदधात् ततश्च
राष्ट्रानुरागपरकं नवजागृतिं च ।
संस्थापिताऽत इह भारतराष्ट्रनिष्ठा
सद्यः सभा जनतया मतितिग्मया द्राक् ॥१३॥
देशस्य नेतृसुजनैः सकलैस्तदानी-
माघोष एष विहितः प्रियभारतेऽस्मिन् ।
संवर्ततेऽद्य बलवद्धनहीनता या
तत्रास्ति कारणमिदं सितशासनं हि ॥१४॥
तस्मादुपायसरलः खलु वर्ततेऽयं
स्वाधीनतासमरमत्र दृढं विधेयम् ।
आन्दोलनस्य महतोऽत्र च बीजमित्थम्
उप्तं हि नेतृनिवहेन सुचारुरीत्या ॥१५॥
कार्त्स्न्येन नार्थपरकोऽपि तु राजनीत्या-
श्लिष्टोऽर्थतत्त्वपरको भवति स्म भव्यः ।
भावस्तदा समुदितः शुचिधीजनानाम्
अर्थश्रितोऽथ स नयो ह्यचकाच्च जन्ये ॥१६॥
आन्दोलनं त्रिचरणं तदभूत् प्रकृष्टम्
आद्यं बभौ जगति सीमितराष्ट्रवादम् ।
कालेऽत्र नायकजनैः कृत उच्चघोषः
स्वायत्तशासनपरः सितनिघ्नतायाम् ॥१७॥
जाते द्वितीयेचरणे जननायकानां
वृन्दं प्रवृत्तिमधिकां व्यदधात् प्रतीव्राम् ।
श्रीलोकमान्यतिलकः कृतवान् भृशोग्रम्
आन्दोलनं परमवेगमयं तदानीम् ॥१८॥

सिद्धं हि नोऽस्ति जननात् स उवाच नैजं
स्वत्वं भवेच्च भरतावनिमण्डलेऽस्मिन् ।
स्वायत्तशासनमिदं परमप्रकर्षं
स्याद् भारतं निजविकासदिशि स्वतन्त्रम् ॥१९॥

व्यक्ते तृतीयचरणेऽथ च राष्ट्रियस्य
हृयान्दोलनस्य भवति स्म तु लक्ष्यमेतत् ।
राज्यस्वकीयलभनं स्फुटमेव गान्धी
जातोऽत्र मुख्यतमनायकविश्ववंद्यः ॥२०॥

पाश्चात्यराष्ट्रबहुभिः सह सन्निधिः सा
तीव्रां गतिं कृतवती द्रुतमार्थिकाणाम् ।
सम्यग् विचारमहतां सुधियो ह्यविन्दन्
विद्वत्प्रतीच्यनिकराच्छुभचोदनाच्च ॥२१॥

स्वातन्त्र्य-साम्य-परमोज्ज्वलबन्धुतानां
सा प्रेरणा जनयति स्म दृढप्रतीतिम् ।
लक्ष्यस्य पूतवपुषो नृपनीतिनिष्ठ-
स्वान्तीयशक्तिपरकार्थवतो हि लब्ध्यै ॥२२॥

निर्दिष्टलक्ष्यपरिपूर्तिनिमित्तमेव
देशान्तरीयघटिता परतन्त्रता या ।
छेद्यास्ति सा सपदि भारतवासिपुंभिः
एतच्चकार जननेतृगणः प्रसारम् ॥२३॥

पाश्चात्यदेशरचिताखिलनव्यभव्य-
सिद्धान्तलब्धनवशक्तिसुधीसमाजः ।
चक्रे प्रयत्नमभितं हि विधातुमर्थ-
प्रश्नं समाहितमतिप्रथितप्रकर्षः ॥२४॥

पाश्चात्यदेशबुधगौरववत्प्रभावो
ह्यर्थेऽपतत् त्वतितरामथ राजनीत्याम् ।

जाताश्च केऽपि सुजना नितरां दिशाया-
मार्वर्जिताः भरतभूविदिताश्च तस्याम् ॥२५॥

श्रीनौरोजीप्रधीन्द्रः शुचिमतिसुभगो गोखले दत्तधीमान्
श्रीरानाडेसुधीशो बहुलगुणनिधिर्भारते गेयवृत्तः।
एते विज्ञप्रकृष्टाः सुविततयशसो राजनीत्यां तथा च
ह्यर्थे जाताः प्रसन्नाः मनसि भरतभूचिन्तकख्यातमान्याः ।२६।

नौरोजी प्रथमः प्रवीणमतिमान् विख्यात एल्फिन्स्टने
कालेजे भरतावनेः बुधवरो बोम्बेऽभिधाने पुरे ।
संलेभे प्रथितां नियुक्तिमतुलां प्रोफेसरत्वेन सः
संस्थाश्चातितरां समाजपरकाः संस्थापयामास सः ॥२७॥

नौरोजी शुशुभे च राष्ट्रियसभाध्यक्षो मनीषी महान्
तस्यार्थे विदुषो विचारविशदाः ग्रन्थे तदीये प्रियाः।
शोभन्ते धनहीनतां प्रति भुवः पुंसां हि हेतुर्महान्
साम्राज्यं ब्रिटिशं मते गुणवतामासीन्नदीष्णस्य च ॥२८॥

नौरोजी कथनं विदेशगमने चक्रे स्वग्रन्थे ह्यसौ
विद्याब्धिर्वदति स्म भारतजनान् हन्तुं प्रणाली त्वियम् ।
श्वेतानां खलु शासनस्य परमक्रूरा यदा कोविदः
स्वं देशं कुरुते धनाढ्यमतुलं दीनं तदा भारतम् ॥२९॥

दोषेषु क्षिपतिस्म विज्ञजगति ख्यातः प्रकाशं भृशं
कम्पन्याः हतशासनात्मकविधौ स्पष्टं ब्रवीति स्म सः।
एषा भारतवर्षदेशसकलव्यापारविध्वंसने
लग्नासीत् प्रियभारताहितकरी चेस्टेण्डिया कम्पनी ॥३०॥

रानाडे ख्यातविद्वान् बुधजगति महादेवगोविन्दनामा
मेधावी सूरिसेव्यो नयविधिनिपुणो मान्यविद्याविदग्धः।
जातोऽसौ भारतेऽस्मिन् गुणनिधिसुजनो जागृतेर्जन्मदाता
मुख्यन्यायालयस्याखिलभवविदितो न्यायकर्तृ प्रधानः ॥३१॥

रानाडे न्यदधान्महोऽपरिमितं तेजस्वितामण्डितं
विद्वान् सः प्रतिभानवद्यविभया संशोभितो भारते।
तेजोऽभासत तस्य तत्र मनुजे योऽप्यागतः सन्निधौ
नूनं सः क्षितिमण्डले मतिमतां वंद्यो भवन् दिद्युते ॥३२॥

शिक्षां यद्यपि सः प्रतीच्यपथगां लेभे परं भावनां
राष्ट्रस्थाञ्च तथैव सार्धमनिशं विज्ञोऽभ्यवाञ्छद् भृशम्।
अद्वेट् राष्ट्रविरोधिपुंसि नितरां धीमद्वरेण्यप्रियः
नूनं प्रेक्षितुमिच्छति स्म सुमतिः श्रेष्ठं वदान्यं विधिम् ॥३३॥

अध्येतव्य इहानिशं मतिमता सिद्धान्त एको न हि
सध्र्यङ् स्याद् व्यवहारसात्त्विकगुणो नित्यं बुधोऽभाषत।
शास्त्रं सोऽर्थपरं विचिन्त्य मतिमांस्तत्रावदत् स्पष्टतः
श्रेष्ठोऽस्त्यागमनप्रयोग उचितो लोकोपकारी महान् ॥३४॥

कल्याणस्थितराज्यदर्शनधिया सोऽर्थव्यवस्थां हि ताम्
ऐच्छत् साधुनियोजिता भवति या सोऽग्रे बभाषे सुधीः।
सिद्धान्ता न कृता भवेयुरमला व्यक्तिश्रितास्तद्धिताः
राष्ट्रं स्याच्च हितस्वधर्मजनता-शिक्षा-समाजादिदृक् ॥३५॥

संस्थानेषु विराजतेऽर्थपरकः सम्यग् विकासोऽनिशं
तानीमानि समाजभूपतिनयौ चार्थो मनोज्ञप्रभः।
इष्टोद्देश्यहितेन यस्य तु सदा राज्यं निरीक्षेत च
संस्थानस्य जनस्य चैव सकलं कार्यं बभाणेति सः ॥३६॥

राज्यं यां श्रयते हि नीतिमधुना सावश्यमेवाहितम्
उद्योगे कुरुते कृषाविति सुधीश्चोवाच मेधार्चितः।
रानाडेप्रथमो बभूव सुजनो योऽर्थव्यवस्थां भृशं
सम्यक् चारु विमृश्य तत्र नयवित् साधु प्रकाशं ददौ ॥३७॥

वङ्गप्रदेशं जनुषा कृतार्थं
रमेशचन्द्रो विदधौ जगत्याम्।

उच्चोच्चविख्यातपदप्रतिष्ठः
    ससर्ज साहित्यनितान्तरम्यम् ॥३८॥

दत्तः प्रवक्ता बुधभूषणं सः
    ऐतिह्यशास्त्रे भरतावनेश्च ।
श्रीविश्वविद्यालयलन्दनस्य
    कीर्ति प्रभूतां नयति स्म वृद्धिम् ॥३९॥

जातो ह्यसौ मण्डलमुख्यनाथ-
    श्चैकाधिराजो बहुमण्डलानाम् ।
विद्वानभूद्भारतराष्ट्रियायाः
    अध्यक्षमान्यः कुशलः सभायाः ॥४०॥

कृते स दत्तो जगतीबुधानां
    सेव्यं हि साहित्यमतिप्रशस्तम् ।
ददौ चिरस्थायि धराखिलायाः
    सम्पत्प्रकृष्टानुपमाभिनन्द्याम् ॥४१॥

विद्वान् दत्तरमेशचन्द्रसतिमान् 'फेमिन्स इन् इण्डियाम्'
प्राणैषीद् रचनां जगत्सु विदितां 'क्रोपाटकिन्' कोविदो-
ऽलेखीत् तं बुधभूषणं प्रति कृतानुद्दिश्य यत् कर्षकान्
तद् रूसीयकृषीबलेष्वपि भृशं संगच्छते सर्वथा ॥४२॥

दत्तो निर्धनतां तु भारतभुवो विद्वान् विचिन्त्याधिकं
मेनेऽसौ ब्रिटिशं हि शासनमथो नीतिं तदीयां प्रधीः ।
मुख्यं कारणमेव तत्र सुमतिर्दारिद्र्यघोरे बुधो
न्यूनोत्पत्तिमथाल्पवृष्टिविकटां चोद्योगनाशं प्रति ॥४३॥

देशे निर्धनतां नियन्त्रणगतां दत्तो विधातुं प्रधीः
ग्रामेष्वक्रियतां निहन्तुमनघः कौटीरकार्यस्य च ।
विस्तारोऽथ च सेचनाय नितरां योग्या उपायाः पुनः
वृष्टेश्चागमनस्य हन्त सबला काङ्क्षा भवेन्नो भृशम् ॥४४॥

कुर्याच्छासनमाशु नष्टममितं स्वीयं व्ययं विस्तृतम्
इंग्लैण्डे विदधीत शासनमिदं रुद्धं क्रयं साम्प्रतम् ।
ऐच्छत् सोऽथ च राजकीयमृणगं वृद्धिक्रमं सत्वरं
संक्षीणं कृषिनिष्ठमायमथ च न्यूनं यथापेक्षितम् ॥४५॥

दत्तोऽस्ति प्रथमो हि भारतभुवो यो भारतस्यालिखत्
ऐतिह्यं प्रियमार्थिकं विशदतां विस्तारमादाय च ।
अद्याप्यादरपात्रमस्ति विदुषां सः प्राक् च तत्राभवत्
तस्यार्थे विहिता विचारततयः संश्लाघनीया भृशम् ॥४६॥

गान्धी महात्मा विदधौ प्रयत्न-
मागम्य देशान्तरतोऽविलम्बम् ।
आन्दोलनं राष्ट्रियमाप्नुत स्वां
शक्तिं विशिष्टां महनीयरूपाम् ॥४७॥

कृते प्रयासे सति तस्य रूपं
दिशा च शीघ्रं परिवर्तते स्म ।
दिनानि तेजोमयतामगच्छन्
धरां नभोऽपि प्रियमत्र रेजे ॥४८॥

आंग्लीयराज्ये निदधुः प्रकृष्टं
विश्वासमत्यन्तदृढं महान्तम् ।
भीता अदृश्यन्त च ये मनुष्या-
स्ते शासने तत्र घृणामकार्षुः ॥४९॥

प्रबोधेऽधिगते सम्यक् साम्राज्यान्तर्गते प्रियम् ।
गान्धीति प्रत्ययं चक्रे भारतं लप्स्यते स्थितिम् ॥५०॥

अधिनियमरौलटो जलियाबागदुःस्थितिः ।
सुषुवाते निराशां श्रीगान्धिनो हृदये परम् ॥५१॥

नृशंसे घटने ते तु चान्दोलनं दिशान्तरम् ।
निन्यतुः साम्प्रतं जाता नेतारोऽप्यतिदुःखिताः ॥५२॥

पूर्णं स्वातन्त्र्यमिष्टञ्च तेषां सम्प्रत्यजायत ।
यत्नं ते प्रबलं कर्तुं सञ्जाताश्च धृतव्रताः ॥५३॥

अहिंसायां मनः स्वीयं दधद् गान्धिसदाशयः ।
नाप्यरीन् दुःखितान् कर्तुं काङ्क्षति स्म महामनाः ॥५४॥

तां नीतिं शिश्रिये गान्धी यत्राहिंसा समर्च्यते ।
आन्दोलने रणे तेन ह्यहिंसैवायुधं कृतम् ॥५५॥

गान्धिदर्शितमार्गेण कृपया परमात्मनः ।
ऋषिश्रुतिग्रहेशाब्दे स्वातन्त्र्यं भारतं ययौ ॥५६॥

राजनीतिकदृष्ट्यैव गान्ध्यादर्शा न मान्यताम् ।
सामाजिक्या दृशा चापि दधतं ते स्वगौरवम् ॥५७॥

नो नो केवलमेतावत् आर्थिकीमपि ते श्रियम् ।
दधतः परिशोभन्ते तस्मात् ते गुरवो मताः ॥५८॥

कार्याणां महनीयत्वात् विचाराणां च गौरवात् ।
अष्टाविंशतिवर्षाणि मतं गान्धियुगं भुवि ॥५९॥

सोऽयं गान्धी महात्मा ग्रहरसवसुभूवत्सरे पुण्यधाम्नि
सौराष्ट्रे पौरवन्द्रे परमशुचिमतिः कर्मचन्द्रस्य सूनुः ।
भूत्वोत्पन्नो धरित्रीमनुपमसुषमागौरवद्योत्यमानां
कुर्वाणो भारतस्याखिलजगति यशो वर्धयन् भ्राजते स्म ।६०॥

शिक्षामाप्तुं प्रतस्थे स विधिविषयिणीमिङ्गलेण्डं मनस्वी
भूत्वोत्कृष्टो विधिज्ञश्चिरसमयमसौ दक्षिणो दक्षिणस्था-
फ्रीकायां स्वं निवासं सुमतिरकुरुत श्रेष्ठविद्याविपश्चित्
जातीयं भेदभावं श्रमकठिनरतस्तत्र नष्टं चकार ॥६१॥

लब्ध्वा कीर्तिं वदान्यो भवमुकुटमणिः सत्यनिष्ठप्रकाण्डो
देशं स्वं भारताख्यं सपदि निववृते प्रेक्ष्य सम्यक् सुधीन्द्रः ।
देशावस्थां नितान्तक्लमगतविषमां चिन्तनीयां च शोच्यां
वीक्ष्यारेभे स आन्दोलनमथ भरतख्यातभूमिप्रशस्तम् ॥६२॥

पूतं सत्याग्रहं स्वं लवणविषयकं शीलसौन्दर्यशुभ्र-
श्चक्रे प्रारब्धमाशु श्रितविमलपथः साधुतासक्तचित्त-
श्चित्तोदारोऽन्वतिष्ठद् विजयमधिययौ श्लाघनीयं यशस्वी
प्रारब्धान्दोलनेषु प्रथितशुचिमतिः प्राप सर्वत्र कीर्तिम् ॥६३॥

आन्दोलनं 'त्यजतभारत'मन्वतिष्ठत्
गान्धी महानधिययौ च ततोऽस्मदीयः ।
देशं वृतं कृतवती समुदं जयश्रीः
जातो दिशासु विततो जयघोष उच्चैः ॥६४॥

वसुवेदनवेशवत्सरे खगुणाढ्ये प्रथमैशमास्यसौ ।
करुणाविमुखेन मृत्युनाह्रियत श्रीमहनीयमोहनः ॥६५॥

वैराग्यं साम्यवादं च सारल्यं धृतिमान् सुधीः ।
टालस्टायात् सतां श्रेष्ठाद् गृह्णाति स्म जगत्सुहृत् ॥६६॥

राजनीतिकसत्तायाः विकेन्द्रीकरणं तथा ।
क्रोपाटकिनतः सम्यक् आदत्ते स्म सुधीप्रियः ॥६७॥

गीतोपनिषदश्चासौ रामायणञ्च दृष्टवान् ।
निर्दिष्टानां प्रभावोऽपि निपपात महात्मनि ॥६८॥

आर्याणामपि साधूनां नानकादिमहात्मनाम् ।
प्रभावस्तत्र भाति स्म गान्धिमहात्मगौरवे ॥६९॥

'गोखले' इत्युपाह्वस्य शिष्यं मेने स बुद्धिमान् ।
आत्मानं नीतिविद्यायां सर्वभूतहिते रतः ॥७०॥

अनेकानलिखद् गान्धी ग्रन्थान् लेखांश्च तिग्मधीः ।
सर्वत्र विदुषा तेन सम्यगर्थो विचारितः ॥७१॥

अङ्गत्वेनार्थशास्त्रं सः जीवनस्य व्यचिन्तयत् ।
अतोऽर्थपरकास्तस्य विचारा दर्शनोपमाः ॥७२॥

जीवनं यद्धि सामान्यं ज्ञेयं तदिह दर्शनम् ।
महात्मनो विचारोऽयं समशोभत सर्वतः ॥७३॥

अहिंसा च श्रमं सत्यं सारल्यञ्च महात्मनः ।
आर्थिकास्तस्य भावास्तु संश्रित्यैते च रेजिरे ।।७४।।

दर्शनाद् व्यतिरिक्तं न स जीवनममन्यत ।
समाजे राजनीत्यां च तस्य जीवनदर्शनम् ।।७५।।

अन्योन्याश्रितमेवासौ मेनेऽखिलं सुधीश्वरः ।
विज्ञा न विस्मरन्त्वेतदूचिवान् स पुनः पुनः ।।७६।।

विचारान् गान्धिनः सर्वान् कुमारप्पा च हक्सले ।
अन्ये च बहवः प्रध्यः स्वस्वग्रन्थेष्वभावयन् ।।७७।।

स्युरुदग्रा विचारा हि स्यात् सरलं च जीवनम् ।
एतस्मिन् स हि सिद्धान्ते गान्धीति भावनां न्यधात् ।।७८।।

हिन्दुधर्मस्य सारोऽत्र निहितो वर्तते प्रियः ।
विमृश्येति महात्मासौ स्वीचक्रे तद्धितौषधम् ।।७९।।

य एतत्सम्मता दोषाः प्रच्छन्नाः सन्ति घातुकाः
तान् सर्वांश्च निराकर्तुमुपचारोऽत्र राजते ।।८०।।

मान्यताः मानवत्वस्य हित्वान्यत्रैव रज्यति ।
सोऽपेक्षां वर्धयन् दोषो भौतिकत्वे जनान् सदा ।।८१।।

निपात्य मोदतेऽजस्रं धनेच्छां विदधद् भृशम् ।
अनन्तरं सुखं नूनं जीवने सात्त्विकं स्थितम् ।।८२।।

आराधकोऽभवद् गान्धी ह्यहिंसायाः सुविश्रुतः ।
तस्मात् तदार्थिकी बुद्धिरहिंसाश्रीसुशोभिता ।।८३।।

अहिंसायाः सिद्धान्तस्तद्दर्शनस्य जीवनम् ।
हिंसामुद्दिश्य सोऽवादीत् कदापि सा न शान्तिदा ।।८४।।

भारतीयसमस्यानां समाधानं त्विदं मतम् ।
समस्यास्त्वखिला मूले द्रष्टव्या क्रौर्यवर्जिता ।।८५।।
सुनियमस्य चैतस्य हेतोः सततमङ्गलम् ।
व्यक्तेश्च जनतन्त्रस्य विकासो भवति प्रियः ।।८६।।

अपेक्ष्यते तदर्थन्तु जीवनं व्यावहारिकम् ।
गान्धी त्वेतद् ब्रवीति स्म भाषणेऽर्थविभावने ॥८७॥
आधुनिकार्थवादं हि प्रत्याचख्यौ स बुद्धिमान् ।
मानवश्रमशोषित्वान् नान्वमंस्त सुधीस्तु तम् ॥८८॥
अकर्मण्यत्वकारित्वात् यन्त्रं तु नान्वमंस्त सः ।
धनस्य स्वल्पकारित्वात् तं व्यरौत्सीत् सुधीश्वरः ॥८९॥
श्रमपक्षे महात्माभूमच्छ्रमं कृत्वाथ सन्ततम् ।
कठोर दैहिकं देही जीविकां समुपार्जयेत् ॥९०॥
घण्टाः अष्ट श्रमं कुर्याच्छतामष्ट पुमांस्तथा ।
अष्ट स्युरवकाशेऽपि महात्मेत्यवदत् पुनः ॥९१॥
अवकाशे क्रियां कुर्यात् समाजसंस्कृतिस्थिताम् ।
महात्मेत्यवदल्लोकं सर्वमेतत् पुनः पुनः ॥९२॥
विचारा गान्धिनः सन्ति ह्याध्यात्मिकविभान्विताः ।
नैतिकताश्रिया चापि सन्ति ते समलङ्कृताः ॥९३॥
राष्ट्रस्य निखिलस्यापि धनिनां सञ्चिते धने ।
चास्त्यधिकारसम्पूर्णो महात्मेति वचोऽवदत् ॥९४॥
उद्योगञ्च गुरुं गान्धी व्यरौत्सीत् प्रबलोक्तिभिः ।
स तु सामाजिकान् किञ्च ह्यार्थिकान् समपूपुषत् ॥९५॥
इष्टं गमयितुं सम्यक् जीवनं मानपूर्वकम् ।
निधेयं धनिभिर्द्रव्यं कदापि न ततोऽधिकम् ॥९६॥

ग्रामोदयो भवेत् पूर्णः स्यात् स्वावलम्बने स्थितः ।
गणतन्त्रात्मकं राष्ट्रमित्यैच्छत् साधुतल्लजः ॥९७॥

एतस्मिन् युगपावने भरतभूदेशप्रिये पेशले
ह्युद्योगश्रितसभ्यताकृतमतिर्विश्वेश्वरय्या बुधः ।
सञ्जातोऽर्थविधिप्रयोगकुशलश्चार्थे विचारोज्ज्वलः
सोऽर्थानां हि नियोजने बलमदाद् विद्वान् सुधीसेवितः ॥९८॥

मेने राष्ट्रियशासनस्य गुरुतामर्थस्य तत्र स्थितिम्
उद्योगाः प्रथमे पदे स्थितिदृढाः सम्प्राप्नुयुः सः प्रधीः ।
चेत्येतद् भणति स्म सः शुचिमतिः सञ्चार-शिक्षादिकं
सम्यक् स्थापनमाप्नुयुर्बुधवरोऽगादीद् विचारानिमान् ॥९८॥

प्राप्य स्वतन्त्रतामिष्टां क्षिप्रं भारतशासनम् ।
प्रयासं सक्रियं चक्रे राष्ट्रस्यार्थहिताय वै ॥९९॥

नृजीवनस्थितिं कर्तुमुच्चां भारतशासनम् ।
सावधानं भवत् सम्पन्नियोजनमयूयुजत् ॥१००॥

योजनां पञ्चवर्षीयां प्रारेभे शासनं तदा ।
तत्रार्थशास्त्रिणः सर्वे ददुर्योगं स्वयं मुदा ॥१०१॥

लोकतन्त्रोत्तमे राष्ट्रे लक्ष्यं हि नेतृधीमताम् ।
समाजवादिराज्यस्य संस्थापनमवर्तत ॥१०२॥

उद्देश्यं पूर्णं स्याद् विज्ञाः कृत्वा चिन्तामेतां सर्वे ।
अर्थस्थां राष्ट्रेऽस्मिन्नीतिं चक्रुः सम्यक् ते हे भद्रे ॥१०३॥

इति नवभारतपुराणे भारतशासनीतिनिर्धारणं नामाष्टमोऽध्यायः ॥

अथ नवमोऽध्यायः

समाजवादः

आद्यादेव विभाति साम्यसुषमा सेव्या हि कालादियं
विश्वेशप्रकृतिः कृपालुहृदयावैषम्यविद्वेषिणी ।
सोमादित्यसमीरभूमिजलधिस्त्रोतस्विनीशाखिनः
सर्वे प्राणिषु सन्ति साम्यमनसो भेदश्रिताः सन्ति नो ॥१॥

वैषम्यं खलु मानवस्य हृदयात् सङ्कीर्णताशालिनो
भूत्वोत्पन्नमिहाखिलेऽवनितले कष्टानि विघ्नानपि ।
सृष्ट्वा व्याकुलतां कटुञ्च कलहं तीव्रामशान्तिं रुषं
ससारं नरकं करोति सकलं सन्तापसम्पीडितम् ॥२॥

सन्तोऽपीश्वरसूनवो भुवि जनाः वैषम्यपूर्णं सदा
कुर्वन्ति व्यवहारनिन्द्यमलिनं दुःखं महादारुणम् ।
ते भेदं जनयन्ति मानवकुले दुर्भावनां भीषणां
बिभ्राणा विचरन्ति संसृतितले नित्यं विचाराप्रियान् ॥३॥

वस्तूत्पादनसेवनादिसकलव्यापारवृन्दं पुरा
पुंसामिष्टसमर्चनामतितरां दृष्ट्यां निधायानिशम् ।
उत्साहेन कृतं विधेः परुषतायुक्तं विधानं परं
द्रष्टव्यं निजसाधनेषु मनुजैः स्वत्वं धने स्थापितम् ॥४॥

अर्थं सम्प्रति मुख्यमेव नितरां मत्वा जनानां हितं
प्रीत्यर्थं हि विधाय गौणमविहा जागर्ति नः सभ्यता ।
यत् स्वत्वं विभवे कृतं बहुमुखं रूपाधिकं दृश्यते
तन्नूनं धनलोभलग्नमनुजैराचारनिन्द्यैर्भवे ॥५॥

एतच्छोककरं महत् कतिपये जाता जनाः स्वामिनः
अर्थस्य प्रचुरस्य शेषमनुजा दीना दरिद्रा इह ।
अस्त्यत्राधुनिके समाजभवने पुंसां हि वर्गद्वयं
तत्रैको धनसागरस्तदितरो दारिद्र्यवारां निधिः ॥६॥

श्रीमान् ना सुखसाधनैर्बहुविधैराधिक्यवद्भिः सदा
सेव्यत्वात् न हि वेत्ति कुत्र धरणौ शैत्यं निदाघोऽस्ति वा ।
प्रासादे कुरुते स्थितिं चलति सः श्रीमान् स्वयानेन च
ह्येतस्यां भरतक्षितौ विषमतार्थस्यातिचिन्तावती ॥७॥

अर्थाभावगतो जनोऽनुदिवसं दुःखानि कष्टानि च
सम्प्राप्नोति पदे पदे न वसतिं वासो न भोज्यं मनाक् ।
अस्मिन् भारतभूतले तु विपदो यस्मिन् समाजे मुदा
क्रीडन्ति प्रचुराः स निर्धननृणां ज्ञेयः समाजो महान् ॥८॥

दारिद्र्यादिह भारतेऽद्य मनुजो मृत्युं च ह्यालिङ्गति
एतस्यां भुवि वर्तते स्थितिरियं हा शोचनीया भृशम् ।
दीनो हन्त दधाति नात्र सविधे क्षुद्रं पणकं ह्यपि
एकः पुष्कलभोज्यवस्तुमधुरं धत्तेऽपि नान्यः कणम् ॥९॥

अर्थाभाववशाज्जनो निजरुजामीष्टेऽपनीतां हि नो
कर्तुं हन्त परं जनं तु बहवो द्रष्टुं स्थिता विश्रुताः
दक्षाः श्रेष्ठचिकित्सका भरतभूसंशोभितं दृश्यताम्
एतच्छ्लाघ्यसमाजचित्रसुखदं नान्यत्र दृष्टं भवेत् ॥१०॥

अर्थाभाववशाज्जनो न तनयं कश्चित् क्षमः शिक्षितं
कर्तुं तत्र समाज एव धनिकः पुत्रान् स्वकीयान् प्रति ।
चाभीष्टे विषये प्रदातुमुचितां शिक्षां नितान्तोच्छ्रितां
काठिन्येन विना क्षमो भवति च क्षिप्रं बलात् सम्पदाम् ॥११॥

आत्मानं मनुतेऽतिसभ्यमधुना तस्मिन् समाजे स्थितो
वृद्धं निन्दति निर्भयं स्वमनृते विश्वासवृन्दे रतः ।

दम्भाडम्बररागिणीषु रमते वार्तासु सः सर्वदा
निर्लज्जः परिहासमेव कुरुते सभ्यत्वगर्वो युवा ॥१२॥

कृत्वा मातृऋणं मतं पितृऋणं मातु पितुः सद्धितम्
सन्तत्यामत एव सा सविनयं चक्रे च तत्स्वीकृतम् ।
तत्सेवां मनसा विधाय वपुषा भूत्वा कृतज्ञा च सा
तस्मात् सन्ततमीहतेस्म भवितुं मुक्ता प्रकृष्टाद् ऋणात् ।१३।

एतद्धेतुवशाद् गृहाः शुशुभिरे क्षित्यामिह स्वर्गवत्
मातुर्मञ्जुशुभाशिषं पितृकृतं नित्यं पथोदर्शनम् ।
सन्तत्याः सततं च कर्मसु रतिर्धर्मानुरागो दृढः
प्रेयस्याः प्रणयश्च गौरवमयाँश्चक्रुर्हि तान् सन्ततम् ॥१४॥

अस्मद् देशनिकेतनानि सततं मातृत्वसद्गौरवैः
पत्नीत्वस्य विशिष्टसौरभकणैः शब्दायमानान्यति ।
जायन्ते स्म नितान्तमञ्जुलविभासम्भूषितान्यन्वहं
सामान्याः अभवन् गृहा गतदिनेष्वेतादृशाः अद्य नो ॥१५॥

प्रत्यूषेऽत्र समाजबालकगणः काले व्यतीतेऽन्वहं
मातुः किञ्च पितुः पदाम्बुजयुगं भक्त्यानमत् सादरम् ।
जातं मोदतरङ्गलोलहृदयं लब्ध्वा तयोराशिषं
सन्त्यद्यापि गृहा इहेदृशगुणा न्यूनास्ति संख्या परम् ॥१६॥

प्रागत्रत्यसमाजरूपसुषमा मोदेन सम्मोदिता
आसन् जीवनभृत्स्वराणि सदनान्यानन्दसान्द्राण्यपि ।
अत्रत्ये परिवीक्षितानि परितः कृत्स्ने समाजप्रिये
भावेऽशोभत पुंसु पावनसदाचारान्वितः क्वाद्य सः ॥१७॥

दायित्वेषु समाज आस्त सुतरां सः सावधानोऽनिशम्
एषः सोऽद्यतनोऽस्ति तद्गुणविभा शून्योऽपि संलक्ष्यते ।
अत्यन्तप्रतिकूल एव बहुभिर्दोषैर्गृहीतो भवन्
स्वार्थस्थोऽतिपरापकारनिरतः सम्प्रेक्ष्यते सर्वदा ॥१८॥

एतस्मिन् परिवीक्ष्यतेऽतिमलिनं धाष्ट्र्यं समाजे महत्
निर्माणं भवितुं न सम्भवमिति ज्ञातं हि सञ्जायते ।
सर्वत्रैव गृहेषु वा परिजने शिक्षादिकानां स्थले
रूपं भीतिकरं प्रचण्डममितं सम्प्रेक्ष्यते साम्प्रतम् ॥१९॥

उत्कोचग्रहणं विना न कुरुते कार्यं जनः कार्यकृत्
ईदृक् कोऽपि न वर्ततेऽत्र भरतक्षोण्यां विभागो गुरुः ।
किं वाप्यत्र लघुर्भवेन्न मलिनो दोषेण योऽनेन च
भ्रष्टाचार इयान् महान् प्रसरति क्षुद्रो हि देशोऽत्र नः ॥२०॥

उत्कोचं परिगृह्य रोगिपुरुषं ध्यानेन सम्प्रेक्षते
शल्यादावतिबाधितो भवति सोऽवश्यं हि रोगी जनः ।
दातुं तं धनराशिमेव सुतरां यं प्रेरितोऽसौ प्रति
खेदोऽयं कुदशास्ति सम्प्रति चिकित्सायाः इयं भारते ॥२१॥

सेवायां परिचारका हि नियता ये सन्ति ते मानवाः
भृत्या भेषजमन्दिरेऽपि सकला उत्कोचलाभे चणाः ।
देशे यत्र भिषग् जनाः अपि परा आदातुमर्थं सदा
उत्कोचे पतनं समाजपरकं वर्ण्येत निन्द्यं कथम् ॥२२॥

भ्रष्टाचारपराणि रूपविविधान्यस्मत्समाजेऽधुना
वीक्ष्यन्ते परिवीक्ष्य तानि हृदयं लज्जोदधौ लीयते ।
जातं हा पतनं कियद् भरतभूपुंसां चरित्रस्य नः
चित्तं तद्दिशि याति दीर्घगहनं क्लान्तं तदा जायते ॥२३॥

पुत्र्याश्चेज्जनको विवाहसमयेऽभीष्टं हि दायं धनं
दातुं नो भवति क्षमः परिणये जाते, पुनस्तद् यदा ।
दातुं नार्हति चेत् पिता झटिति हा कन्यां तदीयां तदा
क्रूरो हन्ति पतिर्भवन् परिजनो वार्थाय हा निर्घृणः ॥२४॥

भर्ता चेल्लभते धनं ह्यभिमतं पित्रादिकास्तस्य वा
कन्यायाः न पितुस्तदा नववधूं सर्वेऽपि दुन्वन्ति ताम् ।

भूत्वा निर्दयचेतसा प्रतिदिनं क्लान्ता वराकी स्नुषा
देहं स्वं दहति द्रुतं हुतभुजा ईदृक् समाजोऽस्ति नः ॥२५॥

अद्य क्वापि शिशुं हरन्ति तरसा दुष्टा धने गृध्नवः
कन्यां वा युवतिं क्वचिच्च परुषा नीचा महापापिनः।
अर्थार्थं ह्यथवा स्वकाममनलं तृप्तं विधातुं हताः
अर्थे नाधिगते कृते च हृदये तृप्ते द्रुतं घ्नन्ति ताम् ॥२६॥

दृश्यन्ते बहुनिन्द्यनीचघटना सर्वत्र शोकावहाः
प्राणान् क्रूरजना हरन्ति विजने प्रत्यक्षमेवापि हा।
पुंसामत्र निरागसां समनसां सर्वञ्च तत् तद्धनम्
अस्माकं भरतक्षितावतितरां शोच्याः समाजे जनाः ॥२७॥

साहाय्यप्रदसत्यसुन्दरविभस्नेहादिसद्भावना-
बन्धुत्वोज्ज्वलकार्यपद्धतिशुभाभाजीवनोदात्तता ।
यस्मिन् साधु विराजते जनगणे प्रोक्तः समाजो हि सः
विद्वद्भिः सुजनैरिति प्रथितधीसौम्यैर्जगद्वन्दितैः ॥२८॥

शान्तिस्निग्धमनोज्ञसौहृदमयं यत्रास्ति सज्जीवनं
द्वेषासत्यमदच्छलादिकुटिलत्वौद्धत्यशून्यं भवत् ।
विभ्राजद्व्यवहारदिव्यसुषमारम्यं प्रसादास्पदं
सर्वत्रैव भवे समाज इति सः प्रोक्तो मुदा साधुभिः ॥२९॥

यत्र त्रीणि विभान्ति साधु सततं पूतानि तत्त्वान्यपि
नानाभिन्नविचारवर्णविविधव्यापारकार्यादिका-
सक्तप्राणभृतां विशालनिवहः संशोभते सर्वदा
एतत् तु प्रथमं प्रधीभिरखिलैर्ज्ञेयं हि तत्त्वं प्रियम् ॥३०॥

शान्तिश्रीसहयोगमञ्जुलरुचिः सज्जीवनं सात्त्विकम्
इत्येषां त्रितयं च भाति समुदं वेद्यं द्वितीयं ततः।
नेतुं जीवनमस्ति योजनमिदं ज्ञेयं तृतीयं पुनः
श्रेयोमङ्गलशोभितं शुचितरं प्रेयः श्रियालंकृतम् ॥३१॥

सञ्जातोऽत्र शनैः शनैः नृभुवने सामाजिकस्तूद्भवो
मर्त्यानां प्रकृतौ समाजवसतिस्तस्मात् समाजोऽस्त्ययम् ।
तावानेव पुरातनो निगदितः पुंसां मतं जीवनम्
आस्ते यावदिदं गते च समये तावद् ह्यभून्नोऽप्यसौ ।।३२।।

आदावेव जनो निवासमकरोद् विन्दन् कुटुम्बे मुदं
जातीनां परिवार एव जनको ग्रामांश्च सोऽस्थापयत् ।
ग्रामाणां निवहात् ततोऽत्र भुवने राष्ट्राण्यजायन्त च
अङ्गं सज्जगतः क्षमं हि वसने तस्मात् समाजोऽस्त्ययम् ।३३।।

इष्टं स्याद् विमलं शुभं सुगठनं सामाजिकं सर्वथा
राज्ञो राजनयस्य वा शुचितमां नीतिं गतां भावनाम् ।
बिभ्राणाः सहयोगपूर्वकमिमे सर्वे जनाः कुर्वते
शीलेन व्यवहारमत्र भवति त्राणं समाजस्य चेत् ।।३४।।

ज्ञेयो धीरजनैः शरीरसदृशो ह्येषां समाजस्त्वयं
वीक्ष्यन्तेऽवयवा यथाऽपरिमिता देह समाजेऽप्यथो ।
सस्थाः किञ्च गणा विभिन्नवपुषः प्राप्तास्तथानेकशो
जायन्ते हितकारितादिविविधा इष्टाः समाजस्थितेः ।।३५।।

कस्मात् काङ्क्षति मानवः स्ववसतिं प्रश्नः समाजे स्थितो
जातोऽयं भवति प्रगाढविपदश्चिन्ता महत्यस्तथा ।
कुर्वन्त्याक्रमणं जनेषु सततं भूत्वा विमुक्ता वयम्
एताभ्यो विपिने स्वकीयवसतिं कर्तुं क्षमाः स्मोऽपि किम् ?।३६।

नैतत् सम्भवमस्ति किं बहुविधापद्भीषणाभ्यो महा-
दायित्वाच्च नितान्ततीव्रकठिनात् कष्टाच्च नानाविधात् ।
स्वं मुक्तं पुरुषो विधाय रहसि स्थातुं समर्थो भवेत्
भूयोभिस्तरुभिर्मनोज्ञललिते स्थाने समीरप्रिये ।।३७।।

बन्धूनां सुहृदां च पाण्डुतनयः पार्थो वधं नोचितं
जन्ये साधु विमृश्य नम्रवचसा कृष्णं पप्रच्छ प्रियम् ।

अस्मात् पापमयाद् विरम्य भगवन् कार्याद् वरं कानने
वासो नेति हरे तदा तमवदच्छ्रीमाधवः सस्मितम् ।।३८।।

कर्त्तव्यस्य रणे न पालनमिदं जानीहि घोरं महत्
क्लीबत्वं जगतः प्रपञ्चकुटिलात् कष्टाच्च दुःखाद् भयात् ।
प्राप्य व्याकुलतां पलायनमहो मान्द्यञ्च शोच्यं रणात्
निष्कामाचरणं समाजविषमे स्थित्वा वरं कर्मणः ।।३९।।

कृत्वा कर्म सदैव लोकविषमे भद्रं जगत्यां भवेन्
नो तज्जीवनमस्ति जीवनमिह त्यक्तः समाजोद्धतः ।
येऽतिक्लान्तिगतेन हन्त तपसा संन्यासिनो योगिनो
वोज्झन्ति स्वसमाजमत्र न भवे साधूपकुर्वन्ति ते ।।४०।।

मुञ्चन्ते निजपारिवारिकगतिं सामाजिकं बन्धनं
नो संन्यासिजनाश्च योगिपुरुषाः सामाजिकं सर्वथा ।
त्यागात् तस्य हितं न चापि हि मनाक् सामाजिकं सर्वथा
नूनं नापि च सम्भवो जगति सः सेव्यः समाजो ह्यतः ।।४१।।

चारित्र्यं नितरां पुनाति मनुजं तत् तं पुनः संस्कृतम्
आत्मानं च समाजमुन्नततरं चित्तं च तत् पावनम् ।
उत्पन्नां मधुरां समन्वयरुचिं सम्यग् विधत्ते द्रुतं
श्लाघ्योऽस्त्यत्र चरित्रचारुपुरुषो वंद्यः समाजेऽस्ति सः ।।४२।।

पातुं मानवजीवनं भुवि भृशं सामाजिकी सत्त्वता
संसेव्येत हिताभिलाषिपुरुषैः सास्ते सदुत्कर्षदा ।
चारुत्वं गुणरम्यनैतिकवलं गृह्णन् प्रियं जीवितुं
नो शक्नोति विना कदापि मनुजः साहाय्यसामाजिकम् ।४३।।

देशेऽत्र प्रथमं स्वजीवनकृते भोज्यञ्च वासोऽन्वहम्
एते संलभते परस्य पुरुषः साहाय्यसामर्थ्यतः ।
अन्नं किञ्च पटः श्रमेण महतां पुंसां कठोरेण हि
नानाकार्यकलागुणादिकविदां वृन्देन संस्थाप्यते ।।४४।।

कुर्मो ज्ञातमिदं वयं वयं स्फुटतया चैतेन वृन्दं नृणां
क्षोण्यां नूनमपेक्षते प्रतिदिनं सामाजिकं संश्रयम् ।
शत्रुभ्योऽथ च हिंस्रजीवनिकरात् दस्योश्च दुष्टान्नरात्
शस्त्रास्त्रै रचितैः समाजमहसा पामो वयं स्वान् सदा ।।४५।।

शस्त्रास्त्राणि कृतानि योग्यपुरुषैः सामाजिकैः स्वश्रमैः
लब्ध्वा रक्षति जीवनं जनकुलं तान्यत्र लोकेऽनिशम् ।
कृत्वाप्तं सहयोगमेव प्रबलं सामाजिकं मानवः
आत्मानं क्षमते स्वसङ्कटगणात् पातुं ह्यतः सिद्ध्यति ।।४६।।

अस्माभिः प्रकृतेः प्रकोपबहुवश्चौरादिशङ्काः सदा
प्रेक्ष्यन्तं जगतीह सद्म सततं तेभ्यो हि नस्त्रायते ।
निर्माणं निलयस्य दक्षमनुजाः कुर्वन्ति सत्कौशलैः
तस्माद् भूभुवनेऽत्र सिद्ध्यति समाजोऽयं सदा नोऽवति ।।४७।।

रोगाश्च व्यथयन्ति मानुषमिहानेके हि तान् सर्वथा
संछेत्तुं कुशला जना समुचिताः कुर्वन्ति नानौषधीः ।
निष्णाताश्च चिकित्सका विदधति श्रेष्ठैरुपायैः रुजां
नष्टामत्र च मानवोऽस्ति सुतरां योऽयं समाजंश्रितः ।।४८।।

दृश्यन्ते जगतीह यानविविधश्रेष्ठानि भूयांस्यपि
रेलाख्यानि च मोटरादिविदितान्यन्यानि रात्रिदिवम् ।
यानि व्योम्नि चलन्ति किञ्च सलिले संश्रित्य सर्वे जनाः
कुर्वन्ति स्वसमग्रकार्यविविधं हेतुः समाजोऽत्र हि ।।४९।।

पुंसा काश्चन वृत्तयः स्वहृदये दैवस्वभावस्थिताः
धार्यन्ते परमेश्वरेण सकला दत्ताः कृपापूर्वकम् ।
कर्तुं ताः प्रकटीकृतास्तु पुरुषोऽपेक्षां विधत्ते भृशम्
अन्यस्यापि जनस्य भाति रुचिरा सामाजिकीह च्छवि ।।५०।।

द्वेषेर्ष्यापदमानकीर्तिविविधाः काङ्क्षाश्च हृत्संस्थिताः
पूर्यन्ते निखिलैर्जनैश्च सकलाः नित्यं समाजाजिरे ।

तस्मान्नो मनुजः कदापि समये स्थाने च कस्मिन्नपि
ह्यात्मानं क्षमते पृथङ् नृभुवने कर्तुं समाजस्थितेः ॥५१॥

राहित्यं नितरां दुनोति मनुजं सामाजिकं सन्ततं
तत्पुंसः खलु जीवनं गमयति क्लेशं महाशोच्यताम् ।
त्वात्मानं लभते यदा च भुवि सः प्रेष्ठात् समाजात् तदा
दूरे सन् व्यथितो निपातयति हा शोकार्णवे जीवनम् ॥५२॥

विद्या सांस्कृतिकी च सम्पदमिता सद्बन्धुता सद्बलं
लभ्यन्ते हि समाजतः प्रतिदिनं तस्मान् महीयानसौ ।
ज्ञानस्यापि च वर्तते बुधजनाः स्रोतः समाजो भुवि
जानन्त्वत्र तु सञ्चितं प्रवहते नानायुगव्यापि तत् ॥५३॥

किं सत्यं किमु सुन्दरं ललितता का क्वास्ति सच्छासनम्
एतद् बोधयितुं क्षमो भुवि महामान्यः समाजः सदा ।
सम्पूर्णा अपि शिल्पचित्ररसभृत्संगीतविद्याकलाः
वासं स्वं रुचिरं मुदा विदधते पुंसां समाजेऽनिशम् ॥५४॥

विज्ञानं सकलं विभिन्नबहुलं यच्छोभते भास्वरं
भूविद्या गणितं रसायनमपि व्योम्नः पदार्थामिताः ।
जीवानां विषये च याः सुविदिताः विद्या महत्योऽखिलाः
पाठ्यन्ते सकलाश्च यत्र तदिदं सामाजिकं साधनम् ॥५५॥

तास्ताश्च प्रकटीभवन्ति निखिला भाषाः समाजाश्रमे
नो वासं विपिने करोति पुरुषो नो शिक्षते तत्र सः ।
नो भाषा च वने विकासमयते को वेत्ति नेदं जनः
स्रोतः सर्वगतेर्विधेश्च बलवज्ज्ञेयः समाजो ह्यतः ॥५६॥

उत्थानं च समाज एव भवति द्रव्यस्य वा सम्पदां
नैकाकी मनुजो मनोरथमपि द्रव्यस्थितं शक्नुते ।
कर्तुं स्वं सफलं ह्युपार्जनमसावीष्टे समाजे निज-
द्रव्याणामपि वर्धनं समुचितं तत्रैव शक्तः सदा ॥५७॥

कृत्स्नं संगठनं विभिन्नविषयं राज्यव्यवस्थापि च
आरोहन्ति च शासनात्मकविधि सामाजिकं सद्बलम् ।
तत् संश्रित्य बहून् बहूंश्च नियमान् प्रीत्या मनुष्यः सदा
सम्यग् रक्षति सादरं स्वमनसा कालेऽपि कष्टाकुले ।।५८।।

निःसंदिग्धतया पितेव जननी चैषः समाजो गुरु-
र्नित्यं स्निग्धहृदा करोत्युपकृतान् सर्वान् मनुष्यानपि ।
श्रेयः स्थापितमानसोऽवहिततां गृह्णंश्च प्रेयोरतो
धत्ते मानवजातिरस्य हि ऋणं सत्यं समाजस्य तु ।।५९।।

व्यक्त्यर्थं किम् शोभतेऽत्र धरणावेषः समाजो महान्
आहोस्वित् किमु राजतेऽत्र जगति व्यक्तिः समाजाय हि ।
धत्तेऽयं गुरुतां समाज इह वा व्यक्तिर्महत्ताधिकां
गृह्णीतेऽत्र समाजरम्यनिलये स्थानञ्च तस्याः किम् ? ।।६०।।

व्यक्तिर्नैव समाज एव गुरुतां गृह्णाति विद्वज्जनाः
शंसन्तीति परे ब्रुवन्ति जगति व्यक्तिर्निधत्ते न सः ।
व्यक्तिः सन्ततमेधयेच्च गुरुतां तेषां विचारोऽस्त्ययं
सेवित्वा सततं हितं गुरुतरं कुर्वीत ते चक्षते ।।६१।।

व्यक्तिः साधनमेव तेऽभिदधते साध्यः समाजस्त्विह
प्रौढः सोऽस्ति समाजवादिविदुषां ह्येतन्मतं वर्तते ।
व्यक्तीनां निकरात् प्रयाति जगति स्वीयां समाजः स्थितिं
स्वत्वं नो वहति स्वतन्त्रमिति च व्यक्तिस्थितानां मतम् ।।६२।।

व्यक्तिः स्वामभिलाषपूर्तिमवनौ कर्तुं समाजं शुभं
सन्नद्धा किल जायते स्वमनसा स्रष्टुं हि तस्मादियम् ।
ध्येया व्यक्तिरिहास्ति चास्य तु समाजस्य क्षितौ सद्वृतं
कार्यं यत् कुरुतात् प्रशस्तमिह सः स्यादुन्नता सा यतः ।।६३।।

अङ्गं व्यक्तिरियं तथैव हि समाजेऽप्यस्ति देहे यथा
चक्षुः श्रोत्रकरादिकं च वपुषि प्राणाख्यशक्तिर्यथा ।

ज्ञेयश्चापि तथैव विज्ञमनुजैरेषः समाजो महान्
प्राणेभ्यो बलमश्नुतेऽङ्गनिवहो व्यक्तिः समाजादियम् ॥६४॥

व्यक्तौ वर्षति शक्तिमेष विमलां प्रौढां समाजोऽनिशं
कर्त्तव्यं प्रमुखं जनस्य परमं कुर्यात् समाजस्य सः ।
सेवावर्धनपोषणाद्युपकृतीर्देहेन चित्तेन च
द्रव्येणापि यथाबलं प्रतिदिनं दासो भवंस्तस्य तु ॥६५॥

सर्वस्वं जुहुयात् समाजपदयोर्भूत्वा सहर्षं द्रुतम्
आपत् तत्र पतेद् यदा ह्यपनयेत् तां त्रायमाणो हितम् ।
संगच्छध्वमिति ब्रवीति परमस्नेहेन वेदः पिता
वाक्यं च स्मरणीयमस्ति सुतरामेकं कुलार्थं जनः ॥६६॥

चक्रेऽत्यन्तमुदा समाजरचना नैक्यक्षमायां प्रियां
नूनं सर्वसमानलक्ष्यमधुरं दृष्ट्यां निधायैव ना ।
शक्तेर्नुश्च विकासनं समुचितं तस्याथ सेवान्वहं
लक्ष्यं पावनमुन्नतं ह्यनपमं सामाजिकं शोभते ॥६७॥

आचार्या अनुबन्धवादनिरता आचक्षते सादरम् ।
एतच्चोपरिभाषितं बुधकुलं जानात्विमां सत्यताम् ।
साध्या व्यक्तिरिहास्ति साधनमथ स्फूर्जत्समाजोऽस्ति च
व्यक्त्यर्थं ह्यनुरुध्यतेऽत्र सबलं सर्वः समाजो भृशम् ॥६८॥

साध्यं साधनमत्र चोभयमपि प्रभ्राजते बन्धुवत्
श्रेयोधाम्नि समाजसंज्ञकबले प्रेयः समुद्रेऽद्भुते ।
नास्ति व्यक्तिसमाजयोर्हितधने कश्चिद् विरोधो मिथः
व्यक्तिर्हन्त पिपर्ति तं तु सततं सोऽयं समाजोऽपि ताम् ॥६९॥

व्यक्तिः साधु समाजमर्चतु सदा तं वर्धयेत् सादरं
गोपायेद् विपदश्च सोऽपि सकले तस्या हिते संलगेत् ।
व्यक्तिर्व्यक्तिगतं हितं ह्यपनयन् सामाजिकं सर्वदा
सम्यक् पातु हितं मुदा च कुरुताद् वृद्धिं तदीयां भृशम् ॥७०॥

साहाय्यं न विनोचितः कथमपि व्यक्तेर्विकासो भवेत्
तस्मान्मानसयोगपूर्वकमसौ नित्यं समाजं भजेत् ।
युक्तञ्चापि सृजेद्धिताय महते व्यक्तेः समाजः सदा
सद्वातावरणं हि जीवनसदुत्थानक्षमं सात्त्विकम् ।।७१।।

कल्याणं कुरुतां परस्परमुभौ व्यक्तिः समाजोऽपि च
भूत्वा संगठितावुदारचरितावुत्सर्गसेवारतौ ।
ऐक्यं सत्यमुदारता परहिताकाङ्क्षा सदाचारिता
कर्त्तव्येष्वनुरागदार्ढ्यममितं तत्र द्वयोः स्युः सदा ।।७२।।

निर्माता परमेश्वरोऽभिदधते केचित् समाजस्य तु
विज्ञानं कथनं निराकृतमिदं कुर्वत् परं लक्ष्यते ।
अज्ञासीन्मनुजः समाजपरकं ग्राह्यं पशुभ्यो गुणं
दृष्टत्वात् समजस्य तत्र न परं स्वीकुर्वते कोविदाः ।।७३।।

केचिद् व्याहरणं बुधा विदधते चक्रे समाजं पुमान्
एतच्चापि परे न युक्तकथनं मत्वा निरस्यन्ति तम् ।
एषः प्राकृत एव विज्ञपुरुषाः प्राहुः समाजः परम्
ज्ञेया मानवभावनात्र सुधियो हेतुं ब्रुवन्तीति च ।।७४।।

सिद्धान्ताः प्रसरन्ति सम्प्रति भवे प्रध्यामनेकेदृशाः
तान् सर्वान् व्यतिरिच्य सज्जनकुलं श्रद्धां दधत् सादरम् ।
व्यक्तान् स्वान् कुरुते विकासपरकान् सान्द्रान् विचारानिमान्
उत्पत्तिर्भवतीति नोचितवचो जातो विकासः परम् ।।७५।।

जातं तत्र समाजजन्म समये को वक्तु मेतत् क्षमः
सर्वेषां बलदा समाजसुषमा शश्वत् परिस्पन्दते ।
सास्ते मानवजीवनान्नहि पृथग् बद्धास्ति तेनैव सा
आदौ तद्गतजीवनं समभवत् चात्यन्तसाधारणम् ।।७६।।

सञ्जातश्च शनैः शनैः क्षितितले सामाजिकः पेशलः
सर्वत्रैव विकास आहुरिति च ह्यैतिह्यविद्याविदः ।

प्रत्यूहा विपदो विकासदृढतासंवृद्धिसंपुष्टिषु
साहाय्यं विदधुर्नितान्तममितं श्रेष्ठं समाजस्य च ।।७७।।

बुद्धिश्च प्रकृतिर्विचारततयः पुंसां विकासं यथा
विन्दन्ति स्म तथा समाज इह च प्राणानुकूलां स्थितिम् ।
निर्माणस्य कृते प्रकर्षगरिमोत्थानादिहेतोः प्रियां
चास्मिन्नद्य विकासवादविषये श्रद्धा नृणां दृश्यते ।।७८।।

चत्वारः परिवीक्षिता भुवि पुनः सामाजिकोत्थानगाः
उत्कृष्टा हि शुभाः क्रमा इति बुधाः शंसन्ति तत्राधुना
आद्योभून्मृगयापरस्तत इह प्रेक्षां गतो गोपगः
जातस्तत्र कृषीबलस्थितिगतश्चौद्योगिकाख्यस्ततः ।।७९।।

न व्यापादनमस्ति मानव इति स्वान्ते पशूनां दधत्
भावं पालनमेव युक्तमधिकं तेषां व्यधात् तत् पुनः ।
अस्मिन् गोपयुगे समाज उदयं प्राप्नोद् भृशं सत्वरं
अव्राजीन्निकषा मनुष्यनिवहोऽसौ साम्प्रतं सभ्यताम् ।।८०।।

उत्थानं नितरां जगाम मनुजः काले कृषेर्वस्तुतः
अस्मिन्नेव युगे व्यधात् स नगरग्रामादिकाणां स्थितिम् ।
शस्त्रास्त्राणि कलाश्च सैनिकजनाः प्राप्ता अभूवन्निह
उद्योगस्य युगे च यन्त्रविविधप्राज्यं हि सम्प्रेक्ष्यते ।।८१।।

अद्यत्वे विततानि सन्ति नितरां विस्तारपूर्णान्यपि
नाना संगठनानि किञ्च बहुलाः संस्थाश्च संघा अपि ।
एतस्मिंश्च विचारभिन्नगहना जात्यादिसत्ताकुलं
काले कार्यबहूनि भान्ति सुतरां चारुण्यचारुणि च ।।८२।।

नानाजात्युपजातिभेदबहुला अस्मत्समाजे स्थिताः
भूयांसोऽथ च सम्प्रदायगहना वृन्दं मतानां स्थितम् ।
एतद्धेतुवशादनेकलघुतायुक्तः समाजोऽस्त्ययं
सर्वत्रापि घृणाभिमानविषमा ईर्ष्यादिका जाग्रति ।।८३।।

द्वैधीभाव इमं समाजमखिलं नो भारतीयं महान्
चक्रे स्वार्थपरं न सम्प्रति मनागैक्यं हि सम्प्रेक्ष्यते।
तावत्स्वेव समाज एष विहितो भागेषु तत्रासत
यावन्तो मनुजा न तेन भवितुं शक्या कदाप्येकता ॥८४॥

शास्त्रैरप्रतिपादितास्ति विततास्माकं प्रिये भारते
निन्द्या चातितरां घृणाकुलिशताश्लिष्टेयमस्पृश्यता।
तस्मान्मानव एव मानवपरं देशोऽवजानाति हा
चात्मानं हि विधाय भिन्नमनिशं सन्तिष्ठते सोऽधुना ॥८५॥

अस्पृश्याः पुरुषा हि सन्ति भरतक्षित्यां मताः लक्षशः
तेषां स्नान्ति सचेलमेव मनुजाः स्पर्शो यदा जायते।
अस्पृश्यान् मनुजान् द्विजादिमनुजा जानन्ति नीचानिह
सङ्कीर्णान् हृदि कुत्सितान् निदधते भावाननल्पान् जनाः ॥८६॥

सङ्कीर्णत्वमुदारतारहिततामस्पृश्यता राक्षसी
सूते जात्युपजातिवादपरुषश्चैक्यात्मकं सद्बलम्।
कात्स्न्र्येनातितरां च हन्ति कुरुते चेतोऽनुदाराधिकं
दोषैतादृशहेतुना नरि नरो धत्ते जुगुप्सां भृशम् ॥८७॥

अत्रत्या परतन्त्रता नृनिवहे म्लेच्छै जनैः स्थापिता
नित्यं चाति सहस्रवर्षसमयं यावद् व्यधात् पीडिताम्।
सा दोषान् बहुलान् जनेष्वजनयत् तस्माज्जना नो धियं
संस्कृत्यां दधते न गौरवगतायां सभ्यतायामपि ॥८८॥

भक्तिं चापि न भारतीयजनता धत्ते स्वभाषाम्प्रति
हा सा मातृभुवि स्वगौरवमतिं पुष्णाति नो साम्प्रतम्।
आचारेषु रुचिर्न मानसपथे तस्याः स्थिता प्रेक्ष्यते
निन्दन्ती ह्यधिगम्यते जगति सा स्वं पूर्वजाणां मतम् ॥८९॥

नारीणां नगरेषु सम्प्रति यथायोग्या न चालोक्यते
सम्मानादरभावना परमियं ग्रामेषु नेषत् परम्।

स्त्रीसम्मानपराङ्मुखी हि जनता ग्रामेषु सम्प्राप्यते
एतस्मिन्नुदयोन्मुखेऽपि समये नीता अवज्ञाञ्च ताः ॥९०॥

अत्याचारसहस्रशोऽत्र भरतावन्यां घटन्तेऽन्वहं
पीड्यन्ते धनहीनदुर्बलजनाः सम्पन्नशक्त्यन्वितैः।
तैर्दीनैर्धनिका नितान्तसबलाः कार्याणि पूर्णश्रमैः
संसाध्यान्यपि कारयन्ति ददते नैकं पणं तत्कृते ॥९१॥

बालानां हरणं विधाय सबलं तेषां द्रुतं दुर्जनाः
अङ्गान्यंघ्रिकरादिकानि झटिति च्छिन्दन्ति हा निर्दयाः।
भिक्षार्थं प्रहितान् विधाय सकलं प्राप्तं पणादिं ततः
गृह्णन्ति क्षमताजुषो निदधते क्षुत्क्षामकण्ठान् हि तान् ॥९२॥

सौम्यान् दुष्टजना जनांश्च सरलान् कृत्वानिशं वञ्चितान्
तेषां सर्वधनं हरन्ति समुदं मार्गस्थितानां तथा।
सुप्तानामथवा च रेलशकटीयात्रागतानां बस-
स्थानां वा दिवसेऽथवा निशि धनं कुर्वन्ति सर्वं हृतम् ॥९३॥

शिक्षा यद्यपि भारतीयनगरस्थासु प्रसारं गता
पर्याप्ता महिलासु तोषपरका ग्रामस्थिता नो स्त्रियः।
नो बालाश्च परन्तु लोचनपथेऽद्यापि स्थिताः शिक्षिताः
आधिक्येन निरक्षरा हि जनता ग्रामेषु संलभ्यते ॥९४॥

आलस्यं व्यसनञ्च दम्भपरतानुत्साहदुर्भावनाः
इत्येते प्रबला हि सम्प्रति महादोषाः समाजे स्थिताः।
उत्थानं न च कर्तुमर्हति पुनस्तस्मात् समाजोऽधुना
तान् संहृत्य समाजतोऽखिलजनाः कुर्युः समाजोन्नतम् ।९५॥

अस्मद्देशसमाजतोऽखिलजना देशान्तरीयाः किल
चारित्र्यं जगृहुः पुराणसमये सम्प्रत्ययं कीदृशः।
भ्रष्टाचारगतोऽस्ति पापनिरतश्छद्मच्छलासत्यगः
सञ्जातोऽतितरां विलोक्य सुजनः कस्तं न हा दूयते ॥९६॥

विज्ञेन्द्रोऽजनि मैक्सवेवरमहान् शास्त्रे समाजश्रिते
आधारं सुदृढं सुनिश्चितमसौ चक्रे सुधीः प्रस्तुतम् ।
अध्येतुं हि समाजशास्त्रमुचितं विज्ञानरूपं प्रधीः
सम्यग् दर्शयति स्म युक्तिविधिना तस्य प्रियं पावनम् ॥९७॥

ज्ञेयं शास्त्रमिदं समाजपरकं विज्ञानमेवोज्ज्वलं
प्रादुर्भावयति प्रबोधममितं व्याख्यात्मकं प्राञ्जलम् ।
तेनायाति दिशा विलोचनपथं सम्बन्धकार्यात्मिका
जुष्टा कारणसंगतेन सततं स्पष्टस्वरूपप्रभा ॥९८॥

व्यक्तीनां च तदा क्रियास्त्यभिमता सामाजिकी वस्तुतो
गृह्णीते हि यदा प्रतीतिपरकं कर्ता तदीयं स्फुटम् ।
अर्थं किञ्च भवेत् प्रभावगमितश्चाचाररम्याभया
सञ्जायेत गतिस्तथैव दिशया निर्धारिता तस्य च ॥९९॥

प्रस्तौत्यत्र समन्वयात्मकमिदं सामान्यविज्ञानवन्
नूनं शास्त्रमिदं समाजपरकं त्रीणि प्रधीः सादरम् ।
व्यक्तानि प्रियसाधनानि विदधौ विद्योदधिर्नः पुरः
लब्धुं ज्ञानमसौ समाजपरकं सोरोकिनः कोविदः ॥१००॥

रूसाख्ये जनुरग्रहीत् सुविदिते देशे हि सोरोकिनः
चित्तोदारमतिप्रकृष्टरुचिरः प्रख्यातविद्वद्वरः ।
ग्रन्थान् सोऽरचयद् बहूंश्च शतशो लेखानलेखीत् कृती
तद्ग्रन्था नवमार्गदर्शनपराः शास्त्रे समाजश्रिते ॥१०१॥

एकैको मनुजः प्रमत्तसदृशः सम्प्रेक्ष्यते साम्प्रतं
भोक्तुं भौतिकवस्तुवृन्दमनिशं संलग्नचित्तोऽस्ति सः ।
अन्धस्तत्र परं स्थितिः कलयति त्वेषा भवेद् दारुणा
क्रान्तिः कापि घटेत शीघ्रमधिका काले समाजे नवा ॥१०२॥

सिद्धान्ता पतिताः हि चेतनबलश्लिष्टाश्च कार्याण्यपि
एतन्मानवमण्डलं निपतनस्यान्त्यां च सीमां भृशम् ।

नीत्वा सम्प्रति सन्ति विश्वनिखिले शान्त्यां महत्यामिह
काचिन्नैतिकताचरित्रपरका नो तत्र संलक्ष्यते ॥१०६॥

प्रस्थानं ह्यपरां स्थितिम्प्रति यदा पुंसोऽथवा जायते
कस्यापि व्यतिपातनस्य कथितं शास्त्रे समाजश्रिते ।
विद्वद्भिर्गतिशीलतेति सुजनैः सामाजिकी वस्तुतः
इत्यब्रूत समाजशास्त्रमतिमान् सोरोकिनः स्वं मतम् ॥१०४॥

व्यक्तिः संश्रयते समाजमखिलं व्यक्तिं समाजोऽपि च
सम्बन्धोऽस्ति परस्परं सुविशदं ह्यच्छेद्य एवानिशम् ।
व्यक्तित्वं मनुजस्य निश्चिततया सामाजिकाङ्गं सदा
विद्वद्भिः प्रकटीकृता दृढतयेयं धारणा सुस्थिरा ॥१०५॥

अङ्गं संश्रयते शरीरमनिशं येन प्रकारेण तु
व्यक्तिश्चापि समाजमेति शरणं तस्मात् तयोर्वर्तते ।
नो न्यूनं गुरु वा कदापि हि भवे सर्वं निधत्ते निजं
श्रेष्ठत्वं सुविचारशास्त्रिपुरुषैर्ध्यानं प्रदेयं समम् ॥१०६॥

सः कार्याण्यखिलानि यानि कुरुते तत्तन्मनीषावशात्
सर्वत्रैव तदा तदा हि मनुजस्तेभ्यस्तु सामाजिकाः ।
सम्बन्धा उदिता भवन्ति सुभगाः कार्येभ्य एतद् भणन्
तेषां सङ्कुलनं समाज इति टाकाण्टोऽभणत् सादरम् ॥१०७॥

सर्वेषामपि सङ्कुलत्वविधया सामाजिकानामपि
तेषाञ्च प्रतिपादनं समुचिते साध्यं तथा साधनम् ।
सम्बन्धञ्च विधाय लोचनपथे स्वाभाविकी वा क्रिया
जायन्ते च निरन्तरं भवितुमर्हन्ति प्रतीकात्मिकाः ॥१०८॥

एतस्मिञ्छतके प्रकाशमकिरन् सर्वाधिकं जीवने
पुंसां तेषु महात्मगान्धि सुधियो नामास्ति गेयं भृशम् ।
सः पक्षेष्वधिकेषु मानवगते सम्यक् प्रधीः जीवने
सद्भावा रचनात्मकान् सुविशदांश्चक्रे बुधः प्रस्तुतान् ॥१०९॥

भूयांसो मनुजा वसन्ति विविधा भिन्नाः समाजेऽनिशं
स्वार्थाः स्युर्न हता मिथश्च वसतां गान्धीति सामाजिकीम् ।
पुण्यात्मा चकमे विशुद्धहृदयो विज्ञो व्यवस्थेदृशीम्
आघातो न च सम्पतेदभिमते तेषां कदापि प्रिये ॥११०॥

आधारो भवतान् मतो जन-जनत्यागाधिकारौ सदा
आधिक्यं ह्यथवाल्पता न च भवेन्मान्याथवा जातिता ।
तत्त्वं मौलिकमेतदीयमुचितं लोकस्य निष्ठापि च
नो निष्ठाभिमतेह पक्षविषया वा सम्प्रदायश्रिता ॥१११॥

एकैको लभतां विकासरुचिरं स्वत्वं समाजेऽनिशं
स्यात् सर्वा जनता परस्परसुहृद्भावस्थिताचारभृत् ।
उत्तिष्ठेन्नितरां समाजभवनं येनात्र लोके प्रियं
स्युः सर्वेऽत्र च शक्तिशालिमनुजाः शुद्धाः प्रबुद्धा नताः ॥११२॥

मर्त्यानां प्रकृतौ निषीदति सदा द्रष्टुं नवीनां स्थितिं
काङ्क्षां संगठने जनः प्रयतते सामाजिके नव्यताम् ।
आहर्तुं भुवि वस्तुतो विहरते मूलप्रवृत्तिर्जने
तत्रैषेति वदन्ति विश्रुततमोविज्ञानविद्वद्वराः ॥११३॥

एषैव प्रबला प्रवर्तयति तं नित्यं प्रवृत्तिर्जनं
लोकेऽन्वेषणहेतुना नयनगं सामाजिकं जायते ।
एतस्मात् परिवर्तनं बलजुषो हेतोर्महामौलिकात्
इत्थं नूतनरम्यतां दधदयं क्षित्यां समाजः स्थितः ॥११४॥

अस्मिन् सन्ति च हेतवः कतिपये येषां समाजे वशात्
प्रेक्ष्यन्ते परिवर्तनानि हि विधेर्नानाविधानैर्दृढैः ।
संख्यायाः परिवर्धनादसुभृतां सन्तानजातैर्गुणैः
उद्योगैर्नवधारणादिविषयैस्तानि प्रथन्ते पुनः ॥११५॥

भ्रष्टाचारगुरुश्च भीषणयुवक्षोभो ह्यनैक्यं तमः
भाषादौर्हृदसम्प्रदायविषमौ प्रादेशपङ्कक्लमः ।

वादः क्षेत्रपरश्च भारतभुवं दुन्वन्त्यजस्रं भृशं
विद्यन्ते कठिना नितान्तगहना एताः समस्या दृढाः ॥११६॥

दोषा दुस्तरदारुणाः सुजरठाः शोच्या इमे साम्प्रतम्
उत्थानाध्वनि विघ्नभूधरगुरोः संस्थापने सर्वथा।
सन्नद्धा भरतक्षितावनुपदं तस्मात् समाजोदयो
नो शक्यो भवितुं कदापि वसुधोत्सङ्गेऽधुना वस्तुतः ॥११७॥

स्रष्टुं रूपमिह क्षमं समुचितं सामाजिकं सुन्दरं
राजन्ते बुधसम्मतानि गिरिजे चत्वारि तत्त्वानि हि।
सम्बन्धस्य निवेशनं परजने संस्तारसंयोजना
धर्म्यं संगठनञ्च मूल्यसहितं शक्तेर्व्यवस्थापनम् ॥११८॥

॥ इति नवभारतपुराणे समाजवादसंज्ञको नाम नवमोऽध्यायः ॥

अथ दशमोऽध्यायो

धर्मनिरूपणात्मकः

भारतस्यर्षिदेशस्य धर्मस्थितिं ब्रवीम्युमे ।
शृणु त्वं स्वमनो दत्त्वा सम्यक् तामद्रिकन्यके ।।१।।

धर्मप्राणो जगति विदितो गौरवश्रीप्रकृष्टो
भक्तश्रेष्ठो हरिभगवतः शास्त्रमार्गाधिरूढः ।
ज्ञानज्योतिर्मुनिकुलनुतः संस्तुतो देवताभिः
सर्वर्षीणामभिमतधनं भारताख्योऽस्ति देशः ।।२।।

यस्मात् सिद्धिर्भवति सुतरां श्रेयसां सर्वथैव
अभ्युत्थानं परमतिशयं जायते सर्वथैव ।
धर्मो ज्ञेयः स इति ऋषिभिः स्तूयते सः समोदं
तद्वैशिष्ट्यं गदति विदितो भारतीयः कणादः ।।३।।

विद्या सत्यं धृतिदमधियोऽस्तेयशौचक्षमाश्च
किञ्चाक्रोधः श्रवणनयनादीन्द्रियेषु प्रभुत्वम् ।
प्रोक्तो धर्मो दशविध इह श्रौतधर्मप्रणेता
विश्वस्तुत्यप्रथितमनुना सर्वकल्याणकर्त्ता ।।४।।

धर्मो ज्ञेयः सुमतिसुजनैः कोविदैर्धर्मधीभिः
वेदाच्छास्त्रात् स्मृतिशुचिमुखात् सद्गृहीताच्चरित्रात् ।
स्वात्माभीष्टादिति सहृदयाः धर्मतत्त्वज्ञविज्ञाः
प्राहुः प्रीत्या जनहितरताः स्वार्थशून्या महान्तः ।।५।।

देहे नष्टे सदनवसुधावन्धुपुत्रादिदासाः
चान्ये सर्वे सुजन सुहृदः सम्पदो वैभवाश्च ।

द्रव्यं नान्यत् किमपि चलति प्राणिना सार्धमत्र
एको धर्मः सुहृदनुपमो याति साकं हि तेन ॥६॥

यत् कृत्वा नो भवति निहता चारुचारित्र्यलक्ष्मीः
सत्योपेक्षा भवति विहिता येन नो कर्मणैव ।
नो चावज्ञा भवति च गुरो र्मातृपित्रादिकाणां
कर्म प्रोक्तं तदिति सुजनैर्धर्मनाम्ना प्रधीभिः ॥७॥

सत्पात्रेभ्यः समय उचिते स्थानयुक्ते प्रदानं
साहाय्यस्य प्रमुदितहृदा दीनदुःखापनोदः ।
स्वार्थं त्यक्त्वोपकृतिपरता न्याय्यकर्मानुरागः
कर्माण्युक्तः सुकृतहृदयैर्धर्म एवेदृशानि ॥८॥

नानापत्तिग्रथितपरुषक्लेशसम्पीडितानां
सेवाधर्मः सुजनविबुधै प्रोच्यते धर्मविद्भि ।
आर्ते दीने धनविगलिते रोगरुग्णे दया या
प्रीत्या कार्या भवति सततं कथ्यते सापि धर्मः ॥९॥

धर्मं श्रद्धाप्रणतमनसा मानवो यो हि पाति
धर्मोऽजस्रं तमपि सततं सावधानोऽवतीह ।
आत्मानं सः परिणतमहोरूपभेदेषु तेषु
पातुं प्रीतः प्रियमिह जनं सर्वदा द्राक् करोति ॥१०॥

वह्नौ दाहो वसति सततं नैजधर्मस्तथैव
नीरे शैत्यं वसति च तथाऽरूपता वायुमध्ये ।
एवं नित्यं वसति मनुजे स्नेहसत्योपकारा
श्चान्ये धर्मा विविधबहवस्तान् प्रयुञ्जीत सोऽत्र ॥११॥

नित्यं पुंसा हृदि च वचने भाव्यमेकेन कार्ये
तच्चित्ते यद् वसति वचसा तेन भाष्येत शश्वत् ।
यत् तद् वाण्यां वसतु वचसा कर्ममध्ये तदेव
एषः पन्थाः सकलसुजनैः कीर्तितो धर्मनाम्ना ॥१२॥

मोक्षो लक्ष्यं जगति कथितो जीवनस्य प्रधीभिः
पुंसामन्त्यं तदधिगमने मृत्युजन्मादिसर्व-
कष्टेभ्यः सन् निखिलविधिना मानवो याति मुक्तो
धर्मः प्रोक्तः सरलसुगमस्तस्य लब्धेरुपायः ॥१३॥

संवीक्ष्यन्ते भरतवसुधामानवेषु प्रभूताः
धर्मासीना वयमिति हि ये भाषमाणाः सगर्वम् ।
संश्रूयन्ते न च विमलता धर्मतत्त्वे तदीये
भूयान् दम्भो विलसति परं वस्तुतस्तत्र धर्मे ॥१४॥

सम्प्राप्यन्ते बहुलपुरुषाः धर्मवेषं दधानाः
तेषां कार्यं भवति सततं धर्मभिन्नं जनानाम् ।
मर्त्यान् लोके विविधविधिना वञ्चितान् स्वक्रियाभिः
ते कुर्वाणाः मधुरवचसा त्वद्य तिष्ठन्ति राष्ट्रे ॥१५॥

येनाधीतं मनुऋषिकृतं धर्मशास्त्रं समस्तं
किञ्चान्येषां पठितमथवा याज्ञवल्क्यादिकानाम् ।
शास्त्रं पूर्णं ह्यवहिततया दत्तचित्तश्रमेण
आचारे चेन्नहि परिणतिस्तस्य सर्वं मुधैव ॥१६॥

देशेऽस्माकं मनुजबहुलाः सन्ति ये धर्मविज्ञाः
व्याख्यातारो विपुलसुधियो धर्मशास्त्रस्य चात्र ।
विद्वांसोऽपि स्मृतिषु बहवो धर्मनिष्णातचित्ताः
येषां वृत्ते वसति सुकृतं ते कियन्तो मनुष्याः ॥१७॥

यस्याचारे निवसति सदा धर्मशास्त्रोपदेशो
धर्मज्योतिःपरमललितं दीप्यते यस्य वृत्तम् ।
सच्चारित्र्यं लसति नितरां धर्मदीप्त्या हि यस्य
धन्यो धन्यो जगति मनुजः सोऽस्ति सेव्यः समेषाम् ॥१८॥

धन्योऽर्थोऽसौ भुवि धनवतो यस्य धर्मे प्रयोगो
धन्यो गेहः स इह धरणावस्ति यो धर्मनिष्ठः ।

धन्या वृत्तिर्विविधगतिका यत्र धर्मस्य वासो
धन्योऽत्रासौ जगति विभवो राजते यत्र धर्मः ॥१९॥

धर्मग्लानिर्भवति च यदा पातुमीशस्तदा तम्
अस्यां मह्यामवतरति सोऽधर्मनाशं करोति।
धर्मं संस्थापयितुमवनौ जन्म गृह्णाति विष्णुः
साधून् सर्वानवति भगवान् दुष्टवृन्दं हिनस्ति ॥२०॥

अस्मिन् काले भवति बहुधा तादृशं कर्मधार्यं
यत्र प्रायः जगति नितरां सन्ततं धर्मशास्त्र-
ज्ञानाराध्यः सुजननिवहो विन्दति क्लेशराशिं
चिन्तां सान्द्राः निदधदधिका जीवने तत्र दृष्टाः ॥२१॥

सर्वे वर्णाः परमशिथिलाः रक्षितुं स्वं च धर्मं
विद्यन्ते ये भरतधरणावाश्रमास्तेऽपि सर्वे।
घोरं पातं भृशमधिगता दुःखमुत्पादयन्ति
सर्वं दृष्टं भवति नितरां शोकदं क्लेशदञ्च ॥२२॥

कार्यागारे नयनपथगा जायते दुःखदात्री
घोरोपेक्षा लिपिकनिकरे भारतीयेऽस्मदीये।
इष्टोत्कोचं भवति स रतः प्राप्नुते कार्यहेतोः
सर्वत्रास्ते परमपरुषा निन्दनीया प्रवृत्तिः ॥२३॥

शय्यात्यागो भवति तरणौ साम्प्रतं नोदितेऽपि
बालाः सर्वे युवकसकलाः शेरते हा प्रभाते।
वन्दन्ते नो चरणयुगलं मातृपित्रादिकाणां
स्नानं संध्यां नियतसमये नानुतिष्ठन्ति तेऽद्य ॥२४॥

देशेऽस्मिंस्ते धनिकमनुजा प्राज्यसंख्यां प्रपन्नाः
येषां सम्पन्न च परहिते नैजभोगार्थमेव।
नित्यं तस्याः विविधविधिभिः कुर्वते ते प्रयोगं
चित्तं कर्तुं परममुदितं तोषणायेन्द्रियाणाम् ॥२५॥

सर्वेषाञ्च स्वशुचिमनसा सर्वकाले द्विजानां
सेवां कुर्यादवहिततया सादरं शूद्रवर्गः ।
सेवाधर्मः परमकठिनस्तत्र न स्यात्प्रमादी
गीता ब्रूते प्रियवच इदं शूद्रकल्याणबुद्ध्या ॥२६॥

सेवाकार्यं श्रुतिरपि भृशं श्लाघते हर्षचित्ता
मन्वादीनां वचनमपि तद् यत्स्मृतौ राजतेऽद्य ।
तस्मिन् ध्यानं निदधति जना नो मनाक् सन्ति येऽत्र
सर्वं ह्येतद् भवति विदितं प्रेक्ष्य कार्यस्थलानि ॥२७॥

ये ये धर्मा इह निगदिता प्राञ्जलाश्चाश्रमाणां
देशेऽस्माकं समुचिततया सर्ववर्णाः स्वधर्मम् ।
विन्दन्तां द्रागथ च निखिला आश्रमाः स्वञ्च धर्मं
धर्मोत्कर्षं भरतवसुधा गायति ह्लादमाना ॥२८॥

वासस्तोयं तिलमथभुवं गन्धयुक्तां यथा द्राक्
पौष्पो गन्धः सपदि कुरुते सज्जनानां तथैव ।
संसर्गोऽपि क्षिपति झटिति स्वप्रभावं ह्यमोघं
तस्मात् सर्वैरपि तनुधरैः साधुसंगो विधेयः ॥२९॥

मन्दैः सार्धं भवति निहता धीः समेषामवश्यं
कं कं मोहो झटिति मनुजं नात्र लोके हिनस्ति ।
धर्मोत्पत्तिं सुजनजगती सर्वथावश्यमेष
कृत्वा श्रेयश्चरति सततं सर्वपुंसां सहर्षम् ॥३०॥

सङ्गः श्रेष्ठः सृजति शुभगां शेमुषीं धर्मनिष्ठां
भक्तिं भव्यां भगवति भृशं मानसं संस्करोति ।
आचारं सच्चरणनिरतं मङ्गलैः सद्गुणैश्च
युक्तं कुर्वन् भवहितपरं मानवं मार्ष्टि भूयः ॥३१॥

गार्हस्थ्यस्थो यमनियमवान् संयमी सन् स्वबन्धून्
गोपायन् स्वास्तनयतनयाः प्रेयसीं सर्वबन्धून् ।

शिक्षां दीक्षां सपदि वितरन् सर्वसंस्कारशुभ्रान्
कृत्वा तेषां समुदमनिशं जीवनं सम्प्रभाष्टुं ॥३२॥

नित्यं कार्यः परमविमलो बन्धुषु स्नेहभावः
ते स्युः सर्वे प्रगतिपरकाः उन्नताः कीर्तिमन्तः ।
रम्यामेतां मनसि ललितां कामनां सर्वदैव
कुर्यात् साधुर्भगवति मनः स्थापयन् सद्गृहस्थः ॥३३॥

हृन्तैते नो निखिलगृहिणः साम्प्रतं देव पितॄन्
संलभ्यन्तेऽतिथि-गुरुजनान् भूतवृन्दं च देशे ।
प्रीत्यार्चन्तो भवपतिर्हरिं मानसेन स्मरन्तः
शृण्वन्तश्च प्रियहरिकथां साधुवृन्दं भजन्तः ॥३४॥

युद्धा शुभ्रा समयविषमादाश्रमाणां व्यवस्था
आर्षे चास्मिन् नयनपथगा जायते कुत्र राष्ट्रे ।
वानप्रस्थी क्वचिदपि कुतो वीक्ष्यते भारते नः
जातो लुप्तो विधिगतिवशादाश्रमोऽयं तृतीयः ॥३५॥

शून्या एवाखिलवनधराः आश्रमः क्वापि नैषः
आध्यात्मिक्यो हृदयसुखदाः नापि चर्चाश्च तत्र ।
संश्रूयन्ते विपिनधरणौ कारणादद्य तस्मात्
नो धूम्रो नो यजनसुरभिः पर्णशालापि नास्ति ॥३६॥

"अर्थो कस्मिन् क इह विपिने साधुवैखानसोऽस्ति
धर्मासवतक्षितिपतिसुता-शब्द ईदृक् कुतोऽस्ति ।
नो श्रूयन्ते वनगतमहीपर्णशालासु पाठाः
वेदानीनां न च वनशुकास्तान् निशम्य ब्रुवन्ति ॥३७॥

क्वाद्याटव्यां लघुलघुतरून् वारिणा तोषयन्त्यो
दिव्यज्ञानोदधिशुचिहृदां हन्त बालाः ऋषीणाम् ।
क्वास्ते रम्यो विपिनवसुधाभूषणं चाश्रमोऽपि
कण्वस्यर्षेः प्रियकुलपतेर्वेदशास्त्रादिधाम्नः ॥३८॥

सर्वत्र स्निह्यति जगति यः सर्वसेवानुरागी
यस्य स्वान्तं शुभमतिमतो द्वेष-मात्सर्य-लोभ-
कामक्रोधप्रभृतिरहितं ज्ञानसत्कर्मनिष्ठो
यस्याचारो भगवति रतः क्वास्ति संन्यासभृत् सः ॥३९॥

संन्यासस्थो यमनियमवान् स्वार्थशून्यः कुतोऽद्य
विद्वान् धीरः प्रकृतिविनयी चित्तजेतेन्द्रियाणाम् ।
शास्ता त्यागी परमविजनस्थानसेवी धरित्री-
शय्यो योगी सरलहृदयो ज्ञानदीप्तस्तपस्वी ॥४०॥

वैशिष्ट्यं ये निगदितमिदं तदविधं संश्रयन्ति
देशे न्यूना विमलचरिताः साम्प्रतं ते विरक्ताः ।
लोकोत्थानं भुवि विदधतो जीवनं यापयन्ति
पुंसां लोके विपदमखिलां वारयन्तः सदैव ॥४१॥

कार्यं कर्माचरति हि फले कर्मणां नाभिलाषी
नासौ कस्मिन्नपि च मनुजे द्वेष्टि नो क्वापि काङ्क्षाम् ।
धत्ते ज्ञानी त्यजति सकलं कर्मराशिं समस्तं
सः संन्यासी भवति मनुजः प्रब्रवीतीति गीता ॥४२॥

निद्रां हित्वा सवितुरुदयात् प्राक् सदा ब्रह्मचारी
नित्यं कर्माखिलमपि हृदा दैनिकं स्वं विधाय ।
पाठे लग्नोऽभवदतितरां पालयन् शिक्षकाणाम्
आज्ञां प्रीत्या प्रतिदिनमिह स्वान् गुरून् संसिषेवे ॥४३॥

एतच्छ्लाघ्यं वटुजनजगत् कर्म नित्यं पवित्रं
कुर्वद् दृष्टं नयनपथगं सर्वदा जायते स्म ।
क्वास्मिन् काले भवति जगती प्रेक्षिता सा वटूनां
विद्वत्सेवानिरतहृदयाऽऽदेशरक्षानुरक्ता ॥४४॥

कामं कार्यं परमकठिनं स्यात् प्रदत्तं गुरूणां
ते छात्रास्तन्मुदितमनसा सर्वदा कर्म चक्रुः ।

सेवां कृत्वा हृदयमभवन्मोदमग्नं हि तेषाम्
आज्ञां धर्मं प्रथममतुलं मेनिरे ते गुरूणाम् ॥४५॥

स्वस्थं पुष्टं बलनिधिवपुस्तोषदं सर्वदाभूत्
तेजोधामानुपमवदनं कस्य चित्तं न जह्रे ।
व्यायामैस्ते सकलवटवश्चाह्निकैः स्वच्छचित्ताः
प्राणायामैर्गिरिसमदृढं चक्रिरे स्वं शरीरम् ॥३६॥

अस्मद्राष्ट्रं पुनरपि कदा तादृशैः स्वस्थदेहैः
स्वच्छस्वान्तै र्निशितधिषणैर्ब्रह्मविद्यानवद्यैः ।
धीरैर्वीरैर्विमलचरितैर्ज्ञानतेजःप्रदीप्तैः
रम्यं भव्यं जगति युवभिः सर्वथा स्यान्मनोज्ञम् ॥४७॥

आज्ञां छात्राखिलवसुमती पालयेत् प्राप्य हर्षम्
आचार्याणां पुनरपि कदाऽऽराधनं किञ्च तेषाम् ।
मत्वा धर्मं प्रमुखमधुरं भाग्यभव्यां प्रशस्तां
स्वां मन्येताधिकसुकृतिनीं पूर्णधन्यां जगत्याम् ॥४८॥

शुद्धस्वान्ताः शमदमतपोऽलङ्कृताः शान्तिमन्त-
र्ज्ञानज्योतिर्धवलचरिताः आर्जवेणाभिवंद्याः ।
विज्ञानज्ञाः शुचिरुचिभृतः सर्वदाऽऽस्तिक्ययुक्ताः
अत्रत्याः सर्वेऽवनिसुरजनाः सर्वसेव्या बभूवुः ॥४९॥

नो तत् तेजो न च शमदमक्षान्तिशौचार्जवाणि
ज्ञानश्रीः नो विलसति तपो द्योतते तेषु दिव्यम् ।
नो विज्ञानं भवहितरतं नैव कृष्णे च भक्तिः
अत्रत्याः हा क्षितिसुरजनाः पूर्वजैर्नाद्य तुल्याः ॥५०॥

येषां शौर्य्यादखिलजगती सर्वदा वेपते स्म
येषां तेजः गुणगणमयीं भूमिसर्वां च चक्रे ।
दाक्ष्यं दानं धृतिबहुदृढा जन्यमह्यां बलं तत्
येषु प्राप्तं हरिपदरताः क्षत्रियास्तेऽद्य कुत्र ॥५१॥

यस्या दानं जगति विदितं वैश्यजातेर्बभूव
यस्याश्चक्रे कृषिमतिशयामुन्नतां भारते धीः ।
याऽगौप्सीत् स्वं प्रियपशुधनं नैजराष्ट्रे सदैव
वैश्यानां सा त्रिभुवनपतेर्भक्तिसक्ता क्व जातिः ॥५२॥

सङ्गः साधोर्जनयति जने पूर्णवैराग्यभावं
तस्माच्चित्तं भवति विमलं मोहमात्सर्यशून्यम् ।
शान्तं ध्यानप्रियमतितरां चिन्तने श्रीहरेश्च
लीनं नित्यं निहतदुरितं पावनोदारनम्रम् ॥५३॥

साधावेषा शुचिगुणततिः शोभतेऽनारतञ्च
शीलं सत्यं धृतिरुपकृतिः साम्यधीरप्रमादः ।
सच्चारित्र्यं स्थिरमतिरतिर्निर्विकारस्वभावः
ज्ञाने श्रद्धा हृदि सरलता वश्यता चानुकम्पा ॥५४॥

ऐक्ये प्रीतिर्धवलचरिते किञ्च नित्यं प्रकृष्टा
संशोभन्ते मुदितहृदयाः साधुचित्ते प्रियाभाः ।
धर्मं सन्तोऽभिदधति मुदा सुन्दराचारमूलम्
सर्वे तस्मिन् भरतधरणीवासिनः स्युः प्रसक्ताः ॥५५॥

ईशं धर्मः श्रयति सततं यत्र सर्वेश्वरोऽस्ति
धर्मो वासं सुखितमनसा तत्र नूनं करोति ।
यत्र श्रीशो वसति च जयस्तत्र नो संशयोऽस्ति
प्रोचे चैतन्मधुरवचनं व्यासपूज्यो महर्षिः ॥५६॥

नो संलब्धा भवति मनुजैरीशभक्तिस्तु मन्ये
यज्ञैर्दानैरुपकृतिजपैर्वेदविद्याश्रयेण ।
सूर्यं वह्निं सलिलमथवा पर्युपास्यान्वहञ्च
तस्या प्राप्तिर्भवति सततं सेवया सज्जनानाम् ॥५७॥

आश्रित्याग्निं सपदि च यथा शैत्यकष्टस्य नाशः
सद्योऽस्माकं भवति तिमिरं क्षीणतां याति भानोः ।

सेवित्वा सत्पुरुषचरणौ सन्मतिः प्राप्यते च
मोहध्वान्तं भवति च हतं चाधयो व्याधयश्च ॥५८॥

आयुर्दीर्घं किरति च धनं चित्तकाङ्क्षानुकूलम्
इष्टान् सूनूनपि च सुखदान् चारुचारित्र्यलक्ष्मीम् ।
सूते सद्यः शुचिपथजुषां मानवानां निमित्ते
सर्वान् दोषान् सपदि हरते साधुसङ्गो जगत्याम् ॥५९॥

आचारस्थो भवति सुजनः प्राप्नुते काङ्क्षितं स्वं
विद्यां कीर्ति स्वजनसुखदां विन्दते शीघ्रमेव ।
बन्धूनिष्टान् धनबलधियां जायते सागरोऽसौ
मानश्रेष्ठं झटिति लभते राज्यतेजः कलाश्च ॥६०॥

आचारं ये निदधति जनास्ते लभन्ते ह्यजस्रं
श्रेयः प्रेयो गुरुतमगुणान् मङ्गलं स्वेप्सितञ्च ।
सर्वास्तेषां कठिनकठिना आपदो यान्ति नाशं
ये नाचारं दधति मनुजाः प्राप्नुवन्त्यप्रतिष्ठाम् ॥६१॥

अस्माद् राष्ट्राद् भरतभुवनाद् भारतात् सर्वदेशाः ।
सच्चारित्र्यं शुभमधिगतं शेकिरे प्राप्तुमेव ।
सत्सौभाग्यं विपुलपुरुषा एव राष्ट्रस्य तस्य
न स्वाचारं भृशदृढतया पालयन्त्यत्र काले ॥६२॥

यस्मिन् देशेऽखिलसुखमपि तत्यजुर्भारते स्वं
त्रातुं वृत्तं परमविमल सर्वसंसारवंद्यम् ।
तस्माद्धेतोर्भरतवसुधां माननीयां हि देशाः
भक्त्या प्रीत्या प्रणतनिटिलाः आदरेण प्रणेमुः ॥६६॥

आचारैः स्वैर्जनहितकरैः श्लाघनीयावदातैः
विद्योद्दीप्तो नयपथगतो गान्धिपूज्यो महात्मा ।
श्रीराजेन्द्रो गुणनिधिबुधो नेहरू श्रीपटेलः
राजा शास्त्री भरतवसुधामार्चिषुः श्रीसुभाषः ॥६७॥

अस्मद्राष्ट्रे सकलपुरुषाः स्युः सदाचारवन्तो
येन क्षिप्रं पुनरपि वयं भारतीयाः समस्ताः।
एतं देशं मुनिऋषिभुवं रामकृष्णादिकानां
योग्याः कर्तुं गुणगणनिधिं स्याम विश्वाभिवंद्याः ॥६५॥

देशेऽस्माकं हृदयनयनानन्ददाने पराणि
स्थाने स्थाने धनिसुकृतिभिः स्थापितानि प्रियाणि।
ग्रामे ग्रामे पुरि पुरि तथा मन्दिराण्युत्तमानि
श्रेष्ठोत्कृष्ट - प्रथितपरमोदात्तरम्याकृतीनि ॥६६॥

आशोदीच्यां हिमधरनगे शोभते दिव्यशोभं
भव्याकारोल्लसितबदरीनाथविश्वप्रसिद्धम्।
आभाधामानुपमसुषमं मन्दिरं मन्दिरेषु
मूर्धन्यं सत् तुहिनजगतीं तद्धसद् राजतेऽलम् ॥६७॥

विश्वाराध्यो भुवननिखिलाधीशकारुण्यधाम
भक्तस्वान्तप्रिययतिमतिश्रेष्ठगेहाधिवासी।
सर्वत्राता चरजडजगद् व्याप्य संशोभमानः
नानावृक्षावृतनगगते शोभते स्वाश्रमे सः ॥६८॥

सर्वा सृष्टिः प्रणमति शिवं यं सदा पार्वतीशं
भक्ताभीष्टं झटिति मनसो यो ददाति प्रसन्नः।
भूत्वा शम्भुर्जगभरणस्वान्तगङ्गाधरोऽसौ
रम्ये रामेश्वरमिति शुभे धाम्नि पुण्ये विभाति ॥६९॥

यस्य स्वान्ताभिमतमखिलं प्राप्नुवन्ति स्वकीयं
देवा दैत्याः सकलभुवनप्राणिनोऽनुग्रहेण।
भूत्वा शम्भोर्जननमरणादिव्यथाभ्यो हि दूरे
मोक्षं यान्ति प्रभुशिवममुं भस्मभव्यं नमामः ॥७०॥

विघ्नेभ्योऽपाद् व्रजवसुमतीं बाल्यकाले बहुभ्यः
क्षिप्रं दुष्टान् कुपथपथिकान् भूमिपालादिकान् यः।

सन्मार्गस्थान् जगति विदधावर्जुनं गीतया च
मोहध्वस्तं तमखिलपतिं द्वारकेशं नमामः ॥७१॥

प्राचीमाशां हृदयकरुणो भूषयन् राजतेऽसौ
स्वस्रा सार्धं सुजनसुखदः श्रीसुभद्राख्यया च ।
रामभ्रात्रा दुरितहतिकृच्छ्रीजगन्नाथ ईड्यो
भक्तत्राताखिलभवपतिर्योगिचेतोनिकेतः ॥७२॥

रामो राजा जनकतनयावल्लभः कोशलेशो
हत्वा लङ्कापतिदशमुखं साधुदेवर्षिवृन्दम् ।
अप्रीणाद् यो निखिलविपदां ध्वंसकारी कृपालुः
सोऽयोध्यायां सुजनशरणं शोभते दीनबन्धुः ॥७३॥

गङ्गावासो मुदितमनसा यस्य नित्यं जटासु
मौलौ चन्द्रो वसति च मुदा यस्य शश्वच्च शम्भोः ।
यस्य ग्रीवां प्रचुरफणिनोऽध्यासते भीमकायाः
सः काशीस्थो जयति जगतीवन्दितो विश्वनाथः ॥७४॥

शोभाधामप्रथितनगरीं स्नेहभावेन शश्वत्
रम्योदारानुपममथुरां मोदचित्तां मनोज्ञाम् ।
भानोः पुत्री भजति यमुना स्नेहसान्द्रानिशं यां
तस्यां प्रीत्या वसति भगवान् द्वारकाधीशकृष्णः ॥७५॥

श्रीकृष्णस्यानुपमरमणक्षेत्रवृन्दावनेऽस्मिन्
पुण्यैः रम्यैः परममधुरे पावने पावनानाम् ।
लीलाकुञ्जैः प्रकृतिमधुरैर्द्योत्यमाने नितान्तं
राधादिव्यच्छविसुललितैः शोभते रङ्गनाथः ॥७६॥

लक्ष्म्या लोकोत्तरललितया स्वान्तमोदप्रदातृ
स्वच्छोद्दामद्युतितमिलनाडूप्रदेशे मलाई-
स्थानोत्तुङ्गे विलसतितमां मन्दिरं स्वामिनाथ-
स्वामिश्रेष्ठं यदतिरुचिरं सान्द्रभक्त्या नुमस्तत् ॥७७॥

रम्यारामे वृषरविपुरे शोभयालिङ्ग्यमाने
क्षामक्षोणीधरसुललिते दिव्यशोभाभिरामे ।
कृष्णश्यामाच्छविसु मधुरं मन्दिरं श्रीजनन्याः
राधाख्यायाः समुदितविभं शोभते कान्तिकान्तम् ॥७८॥

गोपीवृन्दप्रियपरिकरे द्योतमानां दयार्द्रां
श्रीकृष्णस्य प्रियरसमयोदात्तसत्प्रेमधाम ।
सौन्दर्याब्धिच्छविगुणसमुद्दीप्तरूपप्रकर्षां
राधोदारां मृदुलसरलस्वान्तसौम्यां भजेत ॥७९॥

नन्दग्रामोन्नततरमहीमञ्जुलक्ष्मीललामे
नन्दानन्दप्रियहरिपदाम्भोजसेवानुरागैः ।
भक्तप्रह्वैर्बहुलविविधैर्गोपसंघैर्मनोज्ञे
नन्दस्वान्तप्रियसकरुणं कृष्णचन्द्रं श्रयेत ॥८०॥

मह्यामस्यां विदितमचलं नाम गोवर्धनं तं
श्रीकृष्णेशोऽमरपतिरुषः शीघ्रमुत्थाप्य सर्वाम् ।
योऽगोपायद् व्रजवसुमतीं सङ्कटानां निहन्ता
तं सर्वेशं मृदुलमनसं पूजनीयं स्तुवीत ॥८१॥

अम्बां कालीमखिलजगतः कालिकाताप्रतिष्ठां
विश्वत्रात्रीं निखिलविपदां नाथयित्रीं विधात्रीम् ।
दात्रीं शश्वद् विविधविभवश्रीयुतानां सुखानां
ज्ञानज्योतिर्वितरणपरां प्रह्वमौलिर्यजेत ॥८२॥

कल्याणानामनुपमनिधिः सास्ति कारुण्यधाम
आनन्दानाममृतसदृशां वृष्टिकर्त्री ह्यजस्रम् ।
दिव्यैश्वर्यैः सुपथगतिभृद्भक्तरक्षासुलग्ना
काली माता सविनयमियं स्तूयते सान्द्रभक्त्या ॥८३॥

येषां चित्ते भृशकुटिलता कुत्सिता पापपूर्णाः
दुष्टा भावाः कपटविविधा लोकहानौ च लग्नाः ।

सर्वांस्तान् यः सपदि हलभृत् कामपालो हिनस्ति
भूत्वा सः सदयहृदयो राम ईड्येत नित्यम् ॥८४॥

येषां पुंसां शुचिशुभपथे जीवनं सर्वदैव
प्रीत्यारूढं निखिलजगतीप्राणिनां ये मनुष्याः ।
सेवां शश्वद् विदधति मुदा स्वार्थसर्वं विहाय
तेषु स्वां सोऽपरिमितकृपां वैद्यनाथो निधत्ते ॥८५॥

साहाय्यं ये विदधति सदा दैन्यदारिद्र्यभाजां
सेवन्ते ये निजगुरुजनान् भक्तिभावेन नित्यम् ।
पीडां मर्त्यो हरति सकलां यः सदापीडितानां
तेषां रक्षां जगदधिपतिः सर्वदेशः करोति ॥८६॥

ब्रह्माण्डं योऽखिलमपि हरिः सर्वथा संबिभर्ति
ब्रह्मा शम्भुर्विबुधसकला वासवो यक्षसिद्धाः ।
गन्धर्वाश्चाखिलमुनिजनाः शक्तयः सर्वदैव
यं वन्दन्तेऽपरिमितदयं सः कृपां स्वां करोतु ॥८७॥

ब्रह्मा शर्वस्त्रिगुणरुचिरामात्ममायां प्रपन्नो
हेतुर्मुख्यो विकृतिरहितः शान्तशुद्धस्वभावः ।
सर्वाधीशः क्रतुयजनभृत् पावको मन्त्र आज्यम् ।
ऋत्विग् वह्निर्हवनसमिधोऽन्यच्च सर्वं त्वमेव ॥८८॥

सम्प्राप्यन्ते भरतवसुधावासिमर्त्येषु शैवाः
केचिच्छाक्तास्तदितरजनाः वैष्णवाः सन्ति केचित् ।
जैनाः केचिज्जिनपदरताः सन्ति केचिच्च शिष्याः (सिक्खाः)
एषां मान्यो भगवदनुगो नानकः साधुपूज्यः ॥८९॥

आर्याः केचिच्छ्रुतिपथगता निर्गुणोपासकास्ते
श्रौतस्मार्ता इह च सगुणं निर्गुणं पूजयन्ति ।
भक्त्या युक्ता, अथ च बहवो मानसं स्वं कबीरे
दादूसाधौ निदधति जना केचिदन्यत्र चित्तम् ॥९०॥

अस्मिन् देशे बहुमतगताः साम्प्रतं सन्ति मर्त्याः
केचिन्मार्गं कमपि मनसाऽऽश्रित्य मार्गं च केचित् ।
भिन्नं चान्यं परमसुखिताः जीवनं यापयन्ति
सम्प्रेक्ष्यन्ते विविधबहुलाः वस्तुतः सन्ति धर्माः ॥६१॥

तस्माद्देशे मतिविरहिता धर्ममादाय मर्त्याः
केचिच्छोच्यं कलहमधमं योजयन्ते महान्तम् ।
यस्मिन् कस्मिन् समयनियते दारुणं यत्र तत्र
हेतोरस्माद् बहुजनधनक्षीणता जायतेऽत्र ॥६२॥

जातीयाः सन्ति च बहुविधा भाव-विश्वास-निष्ठा-
सीना धर्मा इह हि धरणौ तेन नो जायतेऽत्र ।
ऐक्यं मर्त्येष्वथ च विमलं किञ्च संघो महीयान्
जायेतेऽतो भरतवसुधा दूयमाना नितान्तम् ॥६३॥

ईसाधर्म इहावनौ हि नितरां सर्वत्र सान्द्रो भवन्
विस्तीर्णोऽस्ति जनास्तमेव मनसा चालम्बयन्तोऽधुना ।
दृश्यन्ते न तु हन्त ते परमहो ईसामते संस्थिताः
हिंसाकर्मणि ते रता अनुदिनं ते वस्तुतो दम्भिनः ॥६४॥

अस्मिन् देशे निवसति चिराद् यस्य धर्मेसलामः
संघोनाम्ना 'यवन' इति सः सर्वभूमण्डलेऽत्र ।
अस्ति ख्यातो भवति तु परं क्लेशदाता कदापि
भूम्यामस्यामभिमतमते धर्ममूले प्रगाढः ॥६५॥

मान्द्यात् पुंसां भवति कलहो वस्तुतो भारतेऽस्मिन्
यो नो धर्मो भवति स मतः सर्वथेत्येष धर्मः ।
जातोऽधर्मो भरतवसुधामण्डले हन्त धर्मः
तस्माद् धर्मः कलहजनको मानवाः व्याहरन्ति ॥६६॥

धर्मो ब्रूते ऋषिमुनिजना वेद-विज्ञानविज्ञाः
विद्वांसश्चाखिलसुमतयो यं सदा संश्रयन्ति ।

सर्वाधीशं सगुणमपि यं निर्गुणं पूजयन्ति
सोऽयं शश्वत् प्रिययतिमतिर्वल्लभो नः समेषाम् ॥९७॥

ईक्षन्ते यं पितरमनिशं पावनात्मान ईशं
ज्योतिर्गूढं परमभिमतं वाङ्मये ब्रह्मणि त्वाम् ।
आद्यं तुर्यं पुरुषमतुलं सच्चिदानन्दनाथं
सर्वे मर्त्यास्तममितदयं मोक्षहेतोर्भजेयुः ॥९८॥

सर्वस्थानस्थितहितमयीं त्वां नमामो नमामः
भक्त्या सर्वे मनुजमहिलाः बालवृद्धा युवानः ।
श्रेयः प्राप्तुं जननि जगतां पालने दत्तचित्तां
रुद्राणीं त्वाममितकरुणाम्भोधिदेवीं नमन्ति ॥९९॥

नाभिर्व्योमाऽस्त्यनलवदनं चाम्बु रेतश्च शीर्षं
द्यौः सन्त्याशा श्रुतिगण इला चाङ्घ्रिरास्ते शशाङ्कः ।
स्वान्तं सूर्यो नयनमुदितं सागरो यस्य मन्ये
ईशानस्योदरमभिभजेः सन्ततं त्वं ह्यनन्तम् ॥१००॥

सर्वस्याः यः शशिधरशिवः कारणं संहृतेर्हि
सृष्ट्याः शम्भुर्वसनरहितो भस्मभूत्या परीतः ।
कैलासाद्रौ वसति समुदं यो भजन् रामनाथं
गौरीशोऽसौ जगति किरतान्मङ्गलं नित्यमेव ॥१०१॥

तत्तत्तीर्थसमग्रमन्दिरशुभस्थानानि भद्रक्षम-
क्षेत्रश्रेष्ठसरोवरनदान् सर्वाचलानां चयम् ।
नद्यब्धीन् वनकन्दरास्तरुलताः दिव्याश्चरान् स्थावरान्
पुण्यानादरपूर्वकं सविनयं भक्त्या नुमः पावनान् ॥१०२॥

सर्वत्रैव सुसान्द्रभक्तिरुचिरस्वान्ता धरित्र्यां जनाः
अद्यत्वे रचितं पठन्ति तुलसीदासेन रामायणम् ।
ग्रन्थोऽयं जगतीहिते त्वतितरां लग्नोऽस्ति काले कलौ
गीताप्रैस इहास्ति कर्मणि रतो ग्रन्थेदृशख्यापने ॥१०३॥

एतस्यां भरतक्षिताविह युगे ते साधवो नाधिकाः
प्रेक्ष्यन्ते जगतोहितस्थहृदया विश्वोपकारे रताः ।
ज्ञानाभाललिताः पवित्रमनसः शास्त्रद्युतिद्योतिताः
ईशप्रेमपरायणाः शुचिधियः सेवाप्रियाः सज्जनाः ॥१०४॥

इत्थं यत्र प्रतिदिनमहो भारते भक्तियुक्ताः
मर्त्या भूत्वा विमलहृदया ईश्वरं संस्मरन्ति ।
श्रद्धानम्रा हरिभगवतः पापहर्त्रीं कथाञ्च
शृण्वन्ति स्वैः सह परिजनैः सन्ति ते धर्मनिष्ठाः ॥१०५॥

येषां चित्ते वसति विषयो लौकिकः सर्वदैव
सर्वेशं ये हृदयरहिता हा भजन्ते जपन्ति ।
सन्तिष्ठन्ते भरतवसुधावासिनस्ते प्रभूताः
तेषां स्वान्ते प्रचुरविविधाः कामनाः वान्ति नित्यम् ॥१०६॥

अस्मिन् देशे बहुलमनुजैर्धर्मकृत्यं हरेश्च
सेवा-पूजाः स्मरणभजने त्वर्जनाय क्रियन्ते ।
अर्थस्याद्य प्रमुखविधिभिर्वासरे किञ्च रात्रौ
दम्भाक्रान्ता भरतधरणी वीक्ष्यतेऽवश्यमेव ॥१०७॥

अद्य प्रायः पुरुषनिवहो जीवनेऽस्ति स्वकीये
शुद्धस्वान्तश्चरति न महामानवानां चरित्रे ।
नो साधूनां हितकरवचश्चेतसा संशृणोति
तस्माद् धर्मो मुदितहृदयो नेक्ष्यते वस्तुतस्तु ॥१०८॥

भूयाद् धर्मो भरतभुवने पूर्णरीत्योन्नतोऽत्र
धर्मो बन्धुः सुहृदपि च सः पूरुषो याति मृत्युम् ।
एकोऽसावेव सह हि यदा कोऽपि नान्यो जगत्यां
तस्माद् धर्मो विमलमनसा सेवनीयः सदैव ॥१०९॥

॥ इति श्रीनवभारतपुराणे धर्मनिरूपणं नाम दशमोऽध्यायः ॥

अथैकादशोऽध्यायः

नवपुरातनार्थिकविवृतिः

समाजे प्राक्तने तत्त्वं नैतिकं किञ्च धार्मिकम् ।
मानवा जगति प्रीत्या पूजयन्ति स्म सर्वथा ॥१॥
विचार आर्थिकस्तस्मात् सिद्धान्तोऽप्यथ पार्वति ।
धर्म दर्शन सम्बद्धो विललास महीतले ॥२॥

एतेन हेतुना धारा नार्थिकी बलमाश्नुत ।
दृष्टा सा दुर्बला लोके विकासं न ययाविह ॥३॥
हेनी प्रोफेसरो ब्रूते जीवनादार्थिकात् तदा ।
नैतिकं हि मतं ज्याय आर्जवं तत्र चार्चितम् ॥४॥

आसीद् दार्शनिकी दृष्टिः सरलाथ च सात्त्विकी ।
भेदो न कोऽपि लब्धोऽभूत् तत्र तत्र च वस्तुतः ॥५॥

अत्राचारश्च नीतिश्च ह्यर्थश्चापि मताः समाः ।
मान्यतायां न भेदोऽभूत् नैतिकत्वं समस्फुरत्[1] ॥६॥

विनिमयोपसंहारे महत्त्वं जनता ह्यवेत् ।
व्यापारस्य च कस्यापि नाणकस्य यथायथम् ॥७॥

यूनानिन इमां चक्रुः समस्यां विदितां भुवि ।
प्रतीच्यानां विचारोऽयं पठ्यते कृतिषु प्रियः ॥८॥
प्रागर्थपरका धारा आसन् भौतिकवस्तुषु ।
चिरविरहितास्तस्मात् न ता वृद्धिमवाप्नुवन् ॥९॥

---

१. (द०) तिलक नारायण 'कृत आर्थिक विचारों का इतिहास'। पृ०१

प्रभुतायाः प्रधानत्वाद् व्यष्टिपरा स्वतन्त्रता ।
निर्णयस्थानराहित्यं चार्थोऽभूत् कृशकायकः ॥१०॥

जाताः पुरोहितास्तत्र सावधाना अहर्निशम् ।
सर्वविधापि वृद्धिस्तु प्रत्यसिद्ध्यत् पुराऽप्रिया ॥११॥

निर्धनहितमुद्दिश्य वाणिज्यं साङ्कुशं कृतम् ।
आदातुमुचितं मूल्यं चाज्ञा क्रूरतमा कृता ॥१२॥

श्रमे कृषौ च सम्प्रेक्षा प्रदत्ताभूत् तदा भृशम् ।
यूनानिनस्तु विद्वांसो धर्मनीतिरता बभुः ॥१३॥

सस्योत्पत्तौ धरा नित्यं स्याच्छश्वच्छक्तिशालिनी ।
एतदर्थं बुधो भूमि मकृष्टां निदधौ ध्रुवम् ॥१४॥

षट्स्वब्देषु व्यतीतेषु सप्तमे साव्यश्राम्यत ।
हृतभूमिजनश्चापि शतकार्धे ह्यवाप्तवान् ॥१५॥

आसीदर्थपरा धारा धर्मनीतिकरस्थिता ।
तस्मादर्थविकासो न तेषां सन्तोषदोऽभवत् ॥१६॥

अर्थमुद्दिश्य यो रोमः स्वं विचारमदीदृशत् ।
एतादृशविचारेषु नो रुचिस्तस्य सम्बभौ ॥१७॥

यूनानप्रभावे तत्र विचारो योऽपि विद्यते ।
मौलिकता न तत्रास्ते तस्मान्न हरते मनः ॥१८॥

न्यायशास्त्रं तु रोमस्य नाद्रियत मनागपि ।
मानवस्याधिकारं तत् उपैक्षिष्ट च सन्ततम् ॥१९॥

तस्मादादौ स्थितिस्तत्र चिन्तनीया ह्यवर्तत ।
ऋणदातृजनैर्दासाः अर्थमार्गाः कृताः जनाः ॥२०॥

सामुदायिकमीशत्वं सम्पत्तौ स न सोढवान् ।
वृद्ध्या च जीवनं तस्मै नारोचत कदापि च ॥२१॥

जातोद्भवोऽप्रियनिरङ्कुशराजतन्त्र-
राह्रोर्गतश्च विलयं समयेन किञ्च ।
वाणिज्यवाद उदितः क्षितिजे हि तस्मिन्
शंसन्ति शास्त्रविदिता इति चार्थतत्त्वे ॥२२॥

विचारेण न्युमैनस्य सन्धिकाल युगान्ततः ।
मह्यां समुदिता क्रान्तिरामेरिकी सुविश्रुता ॥२३॥
अर्थस्थिता विचारा ये तेऽभूवन् वणिजां प्रियाः ।
दृष्टा न जनता तत्र ह्यर्थरोधोऽभवद् भृशम् ॥२४॥

अर्थमतेर्निरुद्धत्वाद् गतं सर्वं निरर्थकम् ।
यत्रार्थस्य विकासोऽस्ति वैभवं तत्र वर्धते ॥२५॥

मान्याभवत् प्रकृतिवाद मनीषिपुंसां
सत्ता निरङ्कुशबलार्चितराजकीया ।
व्यक्तिस्तु तैर्विदलितातिकठोररीत्या
वाणिज्यपक्षमतयस्त्वभवन्नवश्यम् ॥२६॥

स्वातन्त्र्यमिष्टमभवन्न महाजनानां
स्याद् यन्त्रितः सपदि शासनसत्तया तु ।
कौसीदकः सततमेव च वृद्धिमार्ग-
स्तेषां कृषाववनिभोगिनि चास्तमेधा ॥२७॥

एडन्स्मिथस्तदनुयायिजनाः अभूवन्
अर्थस्थशास्त्रजगति प्रथितप्रधीशाः ।
सम्प्रेरका इह च वादपरम्परायाम्
आंग्लक्षितिः प्रथममाप पदं हि तस्मात् ॥२८॥

सिद्धान्त एष उपयोगपरः प्रकृष्टः
सामाजिकं हि सकलं भुवि कार्यजातम् ।
शास्ति प्रकर्षविधिना खलु सन्ततं सः
व्यक्तिं गतामिति हि बेन्थम आह विद्वान् ॥२९॥

स्वतः प्रवृत्तिश्च परोपकारिता
परस्परं प्रेम दृढं हि सर्वथा ।
शुभं दधाते महनीयतामयं
स्मिथो जगादेति वचः प्रधीश्वरः ॥३०॥

प्रेक्ष्यतां स्वयं व्यापारः स्वर्णं हि द्रक्ष्यति स्वयम् ।
नाणकक्रयणं नैव कार्यान्तरे च तत् क्षमम् ॥३१॥

वस्तु तस्माच्च मुद्रातो गरीयोऽस्ति समन्ततः ।
श्रमविभाजने मुद्रा भवत्यति महायिका ॥३२॥
व्यापारस्यामितक्षेत्रे परमेव हितावहम् ।
अस्ति स्मिथस्य विज्ञस्य मतमेतत् सुविश्रुतम् ॥३३॥
निर्वाहसाधनैः संख्या मिता भवितुमर्हति ।
माल्थसो न्यगदत् तावत् सीमामुद्दिश्य निश्चितम् ॥३४॥
अवश्यं त्वनियन्त्रणं नृसंख्यावृद्धिकारकम् ।
न्यूनेन क्षमभोज्येन नृसंख्या न हि वर्धते ॥३५॥
उत्पत्ति वृद्धिमुद्दिश्य विद्वान् ब्रूते सुनिश्चितम् ।
संक्षेपेणात्र निर्दिष्टं तन्मतं हितसाधकम् ॥३६॥
उद्योगस्योद्भवे रुच्या भागं गृह्णन्ति ये जनाः ।
तेषु ते नियता योज्या ये स्युर्निधारणक्षमाः ॥३७॥

उद्देशोऽयं व्यवस्थायां भवेदतितरामिह ।
संयततोत्पत्तेर्नूनं जनतासुखकारणम् ॥३८॥
उत्पादननिमित्तेन यो राशिश्रमसाधकः ।
तल्लाभः श्रममूलस्य प्रतिकूलदिशोन्मुखः ॥३९॥

श्रीरिकार्डोऽर्थशास्त्रज्ञो यद्यप्यासीद् धनाधिपः ।
परं धनाधिपत्वं तु न सेहे वस्तुतः सुधीः ॥४०॥

स्तरः श्रमिकवृत्तीनामनुपाताश्रयस्थितः ।
सततं जनसंख्यायारर्थराशेस्तथैव च ॥४१॥

अनुपातस्तुल्योऽन्येन श्रमिकत्वं न वर्धते ।
अनुपातोऽर्थराशेश्चेद् जनसंख्या हिनस्त्यलम् ॥४२॥
श्रमिकतोच्छ्र्यं याति संख्यानुपतनं नृणाम् ।
जयतेऽर्थस्य राशिं चेत् श्रमिकता हि स्रंसते ॥४३॥
वस्तुतो जनसंख्यायास्तीव्रगत्या समुच्छ्र्यः ।
वराकान् श्रमिकान् सर्वान् दुनोति नितरां सदा ॥४४॥
अर्थशास्त्रिमिलस्यापि सिद्धान्तोऽस्ति समुज्ज्वलः ।
नियन्त्रणे सुधी ज्ञाता ह्युत्पत्तौ चापि तादृशः ॥४५॥
जे० वी० से० सुधीः फ्रान्स्यो निर्माणोद्योगयोः रतः ।
उद्योगं च कृषिं मेने ह्युत्पादनोपमप्रियाम् ॥४६॥
न्यूटनो जार्मनः प्रज्ञः कुसीदनृपसम्पदोः ।
उद्योगेषु कृषौ किञ्च नैवभेदममन्यत ॥४७॥
प्रणालिकां हि तर्कस्य पर्यपुष्णाद्धृदा भृशम् ।
निगमनपरां रम्यां सम्यङ् न्यूटनकोविदः ॥४८॥
धनराशिं भुवं केरी समामेव समस्मरत् ।
वृद्धौ तु जनसंख्यायाः अवश्यं धनमेधते ॥४९॥
व्यक्त्याधिवये ह्यवाप्नोति सूत्साहं श्रमभिन्नता ।
राजस्वे च नृसंख्यायां विचारास्तस्य मोददाः ॥५०॥
तत् तत्प्रतीच्यमेदिन्याम् अद्भुताः शतशोऽभवन् ।
प्रतिभाशालिनां श्रेष्ठाः अर्थशास्त्रविशारदाः ॥५१॥
तेष्वत्र वर्णिता द्वित्राः विदिता अर्थशास्त्रिणः ।
विषयाश्चार्थशास्त्रस्य केचनात्र समुद्धृताः ॥५२॥
अधुना हि स्वदेशस्य विचारा अर्थशास्त्रगाः ।
उल्लिख्यन्ते समासेन द्वित्राः सुविदिता इह ॥५३॥
प्राञ्चस्तत् सुधियस्तथैव विविदुः शास्त्रं महच्चार्थिकं
विज्ञा आधुनिका विदन्ति हि यथा विज्ञानसामाजिकम् ।

सम्बन्धो भवति स्म यस्य च जनैः साकं तदीयैरपि
नित्यं दैनिकजीवनस्य विविधैः सर्वैश्च कार्यैर्भवे ॥५४॥

लोके दैनिकजीवनं हि सफलं पुंसां तदा जायते।
सान्द्रं संगठनं प्रशस्तरुचिरं प्राज्यः पवित्रः प्रियः ॥
सर्वेषां सहयोगदार्ढ्यसुभगः कापि प्रिया हार्दिकी।
लभ्यन्ते सहकारिता च सबला रम्या भृशं सात्त्विकी ॥५५॥

प्राप्यन्ते सुविचारचारुविविधाः सर्वेऽर्थशास्त्रश्रिताः।
वेदेभ्यः स्मृतितस्तथोपनिषदां भव्यात् सकाशान्महा-
काव्येभ्यो नयशास्त्रतश्च सततं चाणक्यतोऽनारतम्।
तेभ्यो व्यापकतार्थशास्त्रपरका सञ्जायते सर्वथा ॥५६॥

शब्दस्य त्वर्थशास्त्रस्य सङ्कीर्णेऽर्थे कदापि न।
प्रयोगं ते हि प्राचीनाः अकार्षुर्विज्ञसत्तमाः ॥५७॥

समावेशमकार्षुस्ते तत्त्वं सामाजिका बुधाः।
दैनिकं जीवनं तत्र चोचितं तस्य शासनम् ॥५८॥

सर्वेषां हि निबन्धानामर्थशास्त्रं समुच्चयः।
रचितो योऽस्ति सामन्तैः प्राक्तनैः कुशलैर्जनैः ॥५९॥

प्राप्तुं वसुन्धरां ताञ्च रक्षितां सुतरामपि।
निबन्धास्तत्त्वसम्पुष्टाः कर्तुं ये रचितास्तदा ॥६०॥

संज्ञाते ह्यर्थशास्त्रस्य प्राप्नुवञ्जगतीतले।
इति ब्रवीति कौटिल्यो योऽर्थशास्त्रस्य कारकः ॥६१॥

व्याख्यानमर्थशास्त्रस्य दृश्यते बहुषु प्रियम्।
विद्वन्मूर्धन्यग्रन्थेषु विख्यातेषु समन्ततः ॥६२॥

कौटिल्यः ख्यातनीतिज्ञः कामन्दकोऽपि नीतिवित्।
अर्थशास्त्रस्य तत्त्वानि दर्शयामासतुर्भृशम् ॥६३॥

कादम्बर्यां हि वाणस्य कृत्याञ्च दण्डिनः कवेः।
नाटकेऽथ विशाखस्य किञ्चान्यत्र महीयसाम् ॥६४॥

गार्हस्थ्यस्य च विज्ञानं कला च परमोज्ज्वला।
विषये ह्यर्थशास्त्रस्य मतं यूनानिनामिदम् ॥६५॥
मनुना रचिते ग्रन्थे नारदादिकृतेषु च ।
ग्रन्थेषु विधयोऽनेके विद्यन्ते हितसंस्थिता ॥६६॥
परं तत्र विराजन्ते सूत्राणि चार्थिकान्यपि ।
नृणां क्रियाकलापेषु समाजस्य च चालने ॥६७॥
क्षिपन्त्यत्यधिकं तानि प्रकाशं सततं शुभम् ।
समाजो येन कल्याणं प्राप्नुयाज्जगतीतले ॥६८॥
व्यतिरिच्याखिलं ह्येतेन निर्दिष्टं चोपरि स्फुटम् ।
देशान्तरस्य विद्वांसो यात्रिणश्च विवेकिनः ॥६९॥
अलबरूनी च फाह्यानोऽनेकेऽन्येऽपि समागताः ।
सर्वेऽपि तेऽस्य देशस्य धनवैभववर्तिनीम् ॥७०॥
चर्चां विधातुमीक्ष्यन्ते प्रवृत्ताः समुदं भृशम् ।
देशस्य रुचिरान् भावान् गाम्भीर्यं च मुहुर्जगुः ॥७१॥
पाषाणजातकादिभ्य 'आइन ए अकाबरी' -
ग्रन्थाच्चापि वयं सर्वे जानीमो मौलिकान् हि तान् ॥७२॥
सिद्धान्तान् आर्थिकान् हृद्यान् भारतार्थबलप्रियान् ।
मौर्यस्य चन्द्रगुप्तस्य राज्यकाले निरूपितान् ॥७३॥
मञ्जुलानर्थसिद्धान्तान् विद्मो मानसपोषकान् ।
निलीनान् विकासेऽभीक्ष्णं लोकमङ्गलतत्परान् ॥७४॥
भाषाङ्ग्लानुवादाश्च व्याख्याश्चापि सुपुष्कलाः ।
विचारान् विदधुः प्राच्यान् परिवर्तनसंयुतान् ॥७५॥
परं वैदेशिका भूपाः कनिष्काकबरादिकाः ।
चान्यदेशगता भावाः सञ्जाता न क्षमा मनाक् ॥७६॥
अस्मदीयसमाजस्य न चार्थस्य कलेवरम् ।
धर्मधराधिरूढस्य कर्तुञ्च परिवर्तितम् ॥७७॥

विज्ञानं हि समाजस्य सहयोगगुणश्रितम् ।
प्राचीना लेखकाः सर्वे प्राहुरिति वचो दृढम् ॥७८॥
प्रयच्छन्तश्च दृश्यन्ते तस्मात् तत्र हि ते बलम् ।
परम्परापराः सर्वेऽप्यर्थशास्त्रस्य पण्डिताः ॥७९॥
अमूर्तां प्रकृतिं प्राहुस्त्वर्थशास्त्रस्य सर्वथा ।
घटन्ते नियमास्तत्र ये सन्ति भौतिका नराः ॥८०॥
भौतिकतां न स्वप्नेऽपि भारतीयविचारकाः ।
नैतिकत्वात् पृथक् कर्तुमीहन्ते स्म कदाचन ॥८१॥
पुंसां सुखानि सर्वाणि जीवितापेक्षितानि ते
प्रावीविशन् भृशं शास्त्रे चार्थस्यान्यच्च पेशलम् ॥८२॥
भवतु नाम तत्पूर्तिर्मुद्रया वान्यवस्तुभिः ।
जीवनस्याधिकारं तु निद्धतेऽखिला जनाः ॥८३॥
जीवितुं मनुजः कालमत्ययोग्योऽपि चाप्नुयात् ।
समाजस्य तु सभ्यस्य धर्मोऽयं प्रथमो मतः ॥८४॥
भारतीयः सदैवेदमर्थशास्त्री व्यचारयत् ।
सोऽर्थशास्त्रं पृथक् चक्रे राजनीतेः कदापि न ॥८५॥
असावनारतं विज्ञः पुरुषार्थचतुष्टयम् ।
महनीयतरं मेने भारतीयोऽर्थशास्त्रवित् ॥८६॥
असंस्तार्थं नितान्तं हि महत्त्वोत्तमपेशलम् ।
अर्थशास्त्रात् तदीयात्तु सत्यमेतच्च सिद्ध्यति ॥८७॥
दृष्ट्या व्यष्टिगया नित्यं धनं मोक्षस्य साधनम् ।
देशदृष्ट्यास्ति पातुं तत् वपुः सामाजिकं भृशम् ॥८८॥
संगठनान्यनेकानि रक्षितुं क्षमते हि तत् ।
अर्थशास्त्रप्रियप्रज्ञाः साधिकारमवादिषुः ॥८९॥
अर्थशास्त्रं कृषिं मुख्यां मेनेऽर्थनूतनस्य च ।
मलस्रोतो मते तच्च प्राच्यानां विदुषां खलु ॥९०॥

शुक्रः सुधीः कृषिं प्रोचे वाणिज्यञ्च ततोऽप्यसौ ।
ततः पशुधनं मेने सोऽर्थशास्त्री विवेकवान् ॥९१॥
प्राञ्चः प्रादर्शयन् वार्तां महत्त्वरुचिरां पुनः ।
कामन्दकः प्रधीश्चोचे कदापि वार्तया विना ॥९२॥
जीवितुं न क्षमो लोको जयरामायणे शुभे ।
महाकाव्यानि सर्वाणि वार्तामर्थमगादिषुः ॥९३॥
वार्तापालनकर्तारो नयन्ति सुखजीवनम् ।
रामायणमिति प्राह स्वकीयं च वचः प्रियम् ॥९४॥
धनेन धर्मकार्याणि सम्पद्यन्ते विना श्रमम् ।
धर्मात् सुखं च मुक्तिं च लभन्ते मनुजा ध्रुवम् ॥९५॥
महाभारतमाहेति शृण्वन्तु हितकाङ्क्षिणः ।
अर्थशास्त्रं हि पुष्णाति महर्ष्युक्तं वचोऽनिशम् ॥९६॥
अर्थशास्त्रं हि देशोऽयं कदाप्यैच्छन्न पावनः ।
नैतिकत्वात् पृथक् कर्तुं जानन्तीति नयप्रियाः ॥९७॥
समुत्थिते विवादे च ह्यर्थशास्त्रमवाप्नुत ।
विशेषाधिकारं नूनं सर्वत्रैव सदैव च ॥९८॥
आश्नुत प्रभुतां नित्यं धर्मशास्त्रं हि भारते ।
अर्थशास्त्रं ययौ किंवा तं गरिमाणमुज्ज्वलम् ॥९९॥
अर्थशास्त्रस्य सीमायां सन्निविष्टं विधित्रिकम् ।
उत्पादनोपभोगौ च वितरणं समुन्नतम् ॥१००॥
प्राचीना भारतौकसो ह्यर्थशास्त्रविशारदाः ।
उपयोगोचितं सर्वं भौतिकवस्तु चेप्सितम् ॥१०१॥
स्थानान्तरणयोग्यं वा चाधिकारोऽस्ति सम्भवः ।
समाविष्टं धने चक्रुर्निसङ्कोचं तदा सदा ॥१०२॥
धर्मं समाजसम्बन्ध्यादर्शञ्चक्रुः प्रभावितम् ।
विचारा आर्थिका देशे स्वयञ्च ते तथाभवन् ॥१०३॥

जीवनं चार्थिकं तत्र सामाजिकं युगे तदा ।
नैतिकैर्धार्मिकैर्वाक्यैः शासितं सर्वथाभवत् ॥१०४॥

आर्थिकेन च तत्त्वेन कात्स्न्र्येनाभूत् प्रभाविता ।
शिक्षायाः पद्धतिश्चापि भारतस्य महीतले ॥१०५॥

श्रेयः सामाजिकं भूयात् शिक्षोद्देश्यं तदा बभौ ।
जीवनं सरलं सौम्यं विचारः पावनोन्नतः ॥१०६॥

आसीद्धि मिश्रणं रम्यं यथार्थादर्शवादयोः ।
सुन्दरं मञ्जुलं किञ्च सम्पूर्णमपि जीवनम् ॥१०७॥

आर्षग्रन्थाः शुभा ज्ञेया भारतभूनिवासिभिः ।
प्राच्यार्थिकविचाराणां सन्ति स्रोतांसि ते ध्रुवम् ॥१०८॥

सुधवला विचारा वा वेदेषु च चतुर्ष्वपि ।
संस्थानानि च शोभन्ते सविस्तरं यथायथम् ॥१०९॥

गौतमशालिहोत्रोर्हि शास्त्रमेतत् (अर्थशास्त्रम्) कृषौ कृतम् ।
विदेहेशस्य वाणिज्यं पाराशरस्य संग्रहः ॥११०॥

एतेभ्यः प्राच्यग्रन्थेभ्यस्तत्समयविराजितः ।
विचारार्थिकसंदोहो जायते साधु बोधितः ॥१११॥

याज्ञवल्क्यान्मनोश्चापि नारदादवगम्यते ।
प्राचीनार्थक्रियावृन्दं संसारहिततत्परम् ॥११२॥

मुद्राभ्यस्ताम्रपत्रेभ्यो जातकेभ्योऽपि बन्धुराः ।
अर्थक्रियाः पुरातन्यो ज्ञायन्ते साधु साम्प्रतम् ॥११३॥

भूयांसः सन्ति विज्ञाः जगति सुविदिता अर्थशास्त्रप्रवीणाः
श्रीविद्वच्छ्यामशास्त्री प्रथितबुधवरो मुद्गलः शाहमान्यः ।
वन्द्योपाध्यायधीमान् गुणिगणविदितो विज्ञजायस्सवालः
विद्वानायङ्गरः श्रीसुमतिशुचिमनाः प्रज्ञनारेन्द्रनाथः ॥११४॥

कौटिल्यो विष्णुगुप्तो जगति सुविदितो ह्यर्थशास्त्र्यग्र्यशास्त्री
आसीन्मन्त्रिप्रधानः परमपटुमतिश्चन्द्रगुप्तस्य मौर्यो-

पाह्लस्य श्रीक्षितीन्द्रप्रथितगुणनिधेः कीर्तिसौभाग्यज-
श्चक्रेऽसावर्थशास्त्रं बुधभुवनमतं लोककल्याणनिष्ठम् ॥११५॥

कौटिल्योऽमंस्त शुक्रस्य वृहस्पतेश्च सादरम् ।
ऋणं हि नीतिनिष्णातोऽप्यर्थशास्त्रसुधीश्वरः ॥११६॥

सिद्धान्ता व्यवहाराश्च प्रदर्शिताः पृथक् पृथक् ।
स्वशास्त्रे वर्णिताः सर्वे व्यवहृतेश्च विन्दवः ॥११७॥

व्यवस्थां नगरादीनां किञ्चाधिकरणान्यपि ।
अधिकारानथ स्त्रीणामनाथानाञ्च रक्षणम् ॥११८॥

वृद्धानां पालनं किञ्च विवाहस्य च प्रक्रियाम् ।
उच्छेदं च विवाहस्य राजस्वं च सविस्तरम् ॥११९॥

स्थलस्य सलिलस्यापि सम्यक् कृषेश्च वर्णनम् ।
वयनतन्तुनिर्माणे विषयान् प्रचुरान् भृशम् ॥१२०॥

अभिज्ञो ह्यर्थशास्त्रस्य चाणक्योऽवर्णयन्मुदा ।
अर्थशास्त्राभिधे ग्रन्थे जगद्विद्वत्समादृते ॥१२१॥

विचारा आर्थिकास्तेन कौटिल्येन निरूपिताः ।
सहैव तेन कार्येण स्वविचाराः समर्पिताः ॥१२२॥

महदासीद् धनस्येष्टं कौटिल्यस्य मतेन च ।
नाणकाधिगतं द्रव्यं व्यक्तेर्वा राज्यतोऽधिकम् ॥१२३॥

सञ्चितं च धनं कृत्स्नं बहुमूल्याश्च धातवः ।
उपभोगागतं किञ्च हस्तान्तरगतं धनम् ॥१२४॥

एतद्विधानि सर्वाणि धने निविविशुः स्वयम् ।
श्रमः सम्पद् वनं चापि कौटिल्येन धनं मतम् ॥१२५॥

धनलब्धिविधीन् सर्वान् तदुद्देश्यं च सोऽभ्यधात् ।
धनकणोऽपि संग्राह्यो व्याजहार स कोविदः ॥१२६॥

समुचितप्रकारेण यद् धनं समुपार्ज्यते ।
धनं तदेव सन्मान्यं निगदन्तीति कोविदाः ॥१२७॥

धनस्य लब्धिः सततं हितप्रदा प्रयुज्यते चेत् सुहृदां च रक्षणे ।
सुयोग्यनार्याः सुतसद्गुणाम्बुधेः ब्रवीति चाणक्यबुधोत्तमो वचः ॥१२८॥

धनार्जनं न्यायगतं सदा शुभं यतो विपत्तेर्मनुजं हि पाति तत् ।
करोति साहाय्यमनारतं च तद् भृशं रुजायां समये च दारुणे ॥१२९॥

कृषिः पशूनामवनं वणिक्क्रियाः भवन्ति वार्तासहिताः सतां मतिः ।
श्रमंस्त कौटिल्यनयज्ञवल्लभः शुभानि मङ्गल्यमयानि सर्वदा ॥१३०॥

अन्तर्हितञ्च कुरुते नृपनीतिशास्त्रं
विज्ञानसैन्यपरकं बुधवृन्दवंद्यः ।
न्यायञ्च शास्त्रमिह नीतिरतां च विद्यां
शास्त्रेऽर्थलग्नहृदये जगतीहितार्थम् ॥१३१॥

राष्ट्रियार्थव्यवस्थाया विज्ञानं सुधियो जगुः ।
गौरव दधतीं स्वीयां वार्तां प्राच्यार्थशास्त्रिणः ॥१३२॥

राष्ट्रस्य तेऽर्थपरकां सुधियो व्यवस्थाम्
अत्यन्तगौरवमयीमवजग्मुरेताम् ।
नाशं गतेति यदि सा जगती विनश्येत्
कामन्दकस्य विदुषो मतमेतदस्ति ॥१३३॥

एषा समग्रजगती श्रयते हि वार्तां
व्यासो ब्रवीति जयसंज्ञककाव्यमध्ये ।
वार्तामपीपठदतो नृपतिं महर्षिः
अत्राखिला बुधवराः परमप्रसन्नाः ॥१३४॥

विज्ञानं तदिदं ब्रवीति मतिमान् शुक्रोऽर्थशास्त्रं प्रधीः
यद् धर्मं नियमांश्च जीवनविधीन् सत्साधनानि श्रयत् ।
सम्राजो विविधञ्च कृत्यनिवहं व्याख्याति तच्छासनं
वार्तेत्थं परमोपयोगिरुचिरा सम्पज्जगत्याः कृते ॥१३५॥

पुरातनेऽत्र देशे तु कृषेरधिकताम्प्रति ।
तद्बुद्धेश्च निमित्तेन विधिरागृह्यतोचितः ॥१३६॥

अनेकवस्तुदायित्वाद् भारतेऽत्र कृषिः प्रिया ।
अध्यास्त प्रमुखं स्थानं चाणक्य इति ह्यब्रवीत् ॥१३७॥
जनेन श्रमिणा भाव्यमिति काङ्क्षति भारतम् ।
महत्त्वं हि श्रमस्यात्र सततं मुनयो जगुः ॥१३८॥
श्रमश्रमिककार्याणि व्याख्यायन्तोऽनिशं स्फुटम् ।
मनु-शुकादिकाः किञ्च चाणक्योऽपि विलोकिताः ॥१३९॥
चाणक्यो नियमांश्चक्रे श्रमिणामनुशासने ।
हिताय भाषते भूयः तच्छास्त्रं जनतासुहृत् ॥१४०॥
चाणक्यो दृश्यते किञ्च वाणिज्यस्य विकासने ।
विवेचनां प्रकुर्वाणस्तस्यापि च नियन्त्रणे ॥१४१॥
आभ्यन्तरपदार्थानां प्राञ्चो विचारकारिणः ।
विनिमये न चैक्षन्त सारं कमपि वस्तुतः ॥१४२॥
पूर्त्यावश्यकतादृष्ट्या मूल्यनिर्धारणे रुचिम् ।
तत्कालस्य दधुर्विज्ञाः अर्थशास्त्रविचक्षणाः ॥१४३॥
वाणिज्यस्य महत्त्वं हि मन्यन्ते स्मृतयो हृदा ।
राष्ट्रियार्थव्यवस्थायां धर्मशास्त्राणि मुख्यतः ॥१४४॥
व्यापारकारिणां प्रीत्यै संस्थाप्येरन् स्थले स्थले ।
भाण्डारसद्म राज्येण विश्रामसदनान्यपि ॥१४५॥
अधिगन्तुं च वस्तूनि तत् कष्टं सहते पुमान् ।
तन्मूल्यं तत्कृते ज्ञेयमिति शुक्रो वचोऽवदत् ॥१४६॥
निर्धारणं हि मूल्यस्य चोपयोगधिया कृतम् ।
नीतिदर्शी भणत्येतद् आचार्यः स नये पटुः ॥१४७॥
व्यापारार्हपदार्थेषु गृहीतोऽभूत् पुरातने ।
सीमाशुल्कः प्रशुल्कश्च युगे राज्यं स्वतां न्यधात् ॥१४८॥
धर्मशास्त्रानुसारेण राजस्वं हि सुनिश्चितम् ।
प्रशासनव्यवस्थायां परिवृत्तिः कदापि न ॥१४९॥

पुरातने युगे कश्चित् प्रभावो न करेऽपतत् ।
करादायं भृशं पूर्णं प्राप्नोद् राज्यं प्रियं परम् ॥१५०॥

स्वदेशस्य सुरक्षायै प्रजादात् स्वं नृपम्प्रति ।
महाभारतमित्याह सत्यमेतद् भृशं स्फुटम् ॥१५१॥

करप्रथेदृशी साध्वी प्रजासह्या भवेद्धि या ।
कौटिल्येनोक्तमित्येतद् राजशास्त्रविदा वचः ॥१५२॥

राष्ट्रियार्थव्यवस्थायां राजस्वं निटिलस्थितम् ।
चक्रे विद्वान् महामान्यो ब्रूते सः स्वकृतौ कृती ॥१५३॥

वित्ताधाराः क्रियाः सर्वाः प्रशासनं च तिष्ठति ।
तस्मान्महत्त्वयुक्तं तत् सततं तदपेक्ष्यते ॥१५४॥

तस्माद् दिशि सदा राज्यकोषस्य सुधिया महान् ।
सर्वहितं हृदि ध्यात्वा यत्नः कार्यो निरन्तरम् ॥१५५॥

उद्योगे कानने राज्यं कृषौ मत्स्यादिपालने ।
व्यायामे खनिकृत्ये च सदात्मानं प्रवर्तयेत् ॥१५६॥

वस्तु यन्न हितायाभूद् देशस्य हि कथञ्चन ।
आरोपितं पुरा तत्र राजस्वं नितरां महत् ॥१५७॥

करारोपणसिद्धान्तः प्रमुखस्त्रिविधो बभौ ।
वर्षे सकृत् करो ग्राह्यः सहनार्हः कृते नृणाम् ॥१५८॥

हानिं सहेत नो राज्यं न च करं ददाति यः ।
शक्तिहीनः कदापि स्यात् करः सह्यो ह्यपेक्ष्यते ॥१५९॥

धनाढ्यतां विलोक्यैव करस्थापनमिष्यते ।
कौटिल्यः कथयत्येतत् साग्रहं किञ्च सादरम् ॥१६०॥

व्यये राज्यस्य कौटिल्यस्तद्ग्रहणं प्रशंसति ।
राष्ट्रियप्रतिरक्षार्थं शासनार्थं तथैव च ॥१६१॥

राष्ट्रिये राजकीये च व्ययो मन्त्र्यादिवेतने ।
कौटिल्यो निगदत्येतत् परमरुचिपूर्वकम् ॥१६२॥

सैन्ये व्ययोऽथ रत्नादौ भूषणेषु तथा व्ययाः
निर्दिष्टा सुधिया तेन व्यया राज्यं हि तेष्वपि ॥१६३॥
मौर्यकाले कृषिः स्रोत आयस्य प्रमुखाभवत् ।
व्यक्तिगतधरण्यां तु यथापेक्षमभून्मतम् ॥१६४॥
उद्योगेभ्यो य आयोऽस्ति तं करान्नितरां वरम् ।
अमंस्तार्थविचारज्ञः कौटिल्यो विज्ञभूषणम् ॥१६५॥
अत्यधिका नृणां संख्या प्राचीनान् न न्यपीडयत् ।
महतीं जनसंख्यां ते मेनिरे शक्तिसाधनम् ॥१६६॥
कल्याणकारि राज्यं किमित्येतद् विविदुर्जनाः ।
प्राचीनाः सुतरां सम्यक् तन्महत्त्वं सुखप्रदम् ॥१६७॥

नैतिकदेशतः किञ्च राज्यमार्यं गतिं व्यधात् ।
दुर्भिक्षाद् विहिता रक्षा राज्येन सावहितं पुरा ॥१७८॥
आसीत् प्रशासनोद्देश्यं धनभोजनयोः पुरा ।
वितरणं समं तत्र वर्गे क्लेशो हि नापतत् ॥१७९॥

देशे दासप्रथा नासीन्मेगास्थनीज आह च ।
कौटिल्यस्य विचारोऽभूद् राज्यस्य विषये त्वयम् ॥१७०॥
राज्यस्य प्रभुता व्यष्ट्यां सोऽचीकमत तिग्मधीः ।
भागो गृह्येत राज्येन तेन राष्ट्रं हि जायते ॥१७१॥

स्वावलम्बि विनायासमुद्योगे हर्षपूर्वकम् ।
भाव्यं नात्र राज्येण मन्दोत्साहजुषा खलु ॥१७२॥
पशूनां रक्षणं किञ्च कृषिश्च वयनं कला ।
व्यक्तिध्यानेन वीक्ष्येरन् राज्यनियन्त्रितापि च ॥१७३॥
राजा पश्येत् क्रियाः सन्ति वितरणोपभोगगाः ।
उत्पादनपराः सम्यक् चलन्ति नियमे न वा ॥१७४॥
स्वातन्त्र्यं सदा राष्ट्रस्य वाञ्छत्यार्थिकीं स्थितिम् ।
अर्थविदो ब्रुवन्त्येतत् स्वविकासनिकेतनम् ॥१७५॥

निर्धनेभ्यो धर्मसंस्थाः दारिद्र्यसदनान्यपि ।
सद्राज्यं सततं क्षिप्रं संस्थापयेद् यथोचितम् ॥१७६॥
अकार्यणां कृते नृणां कार्यं दद्याद् यथोचितम् ।
वृद्धानां भरणं कुर्याद् एष धर्मः सनातनः ॥१७७॥
वणिग्भ्योऽधर्मलग्नेभ्यो मौर्य्यनृपा न्यमन्त्रयन् ।
जीवनापेक्षिवस्तूनि जनतायाः अवनं प्रति ॥१७८॥
एतादृशान् विधीन् यो नोल्ङ्घयन् प्रेक्षितोऽभवत् ।
कठोरदण्डमाप्नोत् स मौर्य्यराज्ये मनोरमे ॥१७९॥
प्राचीने समयेऽखिला हि नियमाः सामाजिकं धार्मिकं
धर्म्या निर्ममिरे गृहस्थपरकं चाध्यात्मिकं जीवनम् ।
सम्बन्धान् विविधांश्च सन्ततिपरान् मुक्तिप्रयासोद्यतान्
त्रायन्ते स्म बहून् यतींश्च निखिलान् साधूंश्च संन्यासिनः ।१८०॥
प्राक्तने भारते कौशलं नागरम् उन्नतं सुन्दरं हृद्यपूर्णोज्ज्वलम् ।
सर्वथा तत्परं क्षात्रमासीद् दृढं राजधानी-मनोहारिरूपप्रियम्
॥१८१॥
पुरं दृष्टं तदा रम्यं घण्टापथसरोवरैः ।
उद्यानैर्विविधाभासुलीनैर्गेहैश्च बन्धुरैः ॥१८२॥
तथा प्रयत्नश्च कृतोऽभवत् तदा
न चाग्निबाधा व्यथयेत् पुरे जनान् ।
कृताश्च कुल्याः जलनिर्गमाय हि
कृतञ्च वैमल्यनिमित्तसाधानम् ॥१८३॥
अष्टादश समाः यावद् दशमाच्छतकाच्छिवे ।
भारतस्य तु कालोऽसौ मध्यकालः प्रकीर्तितः ॥१८४॥
नात्रकाले विकाससस्तु जातो मनाङ् न चार्थिकः ।
उल्लेखार्हा इह क्षोण्यां विचारा आर्थिकास्तु ते ॥१८५॥
सामाजिकं भृशं भावं समस्पृशन् हि सर्वथा ।
जातिप्रथादिका दोषा आगता बहवस्तदा ॥१८६॥

चञ्चत्स्फुरन्मुगलशासनकालमध्ये
'आईन ए अकबरी' परमप्रसिद्धा ।
प्राणीयतात्र नवगौरवभासमाने
द्रव्योत्तमे हि विषये प्रियताविशिष्टे ॥१८७॥

राजस्वस्य विधिः किञ्च करादानस्य पद्धतिः ।
कर्षकेभ्यः प्रदानञ्च बीजानामिह वर्णितम् ॥१८८॥

विना मूल्यं दरिद्राय खाद्यवस्तुसमर्पणम् ।
आपणेषु पदार्थानां नियमनं कृतं भृशम् ॥१८९॥

करादानं यथाकालं समस्या विविधास्तथा ।
वर्णिताः सन्ति साध्वत्र मनोज्ञा विषयाः क्रियाः ॥१९०॥

आर्थिकानां विचाराणां सम्बन्धः प्रमुखस्तदा ।
समस्या आर्थिकाः किञ्च तत्समाधानमीप्सितम् ॥१९१॥

आर्थिकत्वग्रहः पूर्ण आध्यात्मिकत्वमान्यताः ।
ह्यार्थिके गठने नूनमित्येतेषु गते स्थितिम् ॥१९२॥

अजायत मतं तेषामर्थशास्त्रमनीषिणाम् ।
न स्वरुचिं दधुर्विज्ञा अर्थसिद्धान्तचित्रणे ॥१९३॥

पुरातनस्य कालस्य स्वरूपं यदिहाबभौ ।
तदार्थिकं दिङ्मात्रेण दृष्टं देवि ! त्वया वरम् ॥१९४॥

दुर्गेऽधुना भारतभूजननीस्थितिर्या
सा वर्णिता परिमितेषु पदेषु नव्या ।
भूयात् पुनः समुदितं प्रियभारतं नः
राजीवगान्धिसमये शुभकामनेयम् ॥१९५॥

इति श्रीनवभारतपुराणे प्राचीनकालवर्त्यार्थिकस्थितिर्णनं
नाम एकादशोऽध्यायः ।

विक्रमविश्वविद्यालय-संस्कृताध्ययनशालायाम्

आचार्यपदभूषणानां काव्यशशेमुषीजुषां

श्रीनिवासरथमहोदयानां सपर्यापर्वणि

समर्पितम्

अभिनन्दनपत्रम्

सौजन्यालापवेलाचकितनवसुधीमण्डलीमन्त्रविद्धः
स्फारं सौभाग्यसारं कलयति लयभाक् सूक्तिलीलाविदग्धः ।
स्निग्धो रङ्गप्रयोगे सुललितरचनागुम्फने च प्रसिद्धः
क्व श्रीमान् श्रीनिवासो भवति न कवितामञ्जरीमोदहेतुः ।।

क्षीरक्लिन्नमुखः पुरीपरिसरे वात्सल्यनीराजितं
लेभे यज्जनकस्य तस्य हि जगन्नाथस्य सन्दर्शनम् ।
तत्कीर्त्तिध्रुव एष वीक्षितुमना भूयोऽपि तेजोमयं
नक्षत्राणि तथा च मित्रपरिधीनश्रान्तमासेवते ।।

रत्नं भूमितलेऽपि गोपितमहो पुण्यप्रभाभासुरं
विष्वक् चारुरुचैव किं न तरसा शीर्षाग्रमारोहति ।
केनैतन्न निरैक्षि वैक्रमयुगे नो केन चैवाधुना
कालानां प्रविभेद एवं भवति व्यक्तिर्न सम्भिद्यते ।।

नाट्ये यस्य रसप्रयोगविदुरा सर्वङ्कशा पद्धतिः
काव्ये चापि नवीनवक्रिमरुचिः सारस्वती साधना ।
वाणी यस्य मृदङ्गमञ्जुलकला माङ्गल्यकादम्बिनी
जीयाद् गीतमहारथोऽप्रतिरथः सोऽयं मनीषी रथः ।।

यक्षादेशवशादुपेत्य तरसा प्राङ्मन्दिरं शूलिनो
धीरध्वानविधानधोरणिकया योऽदध्वनद् वारिदः ।
भूयोऽसौ स्वयमेव पुष्करघनध्वानो निकामं घनः
प्राप्तः श्रीरथसंज्ञया किमु महाकालव्रती वर्धते ॥

हृष्यत्येव बृहस्पतिः स भगवान् खेलन्ति खे नाकिनो
मुग्धाऽसौ कलकच्छपीं कलयते पद्मासना भारती ।
चातुर्मास्यपराङ्मुखो हरिरपि प्रीणाति गोष्ठीरसैः
श्रीरेषा यदि वत्सला वृतवती श्रीश्रीनिवासं रथम् ॥

नीतिः प्रीतिमयी गतिः कृतिमयी रीतिर्मनीषामयी
क्षान्तिर्दानमयी रतिः क्रतुमयी स्फीतिः समज्यामयी ।
उक्तिः काव्यमयी मतिः श्रुतिमयी गीतिश्च झम्पामयी
आचार्यस्य रथस्य भाति भुवने कीर्तिः शलाकामयी ॥

यदा मन्द्रं मन्द्रं लयभरमतन्द्रं कविरयं
तनोति प्रीतः सन् सहृदयसभामेत्य सदयः ।
तदास्य क्षीरादप्यधिकमधुरेणाप्तवचसा
सुतृप्ताः श्रोतारः क्षुधमपि तृषञ्चापि जहति ॥

(रचयिता : डा० भास्कराचार्य त्रिपाठी)

उज्जयिनी
फाल्गुनशुक्लषष्ठी, २०४२ विक्रमाब्दाः

देववाणी-परिषद्वार्ता

नवदिल्ल्यां सप्तमविश्वपुस्तकमेलापके १३—१८-२-८६ तारिकासु देववाणी-परिषत्प्रकाशित ग्रन्थानां प्रदर्शनी समायोज्यत ।

१४-२-८६ तारिकायाम् दिल्ली विश्वविद्यालयस्य संस्कृतविभागे आचार्येण डा० वाचस्पति उपाध्यायमहाभागेन आचार्य रमेशचन्द्र शुक्ल प्रणीतं 'कृष्णात्परं किमपि तत्त्वमहं न जाने' इत्येतकाव्यं समुन्मीलितम् ।

संस्कृतजगद्वार्ता

आचार्यश्रीनिवासरथस्याभिनन्दनम्

१६.३.१९८६ तारिकायाम् उज्जयिन्यां कालिदास-अकादमी-भवने सुप्रसिद्धसंस्कृतकवेः विदुषश्च श्रीश्रीनिवासरथमहाभागस्य विक्रमविश्वविद्यालयस्य संस्कृतविभागे आचार्यपदनियुक्तिमुपलक्ष्य अभिनन्दनमक्रियत । अभिनन्दनसमारोहस्याध्यक्षेण डा० शिवमङ्गलसिंह सुमनमहाभागेन आचार्यरथमहाभागाय ताम्रपत्रे उट्टङ्कितम् अभिनन्दनपत्रं समर्पितम् . समारोहेऽस्मिन् विक्रमविश्वविद्यालयकुलपति डा० डी० आर० शर्म-गुजरात वि० वि० कुलपति डा० के०एम० शास्त्रि-डा० प्रभाकरनारायण कवठेकर-डा० राधावल्लभ त्रिपाठि-डा० भास्कराचार्य त्रिपाठि-डा० कमलेशदत्त त्रिपाठि-डा० रमाकान्त शुक्ल प्रभृतिभिर्विद्वद्भिराचार्यश्रीश्रीनिवासरथमहाभागस्य संस्कृत-सेवा समुपश्लाघिता । अभिनन्दनसमितिसचिवेन डा० रश्मिकान्तव्यासेन धन्यवादा ज्ञापिताः ।

अभिनन्दनसमारोहानन्तरं कालिदास-अकादम्या 'वासन्ती काव्य-सन्ध्या' समायोजिता यत्र देशस्य नैकैः कविभिः स्वसंस्कृतरचनाः पठिताः ।

संस्कृतपाठा शब्दलेखपट्टेषु (Cassettes) प्रकाशिताः

३१-३-८६ तारिकायाम् दिल्लीनगर्यां फिक्की (Ficci) महासभासदने सहस्रसंख्यानां विशिष्टातिथीनां पुरस्तात् ४१ शब्दलेखपट्टेषु समालिखितानां ४१ संस्कृतपाठानां तत्संबद्धलघुपुस्तकानां च प्रकाशनं सम्पूज्यश्रीरङ्गनाथानन्दस्वामिपादैः निर्व्यूढम् । न्यायमूर्तिश्रीबालकृष्णएराडिमहाभागः मुख्यातिथिरासीत् ।

केरलप्रान्ते त्रिचूर जनपदे एरनेल्लूर ग्रामे प्रवर्तमानस्य भारतविद्यापीठस्य प्राचार्येण श्रीभरतपिषारटीमहाशयेन आविष्कृतां कामधेनुपद्धतिमवलम्ब्य सज्जीकृताः पाठा तेनैव शब्दलेखीकृताः । वर्णमालात आरभमाणोऽयं पाठक्रमः क्रमशः काव्यनाटकादिभ्यः समुद्धृतानां तत्तद्भागानां सन्निकर्षाध्ययनानन्तरं

ऋग्वेदात् समुच्चितैः कैश्चन मन्त्रैः सह पर्यवस्यति। संस्कृतसाहित्ये मौलिकानां काव्यनाटकपुराणादीनां स्वयं सम्यगवबोधशक्तिः अस्या दीक्षाया अन्ते छात्राणां सञ्जायते। संस्कृतक्षेत्रे अचुम्बितोऽयं प्रयत्नः सर्वेषामपि श्रद्धामाचकर्ष।

विद्यापीठास्यास्य प्रमुखरक्षाधिकारिभिः श्रीमद्रङ्गनाथानन्दस्वामिपादैः शब्दलेखपट्टान् न्यायमूर्तिश्रीएराडिमहोदयेभ्यः प्रदाय कथितम् जगति यत्रकुत्रापि कोणे यः कोऽपि जिज्ञासुः वर्तेत, तस्य स्वगृहे एव स्थित्वा संस्कृतमध्येतुं सौकर्यं समापादनीयं, तदर्थमेवायं प्रयत्नः।

संस्कृतभक्तिगानानां प्रचारणं बालसाहित्यग्रन्थानां प्रकाशनं, गृहपाठपद्धतिद्वारा संस्कृताध्यापनम् इत्यादिकं विद्यापीठेन क्रियमाणं प्रवर्तनं विशदीकृत्य श्रीभरतपिषारटिः धन्यवादात्मकं संस्कृतमयं भाषणमकरोत्।

डा॰भवानीशङ्करत्रिवेदी माघपुरस्कारं लभते



राजस्थान संस्कृत अकादम्या डा॰ भवानीशंकर त्रिवेदि महाभागः 'संस्कृतं यूरोपीया भाषाश्च'-इति ग्रन्थ लेखनार्थं पञ्चसहस्ररूप्यकात्मकेन 'माघ'पुरस्कारेण सम्मानितः। डा॰ त्रिवेदिमहाभागान् वर्धापयामः।

प्रयागविश्वविद्यालये संस्कृतकाव्यगोष्ठी

१२.३.१९८६ तारिकायां प्रयागविश्वविद्यालयस्य संस्कृतविभागेन डा॰ रमाकान्तशुक्लस्य सम्मानार्थम् संस्कृतकाव्यगोष्ठी समायोजिता यत्र डा॰ राजेन्द्र मिश्र-डा॰ हरिदत्तशर्मप्रभृतिभि कविभिः स्वकविताः प्रस्तुताः। डा॰ शुक्लेन 'भाति मे भारतम्' नाम काव्यं श्रावितम्। डा॰ राजेन्द्र मिश्र महाभागेन अर्वाचीनसंस्कृतकाव्यमवलम्ब्य सारगर्भितं भाषणमपि विहितम्।

(रमा शुक्ला)

अर्वाचीनसंस्कृतम्

(R.N. 34554/79)

★

१. प्रकाशन का स्थान	नयी दिल्ली
२. प्रकाशन की आवधिकता	त्रैमासिक
३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
४. सम्पादक का नाम, राष्ट्रीयता तथा पता	डा० रमाकन्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं	देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नई दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिता ग्रन्थाः

१. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु० २०.०
२. भाति मौरीशसम् (डा० रमाकान्त शुक्लः) रु० ६.०
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्) रु० ४०.०
४. श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः) रु० ३०.०
५. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु० २०.०
६. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५.०
७. आभाणकमञ्जरी („ „) रु० १५.०
८. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.०
९. रघुवंश : एक विश्लेषण („ „) रु० २०.०
१०. अभिज्ञानशाकुन्तल : एक विश्लेषण („) रु० २०.०
११. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.०
१२. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („) रु० ३०.०
१३. „ „ „ (द्वितीय खण्डः) („) रु० ३०.०
१४. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.०
१५. अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः) रु० २०.०
१६. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु० २०.०
१७. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.०
१८. संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित) रु० १५०.००
१९. साधारणीकरण और समानान्तर चिन्तन (डा० सुलेखचन्द्र शर्मा) रु० १०० ०
२०. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० २०.०
२१. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु० ३०.०
२२. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु० ४०.०
२३. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २०.०
२४. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.०
२५. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.०
२६. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु० २०.०
२७. सुरश्मिकाश्मीरम् („) („) रु० २०.०
२८. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० १०.०
२९. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु० १०.०
३०. महाप्रयाणम् (श्रीकृष्ण सेमवालः) रु० २०.०
३१. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु० २०.०

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाष : ५५३४६६

अर्वाचीनसंस्कृतम्

(अष्टमवर्षे तृतीयोऽङ्कः)

१५ जुलाई १९८६

सम्पादक :

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली - ११००५९

अर्वाचीनसंस्कृतम् (८/३)

विषय-सूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्		१७७
२. भारतजनताहम्	रमाकान्त शुक्लः	१७८-१८०
३. निकषा (लघूपन्यासः)	श्री केशवचन्द्र दाशः	१८१-२२०
४. कीदृशी स्वतन्त्रता ?	डा० राजेन्द्र मिश्रः	२२१
५. किमर्थम् ?	डा० राधावल्लभः त्रिपाठी	२२२
६. देववाणी परिषद्वार्ता	रमा शुक्ला	२२३-२२४
७. संस्कृत-जगद्वार्ता	”	”

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20.00 (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

‘देववाणी-परिषद्, दिल्ली’-कृते डा० रमाकान्तशुक्लेन ‘देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९’ इति मुद्रणालये मुद्रापयित्वा ‘६ वाणी-विहार, नई दिल्ली-११००५९’ तः प्रकाशितम्- अर्वाचीनसंस्कृतम् (८/३) प्रधानसम्पादकः डा० रमाकान्तशुक्लः। प्रकाशनतिथिः १५.७.१९८६।

सम्पादकीयम्

'अर्वाचीनसंस्कृतस्य' अष्टमवर्षीयये तृतीयेऽस्मिन् खण्डे प्रमुखतः विद्वन्मणिकेशवचन्द्रदाशप्रणीतस्य 'निकषा' नाम लघुपन्यासस्य प्रकाशनं क्रियते। युवा लेखकः श्री केशवचन्द्रदाशः उत्कलराज्ये पुरीनगर्यां श्रीजगन्नाथसंस्कृत-विश्वविद्यालये दर्शनविभागमलङ्करोति। अस्य 'प्रणयप्रदीपं', 'हृदयेश्वरी' 'महातीर्थं' 'भिन्नपुलिनम्', 'अलका', 'निम्नपृथिवी', दिशा विदिशा', 'तिलोत्तमा', 'मधुयानम्', 'आवर्तम्', 'शीतलतृष्णा' 'प्रतिपद्' इत्याद्या गद्यपद्य-रचना इतः पूर्वं स्वातन्त्र्येण विविधसंस्कृतपत्रिकासु वा प्रकाशिताः सन्ति। श्रीदाशस्य शैली लघुवाक्यमयी वर्तते।

'निकषा' नाम्नि लघूपन्यासेऽस्मिन् लेखकेन जिजीविषा-जीवनयोर्दूरता केन्द्रीयविचारत्वेन स्थापिता। गोविन्द-यमुना-मीनाक्षी-चरक-सूचीप्रभृति पात्राणि स्वचरितैरमुमेव विचारविन्दुं विस्तारयन्ति। मायानामकं कल्पनास्थितं पात्रमपि अत्र स्वयोगदानं करोति। 'हे यियासो। हे पिपासो! जिजीविषा-जीवनयोः दूरता अद्यावधि न त्वया आकलिता···।' इति वाक्येन लेखकः जीवनस्य यथार्थरूपं प्रस्तौति।

अंकेऽस्मिन् काश्चन कविता अपि प्रकाश्यन्ते। एतत्पंक्तिलेखकेन 'भारतजनताहम्' इत्येतस्यां रचनायां मुक्तकशैल्यां भारतस्य जनताया वैशिष्ट्यमुद्घाटितम। अभिराजोपाह्व डा० राजेन्द्रमिश्र-विरचितायां 'कीदृशी स्वतन्त्रता?' इत्यस्यां कवितायां भारतस्य चिरन्तनगौरवसकेतपुरस्सरं अद्यतन्यो विकटाः परिस्थितयश्चित्रिताः सन्ति। अन्ते च कविरयमेकतायाः सन्देशं ददाति। डा० राधावल्लभत्रिपाठिप्रणीतं 'किमर्थम्' इतिगीत कवेः सप्रश्नचित्तमभिव्यनक्ति।

देववाणी-परिषद्वार्तायां संस्कृतजगद्वार्तायां च नूतनसंस्कृतगतिविधीनां परिचयो दीयते।

अङ्कमवलम्ब्य पाठकानां विचाराः प्रतीक्ष्यन्ते।

विदुषां वशंवदः

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

६ वाणी विहारः
नयी दिल्ली-११००५९
१५ जुलाई १९८६

भारतजनताहम्

(रमाकान्त शुक्लः, दिल्ली)

अभिमानधना विनयोपेता शालीना भारतजनताहम्।
कुलिशादपि कठिना कुसुमादपि सुकुमारा भारतजनताहम्॥

निवसामि समस्ते संसारे मन्ये च कुटुम्बं वसुन्धराम्।
प्रेयः श्रेयश्च चिनोम्युभयं सुविवेका भारतजनताहम्॥

विज्ञानधनाहं ज्ञानधना साहित्यकलासंगीतपरा।
अध्यात्मसुधातटिनीस्नानैः परिपूता भारतजनताहम्॥

कल्पनातीतदुःखानां वा सौख्यानां वापि पराकाष्ठाः।
समभावतया सोढुं शक्ता समबुद्धिर्भारतजनताहम्॥

कृत्वा भूमण्डलपर्यटनं यं देशं स्वर्गं मनुते नाः।
तस्यैव नृपस्तस्यैव प्रजा ऋजुचरिता भारतजनताहम्॥

नाहं भ्रमेऽस्मि नाहं मोहे विश्वं भ्रान्त्वा तथ्यं वदामि।
मत्समा हि जनता क्वापि नास्ति धृतिशीला भारतजनताहम्॥

विश्वस्मिन् जगति गताहमस्मि, विश्वस्मिन् जगति सदा दृश्ये।
विश्वस्मिन् जगति करोमि कर्म, कर्मण्या भारतजनताहम्॥

"किं किं न तपस्तप्तं हि मया, स्वातन्त्र्यदेवताराधनाय?
किं किं न सहे तद्रक्षार्थं श्रमशीला भारतजनताहम्।

लंघिताः पर्वताः, अवरुद्धा नद्यः, प्रपूरिता जलाशयाः।
सिक्ता मरवश्च यया बहुधा, महिता सा भारतजनताहम्॥

दारिद्र्यदुःखदावाग्निदग्धदेहापि नो म्रिये ह्यद्यावधि।
साहस-जिजीविषा-कर्मठता-पुत्तलिका भारतजनताहम्॥

दम्भोलिसन्निभा अपि विपदोऽनायासमेव सर्वा हि सहे।
विषपानपरापि स्मितवदना सर्वंसहभारतजनताहम्।

आयातु यातु लक्ष्मीः, स्तुवन्तु निन्दन्तु नीतिनिपुणाः कामम्।
उच्चावचमार्गे गच्छन्ती सोत्साहा भारतजनताहम्॥

अण्वस्त्रनिर्मितिर्नो कठिना मम कृते, तथापि न तामीहे।
वास्तविको हेतिरहिंसा मे, निर्भीका भारतजनताहम्॥

संगणकायन्त्रजालोऽपि मेऽस्तु भौतिक्युन्नतिरपि मे तथास्तु ।
जीवनरसश्च मा शुष्को भूदितिकामा भारतजनताहम् ।।

आक्रमणं नैव करोमि कदाप्याक्रमणं नैव कदापि सहे ।
आर्जवं न मे मूर्खत्वमस्ति दृढकवचा भारतजनताहम् ।।

ज्वालामुखिनं गिरिमारूढं परमाणुदैत्यविकलितचित्तम् ।
अधुनापि जगच्छान्तिं ब्रूते या, सैषा भारतजनताहम् ।।

भारतभूमेरुत्पन्नाहम् अस्याञ्च विलीये सामोदम् ।
सेविष्ये ह्येनामामरणम् अतिहृष्टा भारतजनताहम् ।।

मोदे प्रगतिं दर्शं दर्शं वैज्ञानिकीं च भौतिकीं परम् ।
दूयेऽद्यत्वे लोकं लोकं शठचरितं भारतजनताहम् ।।

विद्वांसो वीरा शिल्पकराः श्रमिणः सन्तः-किं किं न मेऽस्ति ।
स्यादत्र न गृहभेदनपापम्- इतिकामा भारतजनताहम् ।।

दारिद्र्यं वृत्तेर्न्यूनत्वं सर्वमत्युपेक्षे काममहम् ।
नोपेक्षे किन्तु सतां पीडां करुणार्द्रा भारतजनताहम् ।।

अपि सहे बलात्कारान् हत्या अपहृतीस्तथा तस्करवृत्तीः ।
नो सहे किन्तु देशस्य भंगमुन्निद्रा भारतजनताहम् ।।

नग्ना बुभुक्षिता निर्गेहा सत्यपि जीवामि बहोः कालात् ।
जीविष्यामि च कल्पान्तमहं, मृत्युञ्जयभारतजनताहम् ।।

जिह्वां मे कीलयितुं शक्तः कः कोऽत्र जगति मातुर्जातः ?
वाणी विहरति मे सदोज्ज्वला गर्जन्ती भारतजनताहम् ।।

आचरति दुर्जनो नीचकर्म यत्तत्सर्वं जाने, जाने ।
प्राप्नोमि तथापि न निष्ठुरतां करुणार्द्रा भारतजनताहम् ।।

नक्राश्रुजलं जाने सम्यक्, जाने च गृध्रगोमायुगिरम् ।
जाने करटक-दमनकचरितं, हृदयज्ञा भारतजनताहम् ।।

देशे निरागसां संहारं, लुण्ठनं सतां च वधूदाहान् ।
श्रावं श्रावं दर्शं दर्शं व्यथमाना भारतजनताहम् ।।

पश्यामि यदा कुटिलैः क्लृप्तां मूढैश्च कृतां विघटनसरणिम् ।
विलपामि तदा खिन्ना खिन्ना, चिन्ताकुलभारतजनताहम् ।।

अभिसन्धि-धार्मिकोन्माद-भक्ष्य-शारीरपण्य-मिश्रणदोषैः ।
अस्वास्थ्यकरैश्च प्रदूषणैरतिविकला भारतजनताहम् ।।

पश्यामि यदा मलिनां गंगां सरितोऽन्या अग्निं चोद्गिरतीः ।
तासां पवित्रतां शीतलतां चेच्छन्ती भारतजनताहम् ॥

युवक्रात्मघात मादकपदार्थसेवनोत्कोच - दुर्बलघाताः ।
नो सन्तु मदीये देशेऽस्मिन्निति कामा भारतजनताहम् ॥

स्वीयैरपराधैः ह्रीणाहं स्वीयैः दोषैरतिखिन्नाहम् ।
एकतां कामये नित्यं स्वां जगदीश्वर ! भारतजनताहम् ॥

ये दृश्या मयि दोषा नैकेऽरुन्तुदा अवाच्याः कष्टकराः ।
कामये विलोपं वै तेषामतिशीघ्रं भारतजनताहम् ॥

तस्करा हिंसका गेहभिदो मूढाश्च सन्तु मयि यदा कदा ।
ते किन्तु नैव परिभाषा मे समुदारा भारतजनताहम् ॥

आक्रामक लण्ठकसंघाता. आगता येऽपि मयि गता लयम् ।
विविधाप्येका विलसामि सदा, बहुवर्णा भारतजनताहम् ॥

मम गीतैर्मुग्ध समं जगन्मम नृत्यैर्मुग्धं समं जगत् ।
मम काव्यैर्मुग्धं समं जगद् रसभरिता भारतजनताहम् ॥

शासनासन्दिकामधिरोढुं प्रतिनिधियो मे कुर्वन्ति न किम्?
तां प्राप्य केऽपि यां विस्मरन्ति, मुग्धा सा भारतजनताहम् ॥

दृप्तानामंकुशतां भजामि, नम्राणां रक्षकतां भजामि ।
दुष्टानां शिक्षकतां भजामि लोकज्ञा भारतजनताहम् ॥

अविरुद्धान् वापि विरुद्धान् वा ह्येकस्मिन् सूत्रे संस्थापयितुम् ।
किं किं न मया क्रियते लोके यत्नस्था भारतजनताहम् ॥

अभितः परितः समया निकषा मां यद्घटते तत्प्रेक्षेऽहम् ।
सर्वस्य कृते खलु सज्जा या सावहिता भारतजनताहम् ॥

किं किं स्मरामि किं विस्मरामि, किं किं लिखामि किं किं पठामि ।
किं वा गायामि निजां गाथाम् अविकत्थनभारतजनताहम् ॥

अथवा किं बहुना रमाकान्त ! संक्षिप्ततया सत्यं भणामि ।
हरिमेव जगज्जगदेव हरिं पश्यन्ती भारतजनताहम् ॥

परतन्त्रो मा भूत्क्वापि कोऽपि सर्वः सर्वत्र सदा नन्दतु ।
जगतः स्वतन्त्रतामिच्छन्ती मोदे खलु भारतजनताहम् ॥

निकषा

(ले० प्रो० केशवचन्द्र दाशः, पुरी)

अनुस्वारायते टिट्टिभी। तथापि परिक्रमा न समाप्ता भवति। सा परिक्रमते··· संक्रमते······आक्रमते। तथापि अभिक्रमणस्य मार्गो न मिलति। केवलं परिचरणम्·····परिभ्रमणम्·····परिक्रमणम्··· प्रदक्षिणम्।
वासर आषाढीयः।

विहरति विहगी। वहति वातः। वारिधारा विनोदिनी। प्रकाशो विवशः। आर्द्रता प्राणमयी। गुल्मानि सतृष्णानि। पन्थानस्तु गमन-परिपन्थिनः।

विषुवशिशुरिव विविक्तभग्नांशः स्मरणार्थं सर्वनाम एव। निकटे शाल्मलीतरुः महामेरुः। चतुःपार्श्वे तृणजीवनी तु अलक्ष्यसर्जनी। गुल्म-विभवे भग्नांशो मनोहर। विकलोऽयं तथापि व्याकुलः निजजातक-निमित्तम्··। तस्य जातकं कुत्र···? कः तस्य जन्मदिनाङ्कः? का सा वेला···? कुत्र वा सः प्रतिभूः·····ज्योतिषः···?
साक्षी विमथ्यमानः।

आषाढयामिनीनां कस्मिन्नेकप्रलयप्रवाहे तस्य जातकं परिभ्रष्टम् ···नष्टम्··। प्रायः, शनिमहादशायां सा एका तिथिविहीना वेला।

टिट्टिभी सुस्पष्टा। ध्वनिरपि तस्याः श्रुतिगोचरः। ध्वनिषु शुभायते भग्नांशविभा। भग्नांशोऽयं लघुग्रामस्य देवालयः। ग्राम्यवसतिः देवालयस्य परिधिः। निकटनिर्झरः अस्य इतिहासः। निर्झरवालुका अस्य केलिशाला। समीपस्थपर्वतः अस्य नीरवनेपथ्यम्। नर्यत्नपादपा अत्र नित्यपुष्पाः। तथापि गहनेऽस्मिन् लघुविपिने प्रौढिमुदाहरति स्थवीयान् अयं भग्नांशः।

ह्रसीयान् वृद्धः तथापि कर्मठः। पाषाणीया रतिः तस्य अद्यापि वर्षीयसी। भग्नांशस्य शेषांशेष्वपि सः यत्नवान्। पाषाणान् स्तूपी-करोति। विषमान् समीकरोति। विकलान् सकलीकरोति। सकलं च सन्निधत्ते। नयनाग्रे तस्य सूर्यः केवलम् अस्तमेति। सकलजपेषु वयः स्वादः तथापि प्रणवः।

वृद्धोऽयं गोविन्दः ।
मन्दिरमिदं तस्य पैतृकसम्पत्तिः । स च इह विपाकपूजकः । उपासना-परंपरायाः शेषवंशधरः । यौवनं तस्य भग्नांशस्य प्रकोष्ठेऽस्मिन् व्ययितम् । स च अत्रैव वृद्धः संजातः । तस्य परिवारकल्पनायां प्रतिमाद्वयमेव जनानां वचनपथे अवतरति—सः…,तस्य वृद्धा विधवा भगिनी यमुना च ।

भग्नांशस्य एकस्मिन् जीर्णप्रकोष्ठे उभयस्य निवासः । चिरतरः अत्र तयोः अनुरागः । परमनुदिनं भग्नांशतः पाषाणः स्खलति । छिद्राणि शरीरं वर्धयन्ति । नवतृणानि आविर्भवन्ति । सन्धिः वियुज्यते । पुरातन-वातायनेषु नूतननयनानि आलोकं पिबन्ति । तथापि तरुवरच्छाया इह दयाप्रणयिनी ।

संध्या अत्र बंध्या । अन्धकारश्च कबन्धः । सुन्दरी तु मन्दोदरी खद्योतिका । शारदीया मञ्जरी इह क्षणाय स्वप्नजीविनी । अयमेव विशेषः । ततः सैव वारिधारा । लघुनिलयानां सैव ललितलीला । तदेव निर्झरलालित्यम् ।
आकाशो मेदुरः ।

मेघो वर्षति । वीथिषु जलप्रवाहो मन्थरः । प्रवाहेऽस्मिन् बालकेलिः चपला । गोमूत्रेषु पल्वलीभवति गोशाला । निर्झरकुञ्जमद्य आषाढस्य शौचालयः ।

यमुना अस्वस्था । शय्यायां नयनं निमील्य पतति । मध्ये मध्ये सा पृच्छति ।

—गोविन्द…।

— हुँ…। किं वदसि ?

—वृष्टिः न विरता ?

—नहि ।

—भवतु… …।

गोविन्दः पूजायां मग्नः । गुञ्जन् गुञ्जन् स्तोत्रं पठति । भगिनी अन्तरा अन्तरा पृच्छति ।

—गोविन्द……! माया कदा आगमिष्यति ?

—हुँ …, आगमिष्यति ।

—परं कदा ?

गोविन्दस्तु स्तोत्रं पठति। मध्ये विरम्य प्रतिमोपरि पुष्पाणि स्थापयति।

-- गोविन्द··· !

—किमर्थं सदा "गोविन्द······गोविन्द···" ?

—अरे···? अस्मिन समये यदि सा नागमिष्यति तर्हि कदा आगच्छेत ?

—स्थानमिह कुत्र ? कुत्र वा सा निवसेत् ? सा तु अधुना वयस्का। एकस्मिन प्रकोष्ठे ·····?

—नूतनं गृहं निर्मितं खलु ?

—तत्तु न संपूर्णम्।

—प्रकोष्ठमेकं तु संपूर्णम् !

—तत्कृते प्रकोष्ठद्वयमावश्यकम्।

—प्रकोष्ठद्वयम्······?

- नूनम्। यदि सा आगमिष्यति तर्हि न पुनः सा एकाकिनी निवसेत्।

—सत्यम्···। समीचीनम् उक्तम्।

यमुना आश्वस्ता भवति—बहुदिनात् माया इतः प्रस्थिता। अधुना सा मातुलगृहे। तत्र सा सानन्दं निवसति इति गोविन्दो वदति। सा तु मम कन्या। नूनमेकदा मत्समीपं प्रत्यागमिष्यति। अत्र कः सन्देहः ? पुनश्च किं वा वर्तते अत्र तदर्थम् ? निवस्तुमिह गृहं नास्ति केलिनिमित्तं तथाविधाः सख्यः न सन्ति भोजनाय अपि अन्नं नास्ति। अथवा अत्रागम्य किं सा करिष्यति ? किं वा द्रक्ष्यति ? किमिदं ······· भग्नप्रकोष्ठम् ?

इत्थं मनसा विजल्प्य सा वदति।

—गोविन्द···!

--उम्··।

—माया तत्र निवसतु। मा याहि ताम् आनेतुम्।

गोविन्द उदासीनः। हृदये तस्य अर्धशताब्दस्य विषादलेपः। भगिनी यमुना इयं तदा बालिका। ज्येष्ठा अपि सा कनिष्ठा इव आचरति स्म। अद्यापि स्वरे तस्याः स एव स्नेहाधिकारः। सा एव कनीयसी चपलता। सैव बाल्यप्रवृत्तिः ·····गृहनिर्माणाय।

अङ्गणं परिष्कृतम्। तत्र प्रकोष्ठमेकं निर्मितम्। प्रकोष्ठस्य निर्माणे बहुधनं व्ययितम्। बहुपरिश्रमोऽपि कृतः। पितामहकालतो यत् संचितमासीत् तत् सर्वं गतम्। तथापि गृहं न संपूर्णम्।

एतदर्थं गोविन्दः चिन्तित । पूजावसरे यत् किंचित् दक्षिणारूपेण मिलति तत्तु द्वयस्य भोजनाय पर्याप्तं न भवति । को वा अत्र तथाभूतदानी ? सर्वे तु दरिद्राः । प्रसादार्थं सर्वेषामाग्रहः । कृपानिमित्तं सर्वे भिक्षवः । किं वा वर्तते एषु त्यागाय ? केवलं परिश्रमः……केवलं जीवनम् ।

कदा क्वचित् वा परदेशी कश्चित् जनसेवार्थमिह आगच्छति। कियद्दिनं स्थित्वा सः पुनरपि दीनः संजायते । निवस्तुं गृहं न प्राप्नोति। अन्ततः निजदेशं प्रत्यागच्छति ।

अत्र पुनः गृहमिति न किमपि अस्ति । सर्वं कुटीरमेव । धनदाने च तदपि न मिलति । एतदर्थं गोविन्दः गृहनिर्माणकल्पनाम् अकरोत्। गृहेऽस्मिन् प्रकोष्ठद्वयमेव । एकस्मिन् सः निवसेत् । भगिनी तु जरातुरा। तस्याः तत्र निवासे न काऽपि हानिः । अपरप्रकोष्ठं तु परदेशिनां कृते। परदेशिनः तत्र निवसेयुः । भाटकरूपेण किंचित् धनमपि प्रयच्छेयुः। भाटकधनेन कियत्परिमाणेन अभावपूरणं भवेत् ।

इदानीं तु प्रकोष्ठमेकं निर्मितम् । अपरप्रकोष्ठस्य कृते धनं नास्ति। धनागम केन प्रकारेण वा कर्तव्यः ? यदि कश्चित् परदेशी आगच्छेत् तर्हि इदानीं स अस्मिन् प्रकोष्ठे निवसेत् । यत् किंचित् धनं दद्यात् तेनैव अपरप्रकोष्ठस्य निर्माणं सम्भवेत् । मन्दिरमिदमधुना आवयोः निवासो भवतु । का हानिः…?

गोविन्दः प्रतीक्षते ।

प्रतीक्षायां वार्धक्यं नाटकीयम् । अन्वेषणे दौर्बल्यं भाटकीयम्। पूजायां माया एव माहेश्वरी । तथापि जपेषु प्रणवः पार्थिव: चित्तविक्षेपश्च स्वस्तिबोधः………परदेशी आगमिष्यति ।

भग्नांशस्य अन्तराले अयुतकिंवदन्ती अद्यापि कान्तिमती ।

… …केयम् ? केयं गन्धहीना अन्धवीथिषु संचरति ? अभिसारिका शतभिषा ? …नहि, उपासिका शतभिषा । मुकुलितकबरीमध्ये श्वेतकलिः श्वेतदुकूले च सात्त्विकविभा । हस्ते पूजास्थाली । मुखमण्डले आतिथेयी । अर्चना……।

—राजन्……! राजन्……!

गर्जितवान् गोविन्दस्य पितामहः ।

—राजन्……! नेयं राजनर्तकी । इयं कूलवधूः ।

बन्धुरा आसीत् तिलतण्डुलिता आषाढसंध्या तदा । तदनु प्रसूतिकाया आर्तनादो निर्ममोऽभूत् । देवालयः समरभूमिः अभवत् । परिणामः भयंकरः संजातः ।

किमयं शतभिषायाः अभिशापः ?

नहि , एतत्तु जनश्रुतिमात्रम् ।

गोविन्दः पूजासदने आसीनः । निरामयकामनया यमुना तत्र निमीलितनयना । तथापि नम्रनिवेदने तस्या माया एव याच्ञा । अनुभवे सा एका अनिर्वचनीयमाधुरी । जीवनेऽस्मिन् त्रिकालस्य समन्वयशोभा । वर्हिविश्वस्य शान्तये सा पुनरेका सान्त्वनाधारा । यमुना आश्वस्ता— माया प्रत्यागमिष्यति ।

पूजाविशेषे दिवस समस्यते । नीराजनासु नैवेद्यायते पश्चिम-जीवनी । संकुचितनमोमुद्रायां वात्सल्यजडीभवति मुक्तये लोतकम् । समर्पणेषु माल्यायते अतीतस्य विषादलेशः । तथापि शान्तये आत्मनः स्वस्तिनाद एव सामग्रीभवति ।

गोविन्दः व्यापृत :

गृहनिर्माणं प्रचलति । यमुना तत्र संचरति । उपलानि एकीकरोति । तृणानि उत्पाटयति । नतोन्नतप्रदेशान् समतलीकरोति । नवप्रकोष्ठं पुनः पुनः परिष्करोति । अलिन्दमुपलिपति । ततः इन्धनानि संगृह्णाति । गोशालायां च तत् सर्वं संस्थापयति ।

प्रकोष्ठेऽस्मिन् तस्य महान् आदरः । यतो माया अत्र निवत्स्यति । तस्या एव अत्र अधिकारः । अतः यमुना अत्र उपवेष्टुं कस्मै अपि स्थानं न ददाति । सदा कुक्कुरान् विताडयति । विहगान् करतालेन दूरयति । यदा आलापार्थं केचित् आगच्छन्ति तदा अलिन्दतले एव आसनं ददाति । गृहप्रतिष्ठा न जाता । होमसंस्कारोऽपि नाभूत् । महेश्वरस्य अभिषेकः न संजातः । अन्येषां पादपतनेन गृहमिदम् अपवित्रं स्यात् ।पुनश्च योऽत्र निवसेत् तस्यापि अमङ्गलं भवेत् । परं यदा माया आगमिष्यति तदैव गृहप्रवेशः ।

गोविन्दस्य स्मरणे काल एव अतिथिः ·····।

अतीतस्य वेला भिन्ना आसीत् । समयः कर्मानुसारी आसीत् । अद्यत्वे तु सर्वं पर्याकुलम् । न किमपि नियतमस्ति । सर्वं पुनः वर्धन-शीलम् । सर्वं वर्धते । परं जनो न वर्धते । वर्धते केवलं तस्य उदरः तस्य व्याधिः ·· तस्य विचिकित्सा · तस्य नपुंसकता ···· ।

तथापि जीवनधारणार्थं योजना आवश्यकी। योजना तु भवति। किन्तु न तस्याः परिपूर्तिः। इत्थमनेका योजना स्वीकृता तिरस्कृता अपि। फलं तु यथा तथा। अत्र कारणं स्पष्टं—सर्वं भोजनरूपेण स्वीकर्तुं शक्यते। किन्तु करप्रक्षालनाय जलमावश्यकम्। परं यदि जलं भोजनत्वेन गृह्येत तदा केन हस्तप्रक्षालनं भवेत् ?

निःश्रमो रविवासरः।

यमुना इतस्ततो भ्रमति। गृहं च पुनः पुनः पश्यति। ह्यस्तने प्रकोष्ठमिदं चूर्णेन धवलीकृतम्। अद्य इदं निर्मलं दृश्यते। अतः निवसनाय उपयुक्तम्। परमियत्सु न कार्यसमाप्तिः। अस्य सज्जीकरणमावश्यकम्। अतः यमुना अद्य तस्याः पेटिकाम् उन्मोचितवती। तत्र च बहुदिनात् संचितानि चित्राणि निष्कासितवती। इमानि तु केवलं कन्याचित्राणि। एषु चापि कति विवाहस्य निमन्त्राणि सन्ति। सा सर्वाणि एकीकृत्य प्रकोष्ठे स्तूपीकरोति। एकमेकं च भित्तौ स्थापयति। क्षणं च पश्यति। ततो निदधाति। पुनः निरीक्षते। ततो हसति। तदनु विलपति—सर्वमेतत् मायायाः चित्रम्। तस्या बाल्यं, तस्या कैशोरं, तस्याश्च यौवनम् एषु प्रस्फुटितम्। सर्वा अपि कन्या 'माया' एव। माया तस्या कन्या। सा अत्रैव विवाहं करिष्यति। अत्रैव सुखिनी भविष्यति।

अनुकूलवेदना सुखस्य अपरनामश्रीः। परमस्यां पर्य्युत्सुकता विषादस्य निदानविन्दुः। विन्दुरयम् आणवयुद्धं सृजति अन्तःकरणे। वार्धक्यं वैधव्यं च समरस्य परिणामो भवति। ततः प्रवृत्तेः विलापे अनपत्यता नभोमयी प्रतिपद् संजायते।

यमुना तन्मयी।

सजलनयने तस्या 'माया'रूपा घूर्णिः कन्यावात्सल्ये हृदयं सिक्तम्। उत्कण्ठायां जडीभूतं मनः।

—भगिनि ! भगिनि···? यमुने !

सम्बोधयन् उपस्थितो गोविन्दः।

—किमत्र करोषि ! अरे···! किमिदं कृतम् ? सर्वं नाशितम्। यः अत्र निवसेत् किं सः चिन्तयेत् ?

—किं चिन्तयेत् ?

—त्वंतु सर्वमिदं मलिनीकृतवती।

—न मलिनीकरोमि। परं सज्जीकरोमि।

—योऽत्र निवसेत् सः सज्जीकरिष्यति । तव किमर्थं चिन्ता?

—को निवसेत् ?

—परदेशी ।

—परदेशी ··! कोऽयं परदेशी ··? अत्र माया निवत्स्यति । सा एव अधिकारिणी अस्य । अन्यस्य कस्यापि स्थानमिह नास्ति ।

गोविन्दः नीरवः · ।

भावनायां तस्य एकतः परदेशी । अन्यतो माया । उभयस्य शारदीयसंपर्कतले उन्मादिनी यमुना दुस्तोषणीया । वयोग्रस्तः गोविन्दः केवलं समन्वयम् अभिलषन् इष्टदेवनिकटे आनतः । सकलनिमीलने तस्य तथापि एका वेदमेदुरा दीर्घलिपिः जीवनस्य आदिनादं सनाथयति । उद्भासते च उपासना शिल्पायनी, यत्र स एकः ह्रस्वकिङ्करः । गोविन्दः मनस्यति ।

तद्दिने पञ्च क्षुधार्ताः शिल्पिनः उपस्थिताः । सर्वे कातरभावेन एकेनैव स्वरेण अन्वनयन् ।

—राजन्······! मन्दिरस्य पूर्णतानिमित्तं समयः अपेक्षते । निर्मितिरियमेका कला । कला च जीवनस्य विम्बरूपा । इयं च जीवनाय कल्पिता । यथा भवतां कीर्त्तिः परितः प्रसरेत् तथैव यत्नः क्रियते अस्माभिः ।

—नहि···। यूयं प्रतारकाः । युष्माकं वचने न मे विश्वासः ।

—वयं क्षुधार्त्ता, राजन् ! दिनत्रयेभ्यः अद्यावधि अन्नस्य दर्शनं न कृतम् । अनुगृह्णातु अस्मान्······।

—भवतु······। गम्यताम्·· ··।

शिल्पिनः प्रस्थिताः । राजा सत्वरम् आदिशत् ।

—प्रहरिन्···!

—प्रभो···!

—यावत्कालपर्यन्तं निर्माणं न समाप्तं तावत्कालं यथा शिल्पिनः जलमपि न स्पृशेयुः तथा व्यवस्था क्रियताम् ।

आज्ञावहः प्रहरी प्रस्थितः । तदनु शिल्पिनां अन्नप्रतीक्षा स्वेदजर्जरा अभूत् । तेषां लोतकेषु मन्दिरस्य पाषाणाः कलुषिताः ।

किमथं भग्नांशः लोतकस्य परिणतिः ····??

नहि, एतत्तु जनश्रुतिमात्रम् ।

अतीताऽपि विपत्, तस्याः स्मृतिः तथापि भयङ्करी । गोविन्दो विषण्णः । मनसि तस्य अतीतलेशः तथापि अकरुणः ।

यमुना अद्य नितरामस्वस्था। निकटे न कोऽपि अस्ति। सा च 'माया ··माया'···इत्येवं प्रजल्पति।

—माये···! माये···! कुत्राऽसि त्वम्! न पुनः मां विलोकयितुं शक्ष्यसे। समय उपगतः। अहं चलिष्यामि। 'शेषसमयेऽस्मिन् न ते चिन्ता मां जहाति। अहं रुग्णा···त्वदर्थमेव।

गोविन्दः ज्योतिषमानीय उपस्थितः। यमुना किंचित् आश्वस्ता संजाता।

—ज्योतिषमहाशय! प्रायः, इयं मे शेषावस्था।

—नहि! आश्वस्ता भव। अहं जातकं पश्यानि।

—गोविन्द! जातकं तस्यां पेटिकायामस्ति। तदानय···।

ज्योतिषः ग्रहचक्रमङ्कितवान्। गुञ्जन् गुञ्जन् अङ्कान् कषितवान्। ततः सान्त्वनापूर्वकमवदत्।

—भगिनि···। अधुना ते आयुः अस्ति। व्यस्ता मा भव।

—का दशा अधुना?

—शनिमहादशा।

—कियत्कालं भोगः?

—भोगस्तु अनेकदिनपर्यन्तम्। किन्तु न तथा हानिः भवेत्।

—हानिस्तु भवति।

—तदर्थं प्रतीकारः करणीयः।

—प्रतीकारः···! कीदृशः···?

—शनिवासरे दानं कर्त्तव्यम्।

—किम्भूतं दानम्?

—कृष्णधनम्·· कृष्णधनं नाम···कृष्णवसनम्, कृष्णा गौः, कृष्णवृषभाय भोजनम्, कृष्णजनेभ्यश्च अन्नम्। शनिवासरे एतत् सर्वं दानरूपेण प्रदातव्यम्। अनेन पापदशा खण्डिता भवेत्।

—रोगः केन रूपेण शमिष्यति?

—दशाखण्डने रोगनाशः। परं यदि शीघ्रमारोग्यं काम्यते तर्हि रुद्राभिषेकः करणीयः। ततश्च शिवमन्दिरे महामृत्युञ्जयमन्त्रस्य जपः करणीयः अथवा अतिप्रत्यूषे शक्तिपीठे चण्डीपाठः करणीयः।

—एतत्सर्वं कथं वा सम्भवेत्?

—कथं न? भ्राता गोविन्दो वर्तते। स तु सर्वमायोजयिष्यति।

—भवतु ·, भवतां कृपा···।

गोविन्दः सविनयं शनैः अभाषत।

—इदानीं ज्योतिषो गमिष्यति। तस्य दक्षिणा…?

—हँ…, भवतु। पेटिकायाम् अस्ति। तदानय…।

ज्योतिषः दक्षिणां प्राप्य हर्षोत्फुल्लः संजातः। गन्तुं च उद्यतोऽभूत्। यमुना प्रणतवती।

—माऽस्तु……माऽस्तु……। अधुना भवती रुग्णा…। माऽस्तु प्रणामः। ईश्वरस्य करुणा युष्माकमुपरि अस्ति। अस्माकं च कल्याणमस्ति। रोगः नूनमुपशमेत्। हँ भवतु, भ्रातः! अन्यत् अन्यदा…।

ज्योतिषः निष्क्रान्तः। तस्य जातककथायां सैव प्राचीनयाच्ञा वीजा रङ्कुन्यायेन अद्यापि ईश्वरं संसारं च ग्रहचक्रेषु भ्रमयति।

करुणायां ऋणी अधुना रुग्णनिलयः। जरदुल्लुकस्य परिवारे तथापि रजनीयं चिन्तानिविडा। गहना च तिमिरतृष्णा। आहारं विना ,चित्करोति टिट्टिभशिशुः निकटपल्वले। तारापुञ्जेषु वारुणी केवलं प्रकाशश्रावणी। नीलनभो योगेश्वरः।

गोविन्दनयने नीलरात्रिः विनिद्रा अभूत्।

प्रतिवेशिनी मीनाक्षी प्रातः उपगम्य कुशलमपृच्छत्। गोविन्दस्तु विमुख आसीत्। अद्य यमुना अपि न मुखं विमोचयति। किं कर्तव्यम्? कुत्र वा औषधिः प्राप्येत? एवं चिन्तामग्नो गोविन्दः। मीनाक्षी तस्य मनोभावं विज्ञाय अवदत्।

—भ्रातः! ह्यस्तने कश्चित् वैद्य आगतः। अस्माकं ग्रामे तस्य नियुक्तिः संजाता इति श्रूयते। यदि भवान् तमुपगच्छेत् तर्हि…।

—हँ। तदेव करिष्यामि…।

गोविन्दः वचनात् विरतः। मीनाक्षी निजमनोभावं वक्तुं अवकाशं न प्राप्तवती। पूर्ववत् अद्यापि हताशया प्रस्थितवती।

तस्याः कष्टगमनं निरीक्षते गोविन्दः। चिन्तयति अपि। नवीनेऽस्मिन् प्रकोष्ठे सर्वेषां दृष्टिः। मीनाक्षी बहुवारम् अनुरुद्धवती, "भ्रातः? अहमपि परदेशिनी। अहमपि भाटकं दास्यामि"…। गोविन्दस्तु न कदापि किमपि वदति। युवती मीनाक्षी अत्र वृद्धा संजाता। यायावरी सा अत्रैव स्थायिनी अभूत्। तस्याः शिक्षकपतिः अत्र पुनः वृद्धोऽभवत्। शिक्षकतानिमित्तं ग्राम्याः तस्मै भूमिं प्रदत्तवन्तः। तस्य च शिक्षकता समाप्ता। वराकः दिवंगतः। परं तथापि

गृहमेकं निर्मातुं नाशकत्। अद्यापि परगृहे मीनाक्षी निवसति। दुःखं सहते। भर्त्सनां निजीकरोति। तथापि जीवनधारणाय असहाया सा तामेव पत्युः वृत्तिं अद्यापि जीवयति। इदानीं सा शिक्षयित्री। ग्रामस्य पूज्या। बालानां गुरुमाता।

अभिनयद्वारा जीवने नानाकथा निह्नोतुं शक्यते। परं कस्मात् निह्नूयेत ? सर्वत्र स एवं प्रकृष्टप्रकाशः। स एव अवकाशद आकाशः। सर्वत्र तस्य च शक्तिः··· स्वरूपमयी···तटस्था···बहिरङ्गा अपि। भग्नांशेऽस्मिन् तु अधिष्ठानसाक्षात्कार एव पदार्थायते। अतः गोविन्दस्य सकलविषादोपरि स्वरूपायते···"अस्ति"···"भाति"···"प्रीणाति"···।

—गोविन्दः वैद्यमुपगतः।

वैद्योऽयं युवकः। नाम्ना चरकः। वयः पञ्चविंशतिः। वेशः तस्य साधारणः। व्यवहारोऽपि विनयशाली। उदासीन इव प्रतीयते। पर न उदासीनः। मनसि सदा अनुसन्धित्सा। अतः चिन्ताशीलः। शिक्षानन्तरं ग्रामेऽस्मिन् तस्य इयं प्रथमनियुक्तिः। गोविन्दश्च द्वारे तस्य प्रथमरोगी। चरकः आनन्दितः।

—आगच्छतु···अन्तरागच्छतु···?

—नमो नमः, मान्य ?

—नमो नमः। किं भवति भवताम् ?

—भगिनी मे नितरामस्वस्था। सा तु अत्र आगन्तुम्···

—न प्रभवेत्। भवतु···।

—यदि भवान् मम गृहम्···

—हँ···। गमिष्यामि। अधुना तु स्नानादिकं न समाप्तम्। पुनश्च अयं वर्षाकालः। अस्य गृहस्य स्थितिः कीदृशी,··पश्यतु···। किं वा करवाणि ? भवतु···, अनुपदं गच्छामि। चलतु भवान्।

गोविन्द आश्वस्तः। प्रस्थातुं च उद्यतः। समयेऽस्मिन् चरकः अपृच्छत्।

—कुत्र भवतां गृहम् ? प्रष्टुं तु विस्मृतम्।

—न काऽपि असुविधा। तत्र मन्दिरं दृश्यते किल ! तदेव मे गृहम्। अभिलक्ष्य आगच्छतु।

—भवतु··।

वृद्धः प्रस्थितः।

युववैद्यः कियत्समयानन्तरं गृहात् निर्गतः। मार्गः कर्दमपूर्णः। तत्र गोवलीवर्दानां पदचिह्नानि पल्वलायन्ते। पार्श्वे च गुल्मानाम् आनतिः अर्धमार्गम् आवृणोति। पुनश्च मार्गेऽस्मिन् लघुनालिकानां सम्मिश्रणेन चतुष्पथः सृज्यते। पदे पदे पादस्खलनस्य भयः। तथापि जानुपर्यन्तं वसनमाकुञ्चयन् चलति चरकः।

पार्श्वगृहाणाम् अलिन्दे उपविष्टा बालका एनं नवीनजनं विलोक्य विस्मयन्ते। वातायने प्राप्तवयस्काः एनमालोक्य आश्चर्यमनुभवन्ति। वृद्धाः प्रशंसन्ति। चरकस्तु मार्गमेव दर्शं दर्शं मन्दिरनिकटे उपस्थितः। तत्र मार्गः समाप्तः। स इतस्ततः पश्यति। सम्मुखे लघुविपिनमेकम्। देवालयस्तु न दृश्यते।

गोविन्दः अदूरतः शब्दापितवान्।

—आगच्छतु ··। अत्र गृहम्।

स्वरमभिलक्ष्य चरकः पुरः सृतः।

पीडिता यमुना आसीना। शय्या पर्य्याकुला। निकटे जलपात्रं शून्यम्। ताम्बूलधानी अवहेलिता। अद्य करचरणयोः शक्तिः नास्ति। मुखेऽपि वचनं नास्ति। कदा क्वचित् केवलं नयनद्वयेन पश्यति। चिन्तयति, 'माया' कदा आगमिष्यति। यदा पीडातिशयमनुभवति तदा बलात् सम्बोधयति।

—गोविन्द···! गोविन्द···!

—हँ·· ·।······आगतः।

—माया आगता······?

—नहि, वैद्य आगतः।

यमुनानयने युववैद्यो यथा तस्या जामाता। सा मनाक् प्रसन्ना। सादरमपृच्छत्।

—पुत्र···! किं ते नाम ?

—चरकः।

—अहो, साक्षात् वैद्यराजः।

—मातः ? किमनुभवसि अधुना ?

—पुत्र···? अधुना मे शनिमहादशा। नितराम् उदरज्वालामनुभवामि। ज्वरमात्रा च न मां त्यजति।

—न किमपि चिन्तय। सर्वं कुशलं स्यात्।

—नहि, अधुना मे शनिमहादशा। एवं पीडिता···स्याम्···।

—नय…। इदमौषधम् अधुनैव इदं गृहाण। मध्याह्ने सक्तुत् पानीयम्। पुनः सायंकाले सक्तुत् पानीयम्। सर्वम् उपशमिष्यति।

अञ्जलिबद्धो गोविन्दः कृतज्ञोऽभवत्।

—मान्य…? किं पथ्यं किं वा पेयं देयम्?

—आगच्छतु मया सह। सर्वं लिखित्वा दास्यामि।

—किं तु भवतां पारिश्रमिकम्… ?

चरकः कियत्कालं यमुनामपश्यत्। यमुनाया दृष्टिः तदुपरि सतृष्णा…स्नेहमयी वात्सल्यप्रणयिनी…। सकरुणः चरकः सान्त्वनामुखेन अभाषत।

—नहि, न किमपि चिन्तयतु। प्रतिदिनं तु मया आगन्तव्यमत्र।

यमुना बलात् अवारयत्।

—किमर्थं गमनागमनम्? मम गृहं वर्तते। अत्र निवस। अधुना वर्षाकालः। ग्रामेऽस्मिन् न तथा समीचीनं गृहमस्ति। त्वं तु परदेशी…।

—भवतु, विचार्य कथयिष्यामि।

—नहि, त्वमत्र निवस। अनन्तरं माया आगमिष्यति। सा अपि……।

—विरम, यमुने…! कथमेवं प्रजल्पसि?

गोविन्दः विरक्तः संजातः। चरकस्य करं धृत्वा तं वहिरानयत्।

—वैद्यराज! सा एका उन्मादिनी इव। अधुना अधिकतया मस्तकं तस्या विकृतम्। इतस्ततः प्रजल्पति। किमपि न चिन्तयतु भवान्।

—नहि…नहि…, सा मे जननीरूपा।

कथयन् चरकः पुरः सरति। अनुसरन् गोविन्दः अनुनयति।

—वैद्यराज! वयं तु ऋणिनः भवन्निकटे। वस्तुतो भवदीयपारिश्रमिकं दातुमस्माभिः न शक्यते।

—तर्हि किं चिन्तयन्ति भवन्तः?

—यमुना यदुक्तवती तत् समर्थ्य अहं वदामि।

…किम्…?

…सा तु रुग्णा। औषधिः अपेक्षते। तदर्थं धनमपि आवश्यकम्। इयद्धनं कुतो वा अस्मन्निकटे? अतः भवान् अस्माकं गृहे निवसतु। मासिकभाटकरूपेण यद् दातव्यं तदिदानीम् औषधिनिमित्तं नयतु।

चरकः पश्चात् अपश्यत्। प्रगल्भो गोविन्दः कातरभावेन निजमनोभावं प्रकटयति।

…अनेन अस्माकं लाभः। भवतोऽपि सुविधा।

…भवतु…। इतः प्रत्यागच्छतु। अहं श्वः आगमिष्यामि।

…नमस्ते।

…नमो नमः।

भग्नांशेऽस्मिन् मिलनवासरः कियान्न मलिनः??

जीर्णमन्दिस्य भग्नचूडायां नाना पताका अपरक्ता। पूजाचत्वरे नाना महोत्सवाः सुमनस्तबकमिव अद्य क्रमविहीनाः। नीराजनां सज्जीकृत्य गोविन्दः चिन्तामग्नः—

राजा विलासी। नितरां कीर्तिप्रियः। तस्य चाटुकारा अपि अनेके। सर्वेषां तेषां सख्यम् अर्थमूलम्। कदा समयः अनुकूलः…ते एव जानन्ति। ते पुनः निश्चिन्वन्ति कदा वा राजा सन्तुष्टः। कदा वा राज्ञी तस्याः प्रभावं राजकार्ये उपन्यस्तुं शक्नोति। तस्मिन्नेव समये ते उपस्थिताः।

…बन्धुवर…! निर्माणार्थं किय द्धनमपेक्षते पुनः?

—राजन्…! यथा भवतां कीर्तिः प्रसरेत् तथा क्रियते। पुनश्च भवादृशानां मनोऽनुसारं राज्ञ्याश्च मनोऽनुगुणं कार्यं भवेत् किल…!

—भवतु। शिल्पिमुख्यम् आह्वय।

बन्धुवरः शिल्पमुख्येन सह मन्त्रयति।

—पश्य…! यथा अस्माकं लाभः स्यात् तथा वक्तव्यम्।

शिल्पिमुख्यः अनुनयेन वचसा विबोधयति।

—राजन्! भवतां बन्धुवरः अस्माकं कार्यं निरीक्षते एव। स एव सर्वं जानाति। स एव प्रमाणम्।

—भवतु। यथा मन्दिरं रुचिसम्पन्नं स्यात् तथा कर्तव्यम्।

—यथेच्छति महाराजः।

बन्धुवरः शिल्पिमुख्येन सह परामृशति।

—पश्य, यथा मन्दिरं बहुदिनं न तिष्ठेत् तथा यत्नः कर्तव्यः। तथा च पाषाणादिवस्तूनाम् उपयोगः कर्तव्यः। अन्यथा लाभो न स्यात् पुनश्च एवं कुरु येन अस्माकम् आजीवनं मन्दिस्य निर्माणमेव भवतु।

किमयं भग्नांशः तस्यैव परामर्शस्य विकारः……?

नहि, एतत्तु जनश्रुतिमात्रम्।

गोविन्दः प्रकृतिस्थः अभवत्। नयने अभासत परदेशी उपकारी चरकः… भगवत्प्रेरित आगन्तुकः। तदनु अखेलत् निजभाविनी निजभाविनी निरामयजीवनी। शमोपशमयोः शाश्वतधारा। क्लमापनयस्य एका मलयविपणी। आत्मरतेश्च विजनवनानी।

सुसमय उपस्थितः ।
गोविन्दः प्रसन्नः ।

अद्य पूर्ववत् मीनाक्षी प्रत्यागता। जलमिव समतलं तस्याः श्रमशीलजीवनम् । तथापि विविधवेदनया सीदति सा तस्मिन्नेव जीर्णसदने । वराकी किं वा करिष्यति ? आत्मीया इति तु आत्मजा एव । सा पुनः प्राप्तवयस्का । आषाढनभसि यथैका सौदामिनी सा। इयं सूची तस्याः जीवनस्य·· उर्वरयौवनस्य अंगीकृतजननीकल्पस्य ···। तदर्थमेव गोविन्दस्य मन्दिरमण्डपे सा अद्यत्वे वादमयी ·· जल्पमयी · वितण्डामयी कलहस्य रमणीयस्थली । तथापि तन्निकटे ईश्वरस्य प्रकाश आदर्शः । अत्रैव तस्या विनयविनतिषु सरलस्वरस्य नम्रलिपिः झङ्कारमाहरति ।

—हे भगवन् ! सूची इयं तवैव प्रसादः। अस्याः पार्थिवगर्भे अपार्थिवज्योतिः भरतु भवान् ।

मीनाक्षी प्रतिष्ठते। ततः मन्दिरस्य मायां विस्मरति । मनसि तस्याः न प्रतिमायाः न वा प्रतिकृतेः अवकाशः । केवलं वार्धक्यशय्यायां प्राचीनकर्मधारा वेगवती ।··· तत्त्वतः सा जननी। स्वयम् आत्मनः प्रतिनिधिः ।

परदेशी समागतः ।
गोविन्दः नितराम् आह्लादप्रवणः। तस्य आशा पूर्णा । श्रमश्च सार्थकः। प्रतीक्षाऽपि समाप्ता । गोविन्दः सत्वरम् उत्थाप्य तमुपगम्य निरदिशत्।
···आगच्छतु । अस्मिन् प्रकोष्ठे सर्वं स्थापयतु ।

प्रकोष्ठस्य द्वारं विमोचितम्। चरकः आश्चर्यान्वितः ।

·· किमेतत् सर्वम्...?
इदं तु यमुनायाः कर्म ।
···केवलं युवतीनां प्रतिकृतिः ? पुनश्च निमन्त्रणपत्राणि ??
सर्वमेतत् बहिष्करोतु भवान् ।
·· नहि, मान्य ? एतत्तु यमुनायाः सर्वस्वम् । सा उन्मादिनी । किमपि चिन्तयितुं न प्रभवति । केवलं परिकल्पयति···सर्वा अपि प्रतिकृतय मायायाः ।
· माया ··? केयं माया ?
·· माया यमुनायाः कन्या ।
···कुत्र सा अधुना ?

…इदानीं भवान् सद्यो भवतु । अनन्तरं वार्तालापः ।

गोविन्दः यमुनासमीपं प्रस्थितः ।

चरकस्य द्वारसम्मुखे भग्नांशः स्थितप्रज्ञः । तत्र च तृणानां वर्धनस्पर्धी काकलिमयी । चतुःपार्श्वे लघुविपिनं यथा नव ब्रह्मचारी । विशालपिप्पलो गृहस्थः । पाषाणास्तु चतुर्थाश्रमे विश्रामलिप्सवः । तथापि विपिनमिदम् औषधिवनम् । चरकः हृष्टः संजातः ।

तस्य दृष्टिः उन्नमिता । पुरतो राजते क्लिन्ना वसतिः । कर्दमेषु माधुर्यमाहरन्ति लघुकुटीराणि । तेषु पुनः प्राचुर्यमपहरन्ति लघुवातायनानि । चरकनयने सहसा एकस्मिन् लघुवातायने अबलालपनमेकम् अरुणायितम् ।

चरकः अधोमुखः संजातः ।

ततः तस्य नयनपथे केवलम् औषधिः लतापादप तृणगुल्मानां पर्णं मूलं मुकुलं वल्कलम् । मनसि जीवनस्य आयुष्कामना । तदर्थं च अन्वेषणम् । अन्वेषणे तस्य संजीवनी एव परमश्रीः । इयं हि आद्यप्रणवस्य रहस्यलिपिः । यायावरसंकल्पस्य पौषी तपस्या…। जननपुलिने पौर्णमासी कला… । मुनिधुनिषु मौनमेखला… ।

यमुना अद्य स्वस्था । सहर्षं परितः परिचरति । मनसि तस्या कथासरसी तरङ्गायते । निर्मातुं प्रकोष्ठमेकम् अवशिष्यते । कदा इदं पूर्णतां प्रतिपद्येत ? माया इदानीं वयस्का । समयस्तु अपैति । अपगते वयसि संभोगे का वा माधुरी ? वयस्यस्मिन् विवाहः नितरामावश्यकः । अन्यथा देहलोभः शिथिलीभवेत् । समयेऽस्मिन् स्वप्ने वा कुतः शान्तिः ? इदानीं सुसमय उपस्थितः । चरकः समागतः । सोऽपि अभिरूपः । खण्डनादेषु टिट्टिभी कण्ठं शौचीकृतवती ।

चरकः आश्वस्तः । निवासार्थं न पुनः आकुलता । औषधपरीक्षार्थं न वा रोगिणामभावः । औषधिनिर्माणाय न वा मूलवल्कलादीनम् अपर्याप्तिः । जीवनस्य अभिप्रायः अत्र सरलः । चरकस्य सकलचिन्तासु संजीवनी एका तटयोजिका । अस्याः तले जलं निर्गलिष्यति । तेन सह कलुषमपि वक्ष्यति । निर्लिप्ता स्थास्यति इयं तटयोजिका । तदुपरि केवलं स्वरूपप्रचयः । केवलं मनोहरः । यद् दृश्यं वाह्यम् । यद् वाह्यं तदपि आन्तरम् । यद् आन्तरं तत् सप्रकाशम् । यत् सप्रकाशं तदेव रमणीयम् । यद् रमणीयम् तदेव सर्वात्मकम् । यत् सर्वात्मकं तत् शाश्वतम् ।

इदं च दृश्यं··· बुभुक्षितस्य भक्ष्यम् । तृषार्त्तस्य तृषा । कामिनः कामना । ज्ञानिन आराधना । उपासकस्य उपासना । वासनिकस्य वासना । भक्तस्य सेवा । संयमिनः समाधिः । तपस्विनः निधिः । अयोगिनः संसारः । प्रपञ्चिनः कुटुम्बः । बालस्य क्रीडा । युवकस्य आरामः । वृद्धस्य विरामः । क्षीणस्य मरणम् । उदासीनस्य अरण्यम् । अपूर्णस्य प्राप्यम् ।

चरकस्य 'संजीवनी' नेपथ्ये अद्य पुञ्जायते भग्नांशस्य अवयव-विवर्जनम् । पाषाणानां च शरीरतिरोधानम् । काल इह शून्यस्वरूपः चरकः पथविधुरः ।
परं सकलकार्यकलापे यमुनायाः 'माया' एव तस्य श्रुतिचरी । चरमेऽपि वयसि सौन्दर्यच्छटा न निजप्रभावं विजहाति । स्पष्टमेतत् अनुभूयते यमुनाया व्यवहारेषु । यमुना निजसौन्दर्यं कन्योपरि आरोप्य तदेव अन्वेषयति पुनः पुनः । 'माया' इति अक्षरद्वये सा सर्वं समर्प्य उन्मादिनी ।

उत्तापः अद्य नूतनः । जलदः अस्वस्थः । आकाशः स्वस्थीकृतः पर्वतः समाधिस्थः । द्रुमाः प्रसन्नाः । द्रुमच्छाया स्थिरा । लताकुञ्जं मञ्जुलम् । पल्वलं विमलम् । लघुनिर्झरः भास्वरः । वीथिः विनोदिनी । चरकस्य विकल्पो विलुप्तः ।

अद्य आरम्भतिथिः । आरम्भः खोदनस्य ··· नोदनस्य ··· अवचयनस्य ·· अभिहननस्य । ततः अन्वेषणम् पुनरन्वेषणम् । ततः प्रश्न "किम् ··, उपलब्धम्"? तदनु उत्तरम्—"हँ ·· । इदम् इदमपि । तत् ·· तदपि । असौ एतदपि ।

लघुविपिनमिदं प्रकाशं चुलुकयति । तत्र संचरति चरकः । निश्चिनोति गुल्मानि । अवचिनोति मुकुलानि । उच्चिनोति वल्कलानि । संचिनोति मूलानि । परिष्कुर्वन् प्रतिरथ्यं सः संचरति यत् प्राप्नोति तत् सर्वं सम्पत् । सः हृष्यति हसति पुरः सरति । इत्थं प्रतिदिनं स्वदेहं स्वादीकुर्वन् प्रत्यावर्तते ।

अद्य तस्य प्रत्यागमनमार्गे दण्डायमाना एका सायंश्रीः । चरकः चकितः । केयम् ? माया ? माया प्रत्यागता...? नूनं प्रत्यागता । अपरिचितेयं वक्तुं बिभेति । तथापि उत्सुका प्रतीयते । किन्तु मुखे मालिन्यम् । दरनिमीलितनयने कुण्ठा । कपोले कातरपुलकम् । अधरे शिशिरविरह । शिथिलावयवे जटिलविलासः । वसने दैन्यवासना । चरकः चमत्कृतः ।

—त्वं माया···?

सायंश्रीप्रतिमायाः लपनम् अरुणायितम्। सा द्रुतं प्रस्थितवती।

चरकः प्रत्यागतः। अन्वभवत्, यमुनानिकटे माया इति शब्दमात्रं वर्तते। मायाविषये प्रष्टुं सः चिन्तयन् आसीत् किंतु गोविन्दस्य वचनं स्मरन् विरतः। "मान्य! यमुनाया आलापे न कदापि भवान् बाधां दद्यात्। न वा कस्मिंश्चित् विषये पृच्छेत्। सा विकृतमस्तिष्का। यदि असंबद्धं भाषेत तर्हि भवतो मानहानिः स्यात्" इति गोविन्दस्य वचने किं वा रहस्यम्, अद्यापि नावकलितम्। चरकः चिन्तित। तथापि तदनु सैव प्रतिमा अरुणायते। सैव सायंश्रीः चेतश्चारिणी। ततः लघुविपिनेऽस्मिन् सर्वत्र सा एव। सैव प्रत्येकम्· सैव अनेकम्··· सैव अशेषम्···सा एव यावन्मयम्···उद्देश्यमयम्··· विधेयमयम्।

आरतीवेला मधुमती।

गोविन्दो विमुग्धः। परं मनसि सन्देहः···युवकोऽयं कीदृशः? अनेकशः अन्यमनस्कः। आलापे तस्य विभिन्ना शैली। वागपि असंबद्धा। कदा स उत्फुल्लः। कदा च विना कारणं विषण्णः। कदा च भग्नांश इव गम्भीरः। कदा पुनः हिल्लोल इव चपलः। बाल इव प्रगल्भः। नम्रतरुरिव विनयी। पर्वत इव स्थितिकातरः।

किमस्य चरित्रे अखण्डता नास्ति? जीवनप्रवाहे धारावाहिकता नास्ति? किमस्य मूलतो विखण्डव्यक्तित्वम्? किमर्थमस्य संगति-विहीना जीवनी? किमर्थं निराधारा गतिः? किमस्य लक्ष्यम्? किं वा आवश्यकम्? अथवा परदेशी इति आत्मानं पृथक् मन्यते? अथवा ग्राम्यजीवनी अस्य प्रतिकूला? परमेतन्न लक्ष्यते तस्मिन्? सः स्वजन इव आचरति। आत्मीय इव व्यवहरति। पुत्र इव सम्मानं ददाति। बन्धुरिव सहायो भवति। तथापि किमर्थं विकृतिः? किमयं विकृत-मस्तिष्कः··? यमुना इव···?

चरकस्तु उपहसति—इदं मन्दिरम्···इमं देवम्···इमां च भाटकीय-मनोवृत्तिम्···पुनरिमां पूजापद्धतिम्। तन्निकटे सर्वमेतत् तुच्छम्। एतदर्थं सर्वेषां दृष्टिः तस्मिन् विद्वेषिणी। मन्दिरेऽस्मिन् सः निवसति इत्यपि अधुना सर्वेषाम् अभियोगविषयः।

गोविन्दः विषण्णः।

चरकः अद्यापि बालः। विचारयितुं न प्रभवति। मानसे यदायाति तदेव वदति। परं सर्वेषां विचारोपरि ईश्वरस्य विचारो महान्। स च

यथार्थः। किमर्थं वटमहाद्रुमस्य फलं क्षुद्रम् ?—एतस्य निष्पत्तिः ईश्वरस्य विचारे यथार्था इति अन्ततः अङ्गीकर्तव्यं भवेत्। एतदपि सिद्धान्तरूपेण स्वीकर्तव्यं भवेत् यत् जीवः घटनाचक्रस्य वशवर्ती। न तु घटनाचक्रं जीवस्य अधीनम् ।

आरतीमदीपयत् गोविन्दः।

तस्मिन् रजनीमुखे कति अपराधिनः अत्र शरणमापन्नाः। मन्दिरस्य गोपनप्रदेशे निर्लीनाः। किन्तु तान् अनुसरन्त उपस्थिता विद्वेषिणः। ते क्रोधजर्जरा आसन्।

—हे पूजकः···! कुत्र गता इमे ?

—व वक्तु न प···ारयामि।

—सर्वं जानाति वृद्धः। किंतु न वदति।

—नहि ·। न नाऽहं ज · जाने।

—अरे ! को वर्तते ? वेत्रेण ताडय पूजकम्। ताडय ताडय तावत् यावत् सः सत्यं न वदेत् ·।

वेत्राघातेन पूजको मूर्च्छितः। तुमुलकोलाहलेषु देवालयो विदीर्णः। आहता अनेके। अपराधिनो वा विद्वेषिणो वा मृताः न कोऽपि जानाति। परिणामस्तु भयङ्कर आसीत्।

किमयं भग्नांशः विद्वेषस्य अवदानम्···?

नहि, एतत्तु जनश्रुतिमात्रम्।

सूची तु साक्षात् सूची · दैन्यस्य···तारुण्यस्य, धन्यस्य···अरण्यस्य, संकल्पस्य अनल्पस्य, विशदस्य···विषादस्य, विलसस्य···अभिलापस्य संस्थानस्य···सुप्रस्थानस्य।

सूचीसंविधाने चरकः शारदीयपुरुषः। यदा सः लघुविपिनं प्रविशति तदा वृक्षात् पुष्पाणि स्खलन्ति। पक्षिण आकाशं विकाशयन्ति करजनिततरङ्गेषु विपिनमिदं सागरः संजायते। मेघः वर्षणविमुखो भवति। उत्तापः सुधां संगृह्णाति। छाया चपलायते। इन्द्रधनुः सूचीनिकटे वलयीभवति। ततः सर्वं युगलायते।

सूची विस्मिता भवति। कस्याः कृते चरकस्य इयं मुकुलमाला? किमर्थं प्रसूनस्तवकम्? को वा वर्तते भग्नांशे? देवो वा देवी वा? तत्र तु केवलं नियममाला—गमनस्य···आगमनस्य, क्रन्दनस्य··· वन्दनस्य, विश्वसनस्य···आश्वासनस्य, स्थावरस्य···यायावरस्य, नश्वरस्य···भास्वरस्य। तथापि किमन्वेषयति अयम्? जीवननिदानं

अत्र कुत्र लभ्येत ? अभिजातस्य प्राचुर्ये सर्वस्य निदानं निहितम् । तत्र अन्वेष्टव्यम् । तत्रोपलभ्येत, कः कस्मात् भिन्नः ? कुत्र वा भेद-सम्बन्धः साक्षात् ? अत्र तु सर्वम् उद्भिन्नमयम् । भेदः कुत्र ? मूले···? मुकुले ··? वल्कले···??

अत्र कियत्समयं विहाय सदैव समीरो निराधारः । कादम्बिनी क्लान्ता । वासरेशो विवशः । सर्वत्र मालिन्यमेव उन्मीलनप्रियम् । क्षणाय सूची पुलकिता ··।

अन्तरालतः मीनाक्षी शब्दापितवती ।

—सूचि···! किं तत्र करोषि···? आगम्यताम्···।

—हुँ···, आगता···।

—अरे···! गोपालकः शब्दापयति । याहि···, गां विमोचय ··।

अनुपदमागता · ।

सूचो विरक्तभावेन गोशालां प्रविशति । गां विमोचयति । पूर्वाह्णे गोधूलिषु कियत्कालम् आत्मानं हारयति । पुनश्च हारयितुमपेक्षते सायं गोधूलिषु । अवसरसमये सा गवि स्नेहिनी संजायाते । तस्या गलकम्बले करं संचाल्य मनःकथां विशदयति । मुखे च घासकवलं समर्प्य प्रगल्भ-भावेन विनयिनी भवति ।

-मालिनि···! त्वं मे एकैव सखी । मम मनोनुगुणतां त्वमेव जानासि । मनोरथो मे पूर्णो भविष्यति नु ?

गौः मालिनी मस्तकं दोलायितुम् आरभते । सा किं वदति सूची ज्ञातुं न प्रभवति । तथापि सूची सहर्षं प्रत्यागच्छति । ततो निजयज्ञः । भोजनशयनयोः पुनः स एव राजसूयः । यदा विश्रामो मिलति तदा सा पल्वलमभिगच्छति । भोजनपात्राणि परिष्करोति । उपलानि जले निक्षिपति । तरङ्गान् वीक्ष्य स्वयं मथ्यते । पुनश्च सानन्दं तरङ्गानां संघर्षं वर्धयति । पुनः पुनः उपलानि निक्षिपति · हृष्यति · हसति ·· निजसंगतिं च विमृशति । स्वयमनेकधा संजायते होमः···आज्यधारा ···स्वाहा···।

मीनाक्षी तु आत्मना संन्यासिनी । आध्यात्मिकस्तरे तस्याः संघर्षः अद्यापि अविच्छिन्नः । आशा तस्या महती—"सर्वमतिक्रान्तुं शक्यते" । तथापि अतीतघटना भयप्रदा । शनिमहादशायां सः (पतिः) स्वर्गतः । गावः मृताः । सूची मृतप्राया अभूत् । उपार्जनं नष्टम् । स्वयमपि चिन्तया प्रेतप्रतिमा संजाता । अद्यापि शनिदशा विगता इति न

आश्वस्तिः—"संसारेऽस्मिन् अस्मादृशानां विपर्ययार्थमेव शनिः अवतरति"।

विपर्ययसमयेऽस्मिन् विलपितुं मन उत्सहते। इष्टनिकटे सर्वं समर्पयितुं इच्छा भवति। तस्माच्च कुशलस्य इङ्गितमभीप्सति पर्याकुलं मनः। इष्टस्तु उदासीनः प्रतीयते। तथापि निरालम्बजीवस्य निवेदनं न किमपि प्रतिबध्नाति।

कष्टसमष्टिः जीवने कर्मप्रवाहः। प्रतिपदं च चिन्ताकुलता जिजीविषाधारा। व्याधिमत्ता एव गतिः। असदुपयोगश्च दुर्गतिः। एतदर्थं चरक इह उपयोगयोगी। संजीवनी च तस्य शोधसामग्री। संजीवनी एव परिचेतव्या · उद्धर्तव्या ·· आहर्तव्या । इयं हि कालकाकलिषु उल्लोलजीविका।

आयुर्विज्ञानस्य अधोगतिमूले नाना मायावादिनी परंपरा निहिता। नाना सन्न्यासिनी रूढिः अद्यापि विज्ञानमिदं कुब्जीकरोति। अतः चिकित्सास्थाने विचिकित्सा एव बलवती। "महाकालस्य सकलकलापतले जीवस्तु विरलतरल" इयं भावधारा सनातनायते। परं जनो न जानाति—"व्याधिषु लघुतमीभवति जीवनपरिसरः"।

गुल्मगहने संचरन् बहुधा चिन्तयति चरकः—'कदा व्याधिः समाप्तिमेष्यति ?'

व्याधिः व्याधिः सर्वत्र व्याधिः। सर्वे व्याधिनिकटे पराजिताः। व्याधिजयविषये वैद्यराजस्य स्वरोऽपि कुण्ठितः। तस्य अनुच्चवचने एक एव निर्घोषः अद्यापि शेषायते—'मरणं महाव्याधिः। जननमस्य निदानम्। संजीवनी महौषधिः।"

नैके वैद्याः साधनापथेऽस्मिन् प्रस्थिताः। परं कस्यापि अनुभूतिः न तथा प्रामाणिकी। संजीवन्याः मूलाधारः कुत्र? कुत्र वा तस्याः परमार्थः ? कुत्र च पर्याप्तिः ? विषयेऽस्मिन तेषां सिद्धान्तो मूकः। एषु च सिद्धान्तेषु चरकः स्वयं सारांशः केवलम्।

खण्डकालस्य अस्तरागे चरकस्य अन्वेषणं विरमति। सः प्रत्यावर्तते। गृहेऽस्मिन् पुरातनसायंचर्यासु पुनः माया नवीना भवति। यमुनायाः वदान्यविवृतिषु सा नाना संज्ञामाहरति। आशाविपुलेषु श्रीसंपन्नकालः परिच्छिद्यते। कल्पनाया हरिद्दूर्वापरिधिः इतरपृथिवीं मरुमयीकरोति। हरीतिमा तारासु रतिं वितनुते।

प्रदीपो मन्दायते। मायाचिन्तासु यामिनी कमनीया संजायते।

शयनीयं लोभनीयं भवति। स्वप्ने तु सूची शौचीभवति। मायास्थाने सूची रूपापणम्···उन्मोचयति। मुग्धः चरकः चौरायते। ततः अनुभवति—वनपथेऽस्मिन् सूची अहल्या भवति। नलिनाक्षः सः सहस्राक्षरूपेण निजरूपविमर्शनाय निशाशेषं कामयते।

प्रतिदिनमिव अद्यापि सूची प्रतीक्षाकुशलिनी। चरकस्य आगमनाय आतुरा। परं किमपि वक्तुं न शक्नोति। सोऽपि पश्यन्नपि न पश्यति। समान्तररेखायां विन्दुद्वयं मिलनाय कियन्न निकटयीम् ? परितः हरीतिमा। चतुः पार्श्वे प्रकाशः सर्वत्र समवातः। प्रवाहः अनुकूलः। परिवेशश्च विनोदसंकुलः। प्रदेशोऽपि विजनः। तथापि विन्दुद्वयस्य एकमयकामना न चरितार्था। उभयस्य अभिलाषे मनाक् छाया···मनाक् तमसा···।

सहसा पक्षिणः उड्डीनः। तरवः आन्दोलिताः। छायाः चपलायिताः। काकलिः भग्नांशे प्रतिध्वनिता। सूची पुलकिता।
गुल्मारण्यं प्रविशति चरकः।

मनसि स एव उत्साहः। कर्मणि सैव श्रद्धा। आगमने पुरातनरीतिः। व्यवहारे अन्वेषणीया भङ्गी। करसंचालनेन गणकीयमुद्रा। दृष्टिघूर्णने उपयोगीया चमत्कृतिः। नयनपरिसरे च केवलं ससीमपरिधिः। तथापि शरीरे मनाक् पुलकम्।

अद्य पुनः पश्यन्नपि न पश्यन्निव मार्गेऽस्मिन् चरकः पूर्ववत् गुल्मानि पृथक्कृत्य अन्तः प्रवेष्टुमारभत। पूर्ववदपि गुल्मगहने मार्गं निर्मातुमयतत।

उच्छला सूची सहसा चकिता। अवाध्य अधरे तस्या एको ललितशब्दः वलात् अखेलत्।

—मान्य ··!

परिचितस्वरसङ्करेषु अपरिचितस्वरोऽयं चरकस्य श्रवणे विलुलितः। स पश्चात् अपश्यत्। अधोमुखी सूची अरुणायिता। सस्मितं चरकः पुनः कर्मणि व्यापृतः।

तथापि सूची विह्वला। तदधरे अवाध्यशब्दधारा।

—न गच्छतु तत्र भवान्।

चरकः तामुपसृतवान्। सस्मितं च अपृच्छत्।

—किमर्थम्··· ?

सूची नीरवा। पुनरपृच्छत् चरकः।

—किमर्थम् इत्थम् उक्तवती ?
—तत्र अनेके विषधराः सन्ति ।
—तर्हि, किम् ?
—तत्र न गच्छतु ।
चरक सस्मितं वदति ।
—अरे ! विषधरोऽपि औषधिः
सूची विस्मिता । अधोमुखतया प्रस्थितवती ।

तदनु चरकः अनुभवति—तस्मिन् अस्थायिरूपान्तरं संघटते । स्वाधीनः सः पराधीनो भवितुम् अभिलषति । संकल्पस्य अन्तराले अभिमता सूची तस्य मङ्गलम् अभ्यस्यति । तस्य च साधकीयक्रियाधारासु सा भवति एका अनुकूला अनुमतिः एका प्रच्छन्ना सुसंगति एका सन्दर्भमया श्रमविरतिः ।

चरकः प्रत्यावर्तते । रूपरसयोः समस्यासमन्वये रजनी तस्य संकीर्णा भवति ।

पूजामाधुरीषु देदीप्यते पूर्वाह्णभग्नांशः । गोविन्दः अतीतमेव रोमन्थयन् मन्त्रमग्नः । इतस्ततो जल्पन्ती यमुना आगम्य निकटे यष्टिं स्थापितवती ।

—कदा माया आगमिष्यति ?
—गृहं तु अद्यावधि न संपूर्णम् । आगम्य सा कुत्र निवसेत् ?
—किमर्थं न सम्पादयसि ?
—एतदर्थं धनमपेक्षते किल ? समयोऽपि अपेक्षते ।
—वृद्धकालेऽस्मिन् किमर्थम् इयद्दायित्वं वहसि ?
—तर्हि किं कुर्याम् ?
—चरकोऽयम् अभिरूपः । मायार्थम् अवश्यम् उपयुक्तः । उभयोः विवाहव्यवस्यां कथं न करोषि ? यदा स अस्माकं जामाता भविष्यति तदा सर्वमपि दायित्वं स्वीकरिष्यति । आवयोः पोषणे च न काऽपि चिन्ता स्यात् ।
—तदर्थमपि समय आवश्यकः । चरकस्य सम्मतिश्च अपेक्षते ।
—चरकः नूनं सम्मतो भविष्यति । प्रथमतो मायामत्र आनय ।
—भवतु···, याहि···। पूजावेला विलम्ब्यते । अहं चरकस्य मतामतं परीक्ष्य मायामानेष्यामि ।

यमुना सान्त्वनामवाप्य प्रस्थिता । गोविन्दः पूजाकर्मणि पुनः

व्यापृतः। सम्मुखे तस्य पारंपरिकी प्रतिमा। पूजाऽपि आर्यप्रणवेषु तथैव निष्णाता। सैव तुलसी। तदेव विल्वपर्णम्। तथाभूतानि च कुसुमानि।

दूरे चरकस्य स्वर श्रुतः। गोविन्दः सहसा उद्विग्नः संजातः। किमर्थमयम् असमये अद्य इतः आगच्छति? किं कारणम्? किं वा प्रयोजनम्? किं चरकः यमुनाया विवादं श्रुतवान्?
भग्नांशस्य कपोतपालिकायां कपोतयुगलस्य विनोदनादः पूजास्थानं संक्रमित। गोविन्दम् उपसृतः चरकः। गोविन्दः किंचित् विक्लव; संजातः।

—चरकः?

—हुँ···। पूजादर्शनाय आगतवान्।

—भवतु। अत्र उपविश।

—मनसि मे सदा एकमेव कौतूहलम्··।

—कौतूहलम्··? कस्मिन् विषये··?

—भवान् किमर्थं मायां नानयति?

—ओ ! अस्मिन् विषये ? सा अत्र कुत्र निवसेत्?

—अहं तु प्रकोष्ठमिदं परित्यज्य ।

नहि नहि नहि ··। तथा न कुरु।

—विषयेऽस्मिन् भवतां भगिनी तु सदा विवदते।

—अरे ! सा तु विकृतमस्तिष्का। किमपि बोद्धुं न प्रभवति।

—तर्हि किं भवान् चिन्तयति, माया सदा मातुलगृहे निवसतु··?

—नहि···नहि । सा आगमिष्यति। तदर्थं सुविधा आवश्यकी। समयश्च अपेक्ष्यते।

भवान् सर्वदा इत्थं वदति।

—किं त्वमपि यमुनया सह ?

—नहि । अहं तु मायाविषये उत्सुकः।

—तर्हि ?

—नहि । मत्त· किमपि निह्नोतुमिच्छति भवान्

नहि नहि नहि···। न तादृशं किमपि। अनन्तरं कदाचिदागच्छ। सर्वं श्रावयामि। इदानीं तु पूजावेला···।

संशयापन्न चरकः प्रत्यावृत्तः। गोविन्दः तस्य प्रस्थानमपश्यत्। सकृच्च भग्नांशम् अपश्यत्। तत्र केवलं भासते जिजीविषाया आदिम-

शिलालिपिः। पुनश्च तत्र अवलयधारः तथापि वहनशीलः। प्रणवस्य ताले ताले तथापि अभिरामा निर्वेदप्रतिमा। भग्नांशस्य अन्तःकरणे विकारः साकारः पूजाचत्वरं तथापि दर्पणायते।

पक्षिणां काकलिः बहुगुणिता।

चरकः कर्मस्थानं संप्राप्त। सः प्रसन्नः। उद्भिदां पाकरस-प्रभावेषु रोग इह क्रमशो न्यूनीभवति। जनानां कृतज्ञतासु सः प्रभाववान् संजायते। अद्यत्वे रोगोपशमनाय न कश्चित् तम् आह्वयति। परं सम्मानदानाय प्रतिदिनं द्वारे जनमेला भवति। मार्गे उपमार्गे च सर्वेषां नमोवचनेषु विनम्रकार्तज्ञ्यं तस्य सौजन्यं वर्धयति। अद्यत्वे सर्वतो निमन्त्रणम्। सर्वत्र बन्धुभावः। सर्वत्र च मित्रस्य चक्षुषा तस्य कृति समीक्षा।

एको जनिष्यति। एकश्च मरिष्यति। एतदेव वैद्यनिकटे दिन-धारा। तथापि न धनं, परं जीवनार्थं जीवने आलोडनं चरकस्य जीविकासामग्री। नाडीस्पन्देषु परमस्य परिधिं प्रतिक्षणं सः परिमिमीते। आकलयति च पुनः उद्भिदां पाकः, रसः, प्रभावश्च कियत्परिमाणेन स्पन्दनं नियमयन्ति।

चरकस्य कर्मपथे सूची अनुदिनं नेदीयसी। तस्य च रूपकल्पनायां सा एका विह्वला प्रेयसी। भ्रूलतायाम् अलक्ष्यविलासः। नयनकोणे मनाक् लिप्सा। चिबुके पुलकं सक्रन्मयम्। चरणे लास्यं नैराश्य-निविडम्। सा प्रतीक्षमाणा।

चरकः प्रसन्नः। दूरतः तामवलोक्य क्षीणम् अहसत्। अद्य सूचीकपोले पूर्णहास्यं क्षणाय आविर्भूय चिबुके निमीलितम्। चरकः पूर्ववत् शनैः प्रस्थितः। अभियानं च नवीकृतवान्।

सूची शब्दापितवती।

—तत्र न गच्छतु।

चरकः पश्चात् अपश्यत्। हितैषिणी प्रतिवेशिनी अद्य पुनः वारणमुद्रया निषिध्यति।

—किमर्थं मां निषिध्यति भवती ?

—भवान् तु न जानाति।

—किम्…?

—तत्र एको भग्नकूपो वर्तते।

—कुत्र…? न दृश्यते…??

—कूपोऽयं गुल्माच्छन्नः। इदानीं पुनः वर्षाकालः। कालेऽस्मिन् सर्वं वनमयम्। केन प्रकारेण वा दृश्येत ?

—तर्हि कया दिशा गन्तव्यम् ?

...इदानीं तत्र गच्छतु।

—किमर्थम्...?

—उक्तं नु ! इतः सर्पाः। ततो भग्नकूपः। कूपेऽस्मिन् एकः जनोऽपि मृतः।

—एवं वा ?

—ज्योतिषोऽपि वदति यः शनिमहादशायां निपतति स एव इत आकृष्यते।

चरकः मुक्तभावेन अहसत्। सूची तु प्रस्थितवती। चरकमनसि सूची इयं सरला। सरलेयं माया। आयाति...प्रयाति स्पन्दनलहरीषु स्वयं स्नाति स्नपयति अपि।

भग्नांशे संध्याया अनुरणनं श्रुतम्।

नीराजना रजनीं निजसात्कृतवती। गोविन्दः ओङ्कारम् उच्चारयन् प्रणतवान्। नयने अभासत केवलं प्रणवस्य अधिष्ठानावशेषः। प्रणवः... सर्वमयोऽयं निरवयवः भेदोऽत्र मिथ्या। पुनश्च मिथ्या भेदसम्बन्धः। गोविन्दः स्वयमपरतो भिन्न इति भिन्नतेयं मिथ्या। सः जीवः...सः पाषाणः...स च भग्नांशः। शयनस्वप्नजागरणेषु प्रणव एव शाश्वतसंगीतः। स एव निश्शब्दनिर्वाणविपणी।

गोविन्द नेत्रमुन्मील्य उपरि अपश्यत्। भग्नांशस्य अन्तःकरणे विलयः स्वस्तिमान्।

तत्कालो वर्षाकालः। रजनी घनघर्घरा। वन्या प्लाविनी। परितः कोलाहलः। सर्वतो जीवनमरणयोः संघर्षः सर्वे प्रस्थानोन्मुखाः जीवनमात्रं वहन्तः अनेके उच्चस्थानं प्रयान्ति। निमेषमात्रेण सर्वं जलमयं संजायते। गृहाणि निमज्जन्ति। स्रोतसि सन्तरन्ति नाना जीवाः। वृक्षास्तु सर्पादिजन्तूनां निलया भवन्ति। जलम् उच्छलम्। रक्षत... रक्षत...रक्षत ध्वनिसमूहेषु मध्याकाशः रुद्धश्वासः।

ततो वन्याजलं मन्दिरेऽस्मिन् वलयीभूतम्। जलवलये देवालयोऽयम् अस्वस्थः संजातः। वन्यानन्तरं भूकम्पः अत्र दमनलीलामारभत। भूकम्पस्य केलिरेव भग्नांशस्य जननी संजाता।

किमयं भग्नांशः भूकम्पविभूतिः...?

नहि, एतदपि जनश्रुतिमात्रम् ।

गोविन्दः पूजाम् उद्यापितवान् । चरकः समुपस्थितः । गोविन्दः स्तोकम् इतस्ततोऽभूत् । अयमपि मायार्थम् उन्मादः संजातः । किं वा वक्तव्यम् ? चरकः अद्य अवाध्यः । मायाविषये ज्ञातुं नितराम् आग्रही ।

—मान्य···! किमर्थं भवान् मायां नानयति ?

—उपविश । सर्वं श्रावयिष्यामि ।

पूजाचत्वरे चरक उपविष्टः । गोविन्दः संयततया अवदत् ।

—त्वं तु जानासि, कीदृशं भगिनी मे त्वां जामातृरूपेण वृतवती ।

—सा च विषयेऽस्मिन् मां विचालयति । अतो भवन्तं पृच्छामि ।

—किन्तु पश्य ! यमुना मे लालिता भगिनी । मां विहाय तस्या अन्या गतिः नास्ति । सापि विषयेऽस्मिन् सत्यं नोक्ता । त्वमधुना स्नेहवशः । स्नेहशैथिल्यादेव त्वामद्य वदामि । परं विषयमिमं कुत्रापि न प्रकाशय ।

—किमयं गोपनीयः ··?

—हूँ ··। विशेषतो यमुनां न कथय ।

—यदि

—नहि । यदि सा जानीयात् नूनं परलोकं गमिष्यति ।

—एवं वा ? नहि, न कदा कुत्रापि इमं प्रकाशयिष्यामि । सत्यं प्रतिश्रृणोमि । कथयतु भवान् ।

—'माया' इति न काऽपि अस्ति इदानीम्

—तर्हि···??

—यदा यमुनायाः पतिः दिवंगतः तदा यमुना अन्तःसत्त्वा आसीत् ।

—ततः···?

—तदनु पतिवियोगेन सा स्थितिविधुरा संजाता । यदा प्रसवसमय आगतः तदा भगिनी मे अत्यन्नं पीडिताऽभूत् ।

—ततः किमभूत् ?

—ततः एका तनया सम्भूता । आत्मजां विलोक्य सा हृष्टा । परं मूच्छिताऽभवत् ।

—कन्या तु···।

—कन्या इयं कियत् क्षणानन्तरं दिवंगता । यमुना तदा तथापि अचेतना आसीत । यदा सा चैतन्यं लब्धवती तदा कन्यामेव अन्विष्टवती ।

—भवान् किं कृतवान् तदा ?

--अहं निरुपाय आसम्। तथापि तां सान्त्वयितुं मया यत्नः कृतः। उक्तं च मातुलः (मम अनुजः) कन्यां गृहीत्वा गृहं प्रस्थितः। सा अधुना मातुलगृहे स्वस्थाऽस्ति।

--भवतां भगिनी तत्र न गतवती ?

—तदनु अनेकदिनपर्यन्तं सा शय्याशायिनी अभवत्। कुत्राऽपि गन्तुं तस्या सामर्थ्यं नासीत्। तथापि कन्यां मे पश्यानि कन्यां मे पश्यानि'' इति प्रलप्य सा व्यथिता अभूत्।

— भवान् किं कृतवान् ?

—अहं तु दिनद्वये दिनत्रये वा वहिर्गत्वा सायंकाले प्रत्यागम्य वदामि स्म,

—'कन्याया नामकरणं संजातम्। सर्वे तां 'माया माया'···इति वदन्ति तन्नाम्ना च ताम् आकारयन्ति। सा अधुना सुन्दरी लक्ष्यते। एवं वचनच्छलनया नाना विबोध्य तां सान्त्वयामि स्म।

—अद्यापि तथा··· ?

—हूँ। न माया वर्तते। न वा मातुलगृहमस्ति। केवलं कथा। केवलं वचनवञ्चना ··।

चरकः दीर्घश्वासं पर्यत्यजत्। गोविन्दः कथामुपसंहर्तुम् उपक्रान्तः।

—एवं 'माया माया' प्रलप्य सा विकृतमस्तिष्का संजाता। समयश्च आवां वृद्धपितवान्। तस्याः तु मायाचिन्ता। मम च अन्नचिन्ता। भवन्निकटे चमत्करः केवलमावयोः सम्बन्धः।

गोविन्दः वाष्पभूयिष्ठः। चरको गम्भीरः। यमुना सुप्ता। तामसी क्षेपीयसी। भग्नांशः गर्भविभुः।

चरकभावनातो माया अपसारिता।

इत्थं जीवनेऽपि भवति। कदा कदा मरीचिका सखीयति। शून्यः प्रियः संजायते। आशासु, अभिलाषेषु, आवेगेषु च प्रियाकृतिः हृदयामालिङ्गति। प्रीतये मनसि दौर्बल्यं सृजति। ततो नयने आत्मीयं भवति केवलम् आकृतेः अवतरणम्। अत्र अवतरणं अत्रैव आलिङ्गनम्। आलिङ्गने च शान्तिः अमृतमाहरति।

आत्मानमवसादयति चरकः। अनुभवति च, स्वयं यथा सः वर्तिविकारी प्रदीपः। प्रकाशः अनुतप्तः। अनुतापमयं च भग्नांशविपिनम्। तस्य कल्पना अद्य शिथिला। प्रथमवारं च कर्मकुण्ठा तस्मिन विघ्न विलासिनी।

इतस्ततो विचरन्ती यमुना चरकमुपगता ।

—चरक ! चरक···! इदानीमपि सुप्तः ?

—नहि··· नहि ··।

—किम् अस्वस्थः ?

—नहि ।

—तर्हि ?

—अद्य आलस्यमनुभवामि ।

—किमर्थम् ?

चरकः नीरवः ।

—अधिकपरिश्रमे कदापि-कदा इत्थं भवति ।

चरकनयने उन्मादिनी यमुना केवलं वचनवञ्चनायां जीवति। अद्यापि जामातृरूपेण तं वरयितुं सा भावविह्वला । मायार्थं गृहनिर्माणाय तस्या योजना अपि भूयसी । चरकः तस्याः पुत्रः जामाता··· सर्वोपरि रक्षकः···। अतः तस्मिन् ममता अपि तथा वरीयसी ।

सा स्तोकं विहस्य पुनरवदत् ।

—यदा माया आगमिष्यति तदा सर्वम् आलस्यादिकं परित्यक्तव्यम्। अन्यथा सा कुप्येत् । एषु न तस्या अभिरुचिः ।

सानन्दं यमुना वहिरागता । अपश्यत् च, मार्गे ज्योतिषो गच्छति । सा तारस्वरेण शब्दापितवती ।

—अये ज्योतिषमहाप्रभो ! आगच्छ···आगच्छ । बहुदिनं गतम् । तथापि तव दर्शनं न मिलति ।

- किं वा करोमि । उदरनिमित्तं तु बहुस्थानं गन्तव्यं भवति । सर्वदा तव द्वारे उपविश्य किं वा प्राप्स्यामि ?

—अरे···, आगच्छ ! अहमपि दास्यामि ।

ज्योतिषः साग्रहम् आगतः। मन्दिरस्य चत्वरे उपविष्टः । पुस्तकादिकं निरकासयत् । यमुना एकपार्श्वे यष्टिं निधाय उपाविशत् ज्योतिष उपनेत्रं शिथिलीकृत्य अवदत् ।

—वद ··! का समस्या ?

अद्याऽपि माया नागच्छति । इदानीं तु तस्या विवाहवयः । वरो निश्चितः । विवाहयोगं पश्य ।

—अधुना तु कालः अशुद्धः । केन प्रकारेण विवाहः स्यात् ?

—न इदानीम् । अन्यदा कदा योगः अस्ति चेत् तन्निश्चयं कुरु ।

—भवतु कन्याया जातकमानय ।

जातकं तु गोविन्दनिकटे । स इदानीं वहिर्गतः ।

—तर्हि केन प्रकारेण वदिष्यामि ? कन्याया यदि रविशुद्धिः गुरुशुद्धिः च न स्यात् तर्हि विवाहप्रस्तवोऽपि न कर्तव्यः । अन्यथा महती हानिः स्यात् ।

—भवतु । मम अधुना का दशा ?

—तव तु शनिमहादशायां राहोः अन्तर्दशा । कालो न कुशलः । वर्षाकालानन्तरं ते शुभकाल आगमिष्यति ।

—तर्हि विवाहव्यवस्था ?

—अधुना माऽस्तु । गोविन्दभ्राता आगच्छतु । जातकं द्रक्ष्यामः । तेन सह च परामृश्य किमपि करिष्यामः । भवतु···, कालविलम्बं मा कुरु। विसर्जय माम् ।

यमुना तण्डुलमानीय ज्योतिषस्य प्रसारिते उत्तरीये निगालितवती । ज्योतिषः आशिषं व्यतरत् ।

—मङ्गलं करोतु भगवान् । भवतु, भगिनि ! पुनरागमिष्यामि । इदानीं तु बहुस्थानं गन्तव्यम् ।

मङ्गलं भगवान् विष्णुः । मङ्गलं मधुसूदनः । मङ्गलं पुण्डरीकाक्षः । मङ्गलं गरुडध्वजः । एवं पुनः पुनः उच्चारयन् ज्योतिषः पूर्वसरणिमुपस्थितः । चरणे चञ्चला गतिः । मुखे मङ्गलवाणी । स्कन्धे दोलायते याच्ञाया जातकम् । मनसि च संसारस्य कुशलाकुशलदशा ।

सहसा खण्डजलदः छायामतनुत । चरकः चञ्चलः । अद्य सूचीसमीपे हृदयमुन्मोचयिष्यति । आवेगस्य अवसानं भविष्यति । अनुतापः अपैष्यति । अग्रे अद्य नवीनपथः । अपि लक्ष्यमभिनवम् । योगवियोगयोः मिश्रपथे गतिधारा च अननुबन्धिनी ।

ततो विद्योतिता विद्युत् । आकाशः वज्रमयः संजातः । वृष्टिः धारावाहिनी अभूत् । पवनप्रवाहो बहुगुणितः । सर्वत्र केवलं धारा । केवलो वारिपथः! तथापि भग्नांशो नगायते ।

चरकस्य कार्यं प्रथमवारम् अद्य प्रतिहतम् । स उपविष्टः । दूरतो लक्ष्यते गोविन्दः । पुराणस्तुतिम् उद्धरन् गायति । स्तुत्यर्थे स्वयं तन्मयो भवति । हसति ·· विलपति ·· । आत्मनः सहभावं समन्वयति । पुनश्च कर्मरचनायां शरीरं प्रपञ्चयति । शरीरस्पन्देषु वारिधाराम् अनुकरोति स एव अवचेतननादः···स्याम्···अभूवम् भविष्यामि···।

चरकः चमत्कृतः। किमयं विकृतमस्तिष्कः यथा यमुना ? सम्भवेत्। विकृतिरपि वंशानुक्रमिका। वंशानुक्रमिकश्च रोगः। चरमे वयसि अस्मिन् रोगोऽयं अनयो पुरतः प्रपञ्चं कल्लोलयति। एतदर्थं विपाकवयो लोलुपम्। अवचेतनमनश्च कृपणम्। परिणते हृदये न पुनः आत्मविश्वास आधेयो भवति। एतन्निमित्तमेव यमुना आश्रय-मन्विष्यति। गोविन्दश्च गृहनिर्माणे व्रती। नूनं गोविन्दः विकृत-मस्तिष्कः। अस्य निदानं तस्य वंशः तस्य च वयः।

प्रकोष्ठस्य वहिः उपविश्य चरकः स्थाणुः। नितरां चिन्तामग्नः। सम्मुखे वृष्टिधारा। पश्चात् प्रकोष्ठे शून्यता। परितो विन्दूनां तुमुलकोलाहलः। मनसि मनाक् विरागः। हृदये सामान्यविरहः। कल्पनायां तथापि सूची अरण्यनर्तकी।

वृष्टियवनिकायां गोविन्दः चरकं पश्यति। सत्यम्, अयं विकृत-मस्तिष्कः। अन्यथा कथं तत्र एकाकी उपविशति ? हसति ·· प्रजल्पति ··? इदानीं तु असमयः। सर्वतः कर्मणो विरतिः। विश्राम-समयेऽस्मिन् अत्र आगम्य आलापः कर्तव्यः। वृद्धं विहाय को वा अत्र विद्यते ? कुतो वा लज्जा ? यमुना तु पीडिता। गतदिनात् शय्याशायिनी। सः वैद्यः। अवश्यमत्र आगम्य किमपि तेन प्रष्टव्यम्। निकटे स वर्तते इति अस्माकम् आशा महती। केवलम् औषधिं दत्त्वा तद्दिने विमुखतया प्रस्थित। अवश्यम्, अद्य वृष्टिः भवति। तथापि ? अथवा सर्पः परकृतं गेहं प्रविश्य सुखमेधते ?

यमुना पीडिता। निकटे कोऽपि नास्तीति सा अतिशयम् असन्तुष्टा। यद्यत्र माया स्यात् नूनं सा असेविष्यत। सा कन्या। मातरि ममता तस्या नूनमधिकतरा। किन्तु कुत्र सा ? गोविन्दस्तु सदा पूजाकर्मणि व्यापृतः। यदा माया कथाप्रसंगेन आयाति तदा इतस्तत कथयति। कपटमाचरन् इव लक्ष्यते। सदा निजचिन्तायां मग्नः। चरकश्च अद्यावधि न जामाता। स तु वैद्यः। वैद्य एव। केन प्रकारेण वा आगम्य ममतां प्रदर्शयेत् ? पुनश्च न तथा स आग्रहं प्रकटयति। सत्यम्, नूनं जनो मत्स्यः। मत्स्यः जले निवसति। परं जलं पीत्वा जीवति इति न कोऽपि जानाति। तथैव सर्वे निजचिन्तायां निमग्नाः, यथा चरकः। परम्, उपरि सामाजिकाः उपकारपरायणाः। एतादृशः को वा कं पृच्छेत् ? पुनश्च सम्बोधने न कोऽपि शृणोति। वारम्वारम् अनुरुद्धोऽपि न कश्चित् समीपम् आयाति। गोविन्दः

पूजाचत्वरे स्थावरः। चरकश्च निजप्रकोष्ठे स्थाणुः। किम् उभावपि विकृतमस्तिष्कौ ?

सर्वं परीक्षितम्। शरीरं विश्लेषितम्। प्रत्यङ्गं निरीक्षितम्। प्रत्यवयवं च स्पर्शसात्कृतम्। देहस्य प्रतिस्तरं च अन्वीक्षितम्। तथापि मनो न तृप्तम्। अद्य कामना अधिका। लोभोऽपि महान्। पिपासाऽपि भूयसी। किमर्थम्···? किमर्थम् इतः अधिकम् ? ततोऽपि अधिकम् ? अधिकायितुम् इच्छति मनः।

पुनः तया सह साक्षात्कार आवश्यकः। मुहुश्च आलापः अपेक्षते। पुनर्नयनमिलनं प्रयोजनं भवति। अद्य संचरणं चिरतरायते प्रतीक्षाऽपि विनोदिनी संजायते। परितः केवलं साहस्थ्यस्य झराञ्जलिः ··।

वृष्टिः विरता।

लघुविपनं प्रसन्नम्। वारिपथः योगी। कर्दमः समतलायते। उच्चस्थानेषु बालुका आसन्नप्रसवा। निम्नस्थलीषु गतवृष्टेः ह्रस्वझरी तथापि वेगवती। पुनर्मनः उत्सहते। भावनासु सूची एव वलयीभवति।

चरक वहिर्गन्तुम् उद्यतः। समयेऽस्मिन् कश्चित् जन उपस्थितः। सरलोऽयं भीत इव लक्ष्यते। प्रणम्य सः अभाषत।

—महाभाग···!

—किम् ?

—सूची मां प्रेषितवती।

चरकः आश्चर्यान्वितः।

—सूची···?

—हँ ··, सूची।

—किमियं प्रतिवेशिनी ?

—सा भवन्तं सम्यक् जानाति।

—भवतु। किमर्थं प्रेषितवती ?

—तस्या माता मीनाक्षी ··

—हँ ··, किमभूत् ··?

—दिनद्वयात् ज्वरेण पीडिता।

—तर्हि, भवान् औषधं नयतु।

—नहि।

—किमर्थम् ?

—मया सह भवान् आगच्छतु।

—ओ ··, एष तस्या निर्देशः, मन्ये ।
—भवान् तु जानाति सर्वम् ।

चरकः मनाक् अहसत् । कियान्न सरलोऽयं जनः ?

—भवतु, अग्रे चलतु भवान् ।

उभौ चलतः । इयमेव सा वीथिः । अन्धकारो रम्यः । खद्योतिकाया ज्योतिरत्र संध्यायाः परिचयं करोति । इयमेव जन्तूनामाश्रयस्थली इति सर्वदा ध्वनिविचित्रा जनान् विज्ञापयति । परिवेशोऽत्र खाद्य-खादकभावं वर्धयति । तथापि जीवनमिह सहभावीयम् । परं जन-वचनेषु स्थानमिदं पिशाचशाला । अत्रैव निशीथे कालपुरुषः सर्वान् आह्वयति । ब्रह्मराक्षसः राजा संजायते । अतृप्तात्मा प्रजामहोत्सवम् आयोजयति ।

—इदं तस्या द्वारम् । उपसर्पतु ·· ।

एवं कथयन् ग्रामीणः अलिन्दे स्थितोऽभूत् । चरकः किंचित् विचलितः । सहसा च नेत्रकुञ्चनं कृतवान् । गृहमिदं जलमयम् । एकपार्श्वे निहिता रज्जुमयी खट्वा । तत्र स्वपिति सूचीजननी । मीनाक्षी शुष्कमुखे तस्याः पीडा आकृतिमती । मुद्रितनेत्रकोणतः कर्णपर्यन्तं विशुष्का लोतकधारा सुस्पष्टा । चरकमनसि मनाक् आत्मीयता मनाक् विषादः ।

खट्वायाः शेषपार्श्वे विषण्णा सूची जानुपर्यन्तं वसनमुत्थाप्य दण्डाय-माना । तले जलकेलिः । उपरि छिन्नछदि । चरकः क्षणं तामपश्यत् । मलिनजले तस्याः चरणद्वयं न दृश्यते । छिन्नमलिनवसने च जघनं तस्याः किंचित् विमुक्तम् ·· किंचित् विलुप्तम् । चरकः तस्या मुखम् अपश्यत् ।

विषण्णा सूची अरुणायिता ।

चरकः मीनाक्षीकपालं संस्पृश्य सम्बोधितवान् ।

—मातः ··· ! मातः ··· !

मीनाक्षी नयनम् उन्मोचितवती ।

—अहं वैद्यः, मातः ! अहं चरकः ।
—चरकः ··· ? प्रतिवेशी ··· ?
—हँ ··, मातः !

मीनाक्षी नयनद्वयं सजलमकरोत् ।

—त्वदर्थम् औषधमानीतम् ।

मीनाक्षी शनैः उपविष्टा। चरकस्य करं धृत्वा च विलपिमारभत। मीनाक्षीविलापस्य अन्तराले सूची एव कारणमिति चरकः सम्यक् आकलितवान्। सः तद्विलोमयितुम् अयतत।

—मुखमुन्मोचय। औषधं पाययामि।

औषधं पीत्वा मीनाक्षी आश्वस्ता प्रसन्ना च अभवत्। चरकः पुनः दिनद्वयार्थम् औषधिं सज्जीकृत्य तस्या उपधानिकटे स्थापितवान्। सूचीम् अवलोक्य अवदत्।

—पश्य, दिवसस्य द्विः दातव्यम्। प्रभाते...सायंकाले च। हूँ..., मातः! मम किमपि वक्तव्यम् अस्ति।

—कथय।

—इतः परं गृहमिदं परिवर्तय। अन्यथा सदारोगः आविर्भवेत्।

—किं वा कथयामि? यदर्थं मया चेष्टितं तद्गृहे त्वम् इदानीं निवससि।

—किमत्र तात्पर्यम्?

—गृहार्थं गोविन्दभ्राता बहुवारम् अनुरुद्धः। परं सः किमपि न श्रुतवान्। शृण्वन्नपि किमपि न कथितवान्।' अतो वयं जले निसीदामः।

—एवं वा विषयः? तर्हि मा चिन्तय। गृहव्यवस्था मयि न्यस्ता। अहं च तं विबोध्य सर्वं करिष्यामि।

—भवतु, ..., भगवत इच्छा...।

—अहं प्रतिश्रृणोमि। चिन्ता माऽस्तु। औषधिः सेव्यताम्। अहं श्वः आगमिष्यामि। नमस्ते...।

चरकः सूचीमुखं विलोकितवान्। विषण्णा सूची अञ्जलिं विधाय नमस्कृतवती।

नमस्ते..।

मलिनं वसनं तस्या जानुतः अवतीर्य मलिने जले आविलीभूतम्। क्रमशश्च आविलं जलं जानुपर्यन्तं संक्रमितम्। ततः पादतो जानुपर्यन्तं केवलं वसनस्खलनं...केवलमार्द्रता केवलं मलिनता..।

चरकस्य दृष्टिः स्थिरा इयं सा सूची...?

चरकः प्रत्यागच्छति। मानसे तस्य तदेव दृश्यम्। तदेव जलम्। सैव रज्जुमयी खट्वा। जानुपर्यन्तं वसनमाकुञ्च्य कातरकरयुगले तदुत्थाप्य दृढं तद्धृत्वा च दण्डायमाना सा ..सूची। इयं सा सूची?

भग्नांशप्राचीरस्य अपरपार्श्वे असम्यक् परिलक्षिता हितैषिणी? अनुच्चवचनोपचारे नितरामरुणा… ?

चरकः समवेदनासिक्तः। हृदये तस्य आत्मीयता प्राणमयी। अद्य एकाङ्के तस्य द्वैतस्य अनुबन्धः। परम्, अविभागस्य मिश्रसरणिः। समवायस्य अयुतसिद्धिः। समुदायस्य समष्टिसामग्री। संयोगस्य आधेयता। अद्यप्रभृति तस्मिन् विरहो निष्प्रतियोगी। निरनुयोगिनी च विकल्पकल्पना।

निःशून्यः अभावः सर्वस्य प्रतिभूः।

गोविन्दः ध्यानस्थः। धूपधूमेषु निष्णाति वन्दनपद्धतिः। दीपशिखायां प्राचीनसंकल्पः तथापि अखण्डः। प्रणवप्रतीकेषु शुभकान्तिः मार्गं मृगयति। तथ्यस्य शुभमुक्तिं कामयते भग्नांशः। तथापि सत्यं प्रकाशं न वितनुते। अवशिष्यते तथापि तत्त्वम्… अनेकम्… पुष्कलम्…।

विनयी चरकः गोविन्दमुपसृतः। एका निर्लोभहास्यरेखा क्षणमखेलत् गोविन्दस्य अधरधारे। चरकः सशङ्कमनुरुद्धवान्।

—अहं किमपि प्रष्टुमनाः।

—पृच्छ।

—एकदा प्रकोष्ठेऽस्मिन् निवस्तुं सूचीमाता भवन्तम् अनुरुद्धवती?

—हुँ, किमभूत्?

—भवान् ताम् अवारयत्?

—हुँ…।

—किमर्थम्…?

—गृहमिदं तु परदेशिनां कृते।

—किं सा…

—साऽपि परदेशिनी।

—तर्हि…?

—पश्य, चरक! सः कालो विगतः। अनुदिनं दैन्यं वर्धते। अस्मिन् समये च उदरपूर्तिरपि न भवति। एतदर्थं भग्नांशस्य स्खलत्पाषाणान् संगृह्य गृहमिदं निर्मितं मया। आशा अस्ति —अधिकं भाटकं मिलिष्यति।

—सूचीमाता किं न दास्यति?

—तस्याः सामर्थ्यं कुतः?

—वृद्धकालेऽस्मिन् भवताम् इयान् लोभः ?
—चरक ! अभिप्रायो मे न ज्ञातः।
—सर्वं ज्ञातम् ।
—तर्हि, त्वमावयोः अनशनेन मरणमिच्छसि ?
—मैवं वदतु भवान् ।
—त्वं न जानासि । भग्नांशेऽस्मिन् जीवनं व्यतीतम् । एकदाऽपि सुषुप्तिः नाभूत् । पुनश्च, तदाऽयं भग्नांशः गृहमासीत् अधुनाऽपि तथा । परिस्थितिरद्य तु भिन्ना । तदानीं जनानां विश्वास आसीत् । अतः यथेच्छं दानं कृतवन्तः । अधुना विश्वासो गतः । अतः पूजाया महत्त्वं नास्ति । दानार्थमपि करुणा नास्ति । सर्वे वणिग्वृत्तिम् आद्रियन्ते । अतः सर्वेषां धनमेव जीवनम् । अस्माकं तु उपवासो भाग्यम् ।
—तर्हि···?
—परिश्रमस्य मूल्यं को वा दद्यात् ? एतदर्थमेव गृहमिदं मे पुत्रः··· पत्नी···परिवारः···सर्वस्वम् । यावत्कालम् इदमस्ति तावतकालं कोऽपि परदेशी आगत्य अत्र निवसेत् । तस्य च भाटकेन अवशिष्ट-जीवनमावयोः अत्रैव अतिवहेत् ।
—भवान् समीचीनं वदति । परम् ···
—पश्य, चरक ! मीनाक्षी जीवतु । अहमपि जीवेयम् । इयं मे आशा ।

विपर्यस्तभावेन गोविन्दः उत्थाय वहिरागच्छत् । चरकः मनसा खिन्नः । किमस्य समाधानम् ? सर्वेषां दृष्टिः चरकोपरि । सकल-दीनतायां चरकः अत्र साधीयान् धनाभासः । एकत आशा··· आत्मीयता । अन्यतः प्रतिश्रुतिः संप्रीतिः··· आकांक्षा···। उभयतः तस्य मङ्गलकामना। परं कस्य वचने प्राधान्यमारोपयिष्यति ? कुत्र वा गुरुत्वम् अधिकतरम् ? सान्त्वना कस्मिन् पक्षे वा श्रेयसे ··? अमावास्या निशा गम्भीरा ।

गोविन्दः शय्यायाम् आलुण्ठितः। निमीलितनयने जृम्भते क्षयिष्णु-शिला। तत्र च हसति मायायाः मिथ्याप्रतिमा। उन्मादिनी यमुना निजस्वप्नम् अपैतु न ददाति। उन्मत्तः चरकः मनाक् प्रकृतिस्थः। गोविन्दः मनसा अहसत्—कालस्य महाकवले केवलीभवनमिह अवधारितं भाग्यम् ।

प्रभातस्य कमनीयस्पर्शमावहन् चरकः गोविन्दद्वारे अद्य उपस्थितः। पक्षिणां सकालकाकलिः मुकुलकेलिषु विमथ्यते। भग्नांशचूडायां पताका अस्थिरा।

—महाभागः ! महाभाग !

—कोऽयम् ··? चरकः ?

—हुँ ··कपाटमुन्मोचयतु।

कपाटमुन्मोच्य गोविन्दः सहसा चरकस्य सज्जीभूतं वेशं दृष्ट्वा प्रसन्नः संजातः।

—क्व इदानीम् ?

—अद्य मुख्यकार्यालयं प्रति गन्तव्यम्।

— किमर्थम् ?

—आगमनात् मासत्रयं व्यतीतम्। औषधादयः समाप्ताः। पुनः तत् सर्वम् आनेतव्यं खलु !

—कुतः ··?

—अस्माकं मुख्यकार्यालये सर्वं सन्निहितमस्ति। तत्र गत्वा आनेष्यामि।

—एतदर्थं कियद्दिनमपेक्षते !

—एक एव सप्ताह आवश्यकः।

—इयद्दिनम् ?

—कार्यान्तरमपि अस्ति। तदपि संपादयितव्यं खलु ?

— भवतु। शुभानि भवन्तु। शीघ्रं प्रत्यागन्तव्यम्।

—नूनम्। नूनम्। यमुनामाता, मन्ये, सुप्ता। तस्यै मे प्रणामो निवेदनीयः।

—भवतु।

—प्रकोष्ठस्य कुञ्चिकां नयतु।

—नहि···, नहि···, तव पार्श्वे तिष्ठतु।

—अहम् इतस्ततो भ्रमिष्यामि। यदि कुत्र निपतेत्···।

—तर्हि···भवतु।

चरकः पुरः सरति। मनसि किंचित् विस्मृतिः। किंचिच्च स्मृतिः। भावनायाम् एकतः संजीवनी। अन्यतो जानुपर्यन्तं वसनमुत्थाप्य दण्डायमाना सूची। सैव रज्जुमयी खट्वा। सैव पीडिता सूचीजननी। विस्मृतिषु केवलं भाटकम्,·· गृहम् गृहार्थं मोघा याच्ञा···दैन्यवणिग्वृत्त्योः संघर्ष सहवसतिश्च।

चरकः समाधानं न प्राप्तः। स रेलस्थानं संप्राप्तः। रेलयाने च उपविष्टः। परमनुभवति, सैव उन्मादिनी यमुना तं प्रतिबध्नाति। मायाम् उदाहृत्य बहुशो विबोधयति। चरकः चिन्ताशीलः। यमुना उन्मादिनी। तस्या विकृतिम् उपशमयितुं नूनं कति परदेशिनः चरका आगमिष्यन्ति। तस्या 'माया' जाले निपत्य आत्मीया भविष्यन्ति। सा नूनम् इमं चरकं विस्मरिष्यति। परं सूची···? अवाध्यनयनपुरतः जानुपर्यन्तं वसनमाकुञ्च्य तथापि सा नृत्यरता। तथापि सा विह्वला हितैषिणी···।

अतीतं दिनसप्तकम्।

न कोऽपि सन्देश अद्यावधि आसादितः। गोविन्दः सन्देहापन्नः। किं चरकः पुनः परदेशी संजातः? अथवा व्यापारे विलम्बः संजातः? कार्यं निर्वहन् आश्वस्त्या आलस्यवशो वा?

यमुना पुनरद्य अस्वस्था। औषधिनिमित्तं पुनः क्व वा गन्तव्यम्? क्य वा परदेशी अन्वेष्टव्यः? प्राक् तु वचने तस्या केवलं 'माया' आसीत्। इदानीं पुनः मायया सह चरकोऽपि श्रवणपेयो भवति।

गोविन्दः निःसहायभावेन भग्नांशं पश्यति। भग्नांशस्तु अवलये तल्लीनः। न पुनरिह काऽपि जनश्रुतिः! न वा काचित् लोककथा। पुरतः केवलं सत्यं··क्षयः···अवलयः··। नात्र आषाढयामिनी। न वा मेघमेदुरो वासरः। प्रलयः स्नेहशीलः। अयमेव विपाकपिङ्गलपरिणामः। ···आरम्भसमापनयोः नागवन्धः। अयं च हताशायाम् आशासंकेतः ···शान्तेरशान्तेश्च निजविमूढसमन्वयः।

– गोविन्द···! गोविन्द···!

यमुना वितृष्णतया सम्बोधयति। गोविन्दः प्रकृतिस्थः सन् उत्तरति।

—वद···! किमिच्छसि?

—चरकः अद्यापि न प्रत्यागतः?

—नहि।

—कदा आगमिष्यति? किमपि पत्रं दत्तं वा?

—नहि, तस्य बहु कार्यं वर्तते। तत् सर्वं संपाद्य आगमिष्यति।

– भवतु। शरत्पूर्णिमा निकटायते। तदा अवश्यं मायाम् अत्र आनय। तदानीं चरकोऽपि उपस्थितः स्यात्। उभयस्य साक्षात्कारः प्रथमतो भवतु।

—सर्वं करिष्यामि । न किमपि चिन्तय ।

यमुना आश्वस्तिमनुभूय विरता । गोविन्दः पूर्वंगत्या स्वस्थानमुपगतः । पूजाचत्वरे आवर्जनां परिष्कर्तुम् आरब्धः ।

—गोविन्दभ्रातः ! गोविन्दभ्रातः··· !

गोविन्दः स्वरं निशम्य व्यजानात् । इयं मीनाक्षी । चरको नागमिष्यतीति विभाव्य पुनः गृहार्थम् अनुरोद्धुम् आगता । गृहेऽस्मिन् तस्या दृष्टिः मूलतो वर्तते । अद्यापि आशा तस्याः पूर्ववत् हरिता । अनुरोधश्च विनयनम्रः ।

गोविन्दः समकेतयत् ।

—आगच्छ भगिनि ! आगच्छ··· ! अहं पूजाचत्वरे ।

मीनाक्षी उपसृता ।

—भ्रातः ! चरको न दृश्यते ? कुत्र गतः ?

—मुख्यकार्यालयम् ।

—कदा आगमिष्यति ?

—न जाने ।

—तर्हि ··?

—तन्निकटे कार्यमस्ति वा ?

—नहि ।

—मन्निकटे ?

—नहि ।

—तर्हि···?

—कार्यान्तरम् आसीत् । तदर्थम् आगता । भवतः शब्दं श्रुत्वा अत्र उपस्थिता । चिन्तिता च,···गच्छानि · पश्यानि···किं वा आयोजयति भ्राता शरत्पूजार्थम् ।

– एवं वा ? भवतु ··भवतु ··। अन्यत् सर्वं कुशलं नु ?

—हँ ··तथैव । शरत्पूर्णिमा निकटायते । सूचीनिमित्तम्···।

—शरत्पूजा तु तासामेव ।

—तदर्थं चिन्तिताऽहम् । गच्छानि··पश्यानि··यदि किंचित् कुत्र वा सम्भवेत् ?

—अयि ! उपविश नु ।

—नहि, भ्रातः ! विलम्बो भवति ।

—भवतु । याहि, एवं कदा कदा आगच्छ···।

मीनाक्षी प्रत्यावर्तते। मनोवचनं वक्तुं सा समर्था नाभूत्। चरकस्य प्रतिश्रुतिः सम्मुखे अपुष्पायते। सूचीचरकयोः अन्धानुबन्धे केवलं सा विमथ्यते। उभयस्य आद्यन्तप्रत्याहारे सा तु मध्यवर्णा अङ्गीकृतिरेव। तथापि कन्यार्थम् अग्रे पुरःफलानि···एका पतिंवरा रजनी···शरत्-पूर्णिमा।

शुक्लपक्षः अद्य पूर्णतां प्राप्स्यति।

अद्य सर्वं नूतनम्। वसनं नूतनम्। भूषणं नूतनम्। भोजनमपि किमपि नवीनम्। साक्षात्कारोऽपि नवीनजनेन सह। सर्वोपरि कामना नवीना। परं पुरातनो भग्नांशः। पूजा च तथापि निर्नवा।

गोविन्दः निविष्टः। प्रतीक्षारतः पूजावसरेऽस्मिन् परदेशी आगमिष्यति। गोविन्दस्य पूजान्तराले तथापि जिजीविषायाः रहस्यं पुनर्नवायते। भाटकीयमनोवृत्तिश्च तथापि लोलुपा। शाश्वतयाजनं परिहाय तस्य प्रणवः तथापि पार्थिवः। सः वहिर्गतवान्।

– हे यियासो ! हे पिपासो ! जिजीविषाजीवनयोः दूरता अद्यावधि न त्वया आकलिता···।

गोविन्दः पश्चात् अपश्यत्। स एव विविक्तदेवालयः अवलये निमग्नः। इदं च तस्य अन्तर्वचनम्। इदमेव प्रतिध्वन्यते तस्य मनसि। गोधूलिवेला आह्लादिनी।

सर्वत्र शरदुत्सवः वन्दनासुन्दरः। वालिकानां केलिकला कज्जल। विलोला। किशोरीणां स्नेहनिह्नुतिषु प्रथमश्रृङ्गारः सङ्गतिप्रियः। सद्यः सीमन्तिनी स्नेहनिमन्त्रणे अद्य स्वतन्त्रा। वृद्धाया जरदनुभवे वेलेयं विनोदवाहिनी।

प्रतीची पच्यमाना।

ग्रामचतुष्पथः लीलाप्रणयी। तत्र च कुमारीणां स्नेहमेला यथैका सघनकामायनी। सर्वासां मुखे कपालतः कपोलपर्यन्तं चन्दनकुंकुमयोः अनुरागविन्दुः। सर्वासां वसने वर्णच्छटा यथानेका पुनर्नवा ललितलिपि-माला। परस्परसम्बोधने केवलं तृष्णातरला नामावली। विमण्डिता सूची खेलति ··नृत्यति···हसति। गीतिकन्दली च अत्र शाश्वतस्य सन्देशे सुन्दरी।

गोविन्दः मन्दिरस्य अभिमुखम् आगच्छति। निकटे परदेशी। तेन सह जल्पन् सः प्रसन्नः। सः मार्गं निर्दिशति—इत इत आगच्छतु। अनुसरति परदेशी।

अदूरे परदेशी। चतुष्पथम् अभिलक्ष्य सः पुरः सरति। तं विलोक्य सहसा सूची पुलकिता। अनेकदिनानन्तरं पुनरद्य मुखं तस्या अरुणायितम्। सा किंचित् नम्रा अभूत्।

गोविन्देन सह परदेशी स्नेहमेलापार्श्वे एव प्रस्थितः। सूची नयनकोणे तं निरीक्षितवती। परं सर्पादि चकिता विस्मिता… विषण्णा…। नायं चरकः। नायं तस्या मनोवैद्यः। नायं सः प्रतिश्रुतिसम्पन्नः प्रणयी। अपरोऽयं परदेशी।

सूची एकाग्रतया पश्यति।

परदेशी भग्नांशं प्रापितः। गोविन्दः तमेव प्रकोष्ठम् उन्मोचितवान्। परदेशी प्रकोष्ठं प्रविष्टः।

सूची व्याकुला… नितराम् आतुरा सातिशयं प्रगल्भा। विह्वलभावेन सा प्रधावति। अञ्चलं तस्याः पताकायते। वसनं च उल्लोलम्। जानुपर्यन्तं वसनमुत्थाप्य सा चञ्चला।

प्राकारपार्श्वे सूची प्रतिहता विरता बाष्पाकुलिता। नयनपथे तस्या न चरकः। न वा तस्य प्रतिश्रुतिः। न चन्द्रः। न वा चन्द्रिका। केवलं स एव तमोगर्भः भग्नांशः। तदेव सर्पसंकुलं गुल्मारण्यम्। सएव स्नेहलाञ्छितो नाटकीयप्रकोष्ठः।

अन्तरङ्गचित्रकल्पेषु लोचनं शिशिरीकरोति सूची। निकटपल्वले उद्विग्ना टिट्टिभी स्वरसंचारं बहुगुणयति।

शरच्चन्द्रिका सुधास्यन्दिनी। आदिपूजाया अजस्ररतियोजनायां पौर्णमासी स्वादेश्वरी……।

कीदृशी स्वतंत्रता ?

(अभिराजो डा० राजेन्द्र मिश्रः, प्रयागः)

निर्दयं विरौम्यहं कोऽपि नो शृणोति मे
मामके हि भारते कीदृशी स्वतंत्रता ??

शोकतापजर्जरा द्रोहभारभङ्गुरा
अद्य दृश्यते न किं भारती वसुन्धरा
दुर्गते हि भारते कीदृशी स्वतंत्रता ? मामके०

लज्जयाऽऽनतं शिरो हन्त देवतात्मनाम्
वेदनाऽऽहतम्मनो नाकिनां हुतात्मनाम्
चिन्तयन्ति तेऽनिशं भावयन्ति विस्मिताः? मामके०

गन्धपुष्पवल्लरीभृङ्गगीतिमार्दवम्
विद्यतेऽधिवाटिकं किन्न भूरिवैभवम्
प्रोत्थिते दवानले कुत्र काकलीकथा ? मामके०

शष्पवीथिकाऽऽयता स्वादु निर्झरीजलम्
लोलकेलयेऽवनी चारु शर्वरीगृहम्
व्याघ्रधर्षिते वने किन्तु नैव बन्धुता ? मामके०

पूतजाह्नवीजलं कैर्हलाहलीकृतम्
केन सप्तसैन्धवं रक्तरञ्जितं कृतम्
भेदभावदृष्टिभिर्दीर्यते समग्रता ? मामके०

यत्तटस्थभावना भूतलेऽभिनन्द्यते
विश्वशान्तिकामना सौमनस्यमश्नुते
प्राज्यवैभवस्य तत् कीदृशी विपन्नता ? मामके०

अद्य कम्पते रुषा सम्भ्रमेण धूर्जटी
रक्ष रक्ष भारतं वक्ति भैरवी नटी
येन नो खलीभवेत् सौम्यभारतीयता ? मामके०

एत भारतीसुता बूत कण्ठसङ्गताः
नो वयं पृथक् श्रिता नो वयं पृथङ्गताः
हिन्दुसिक्खमुस्लिमैः संस्कृतिर्विनिर्मिता ? मामके०

किमर्थम् ?

[डा० राधावल्लभः त्रिपाठी, सागरः (म०प्र०)]

सरति मानसे चिन्तासरणिर्नाणुतया वशमयते ।
प्रश्नकीलिता सततं शङ्काऽतिशयमनशयमिव कुरुते ॥

विचलति वेल्लति, भवति च मनः सहसा किमु सोत्कम् ।
रेखामात्रमपि क्षुण्णं नो जायते किमर्थं मे ?

अङ्गारैराचितमपि सहसा महसैव नैव ज्वलते ।
आर्द्रेन्धनमिव चेतो धूमायते किमर्थं मे ?

काप्यव्यक्ता स्वरलहरी गुञ्जति वैकल्यकरी ।
निःस्पन्दा न तु मानसतन्त्री झङ्कार्यते किमर्थं मे ?

त्रुटिते प्रेमाबन्धे प्रक्षालित इव मनसो रागे ।
मयि दृष्टिं निदधच्चक्षुर्वाष्पायते किमर्थं ते ?

देववाणी-परिषद्वार्ता

१. अक्षरश्लोक-कार्यक्रमः

देववाणी-परिषदा ७-५-१९८६ ई० तारिकायाम् ६ वाणी-विहारे अक्षरश्लोकस्यायोजनं कृतम् । सहारनपुरस्थ जे० वी० जैन कालेजे हिन्दी-विभागाध्यक्षेण किञ्च प्रसिद्धसंस्कृतकविपण्डितेन श्रीविष्णुकान्तशुक्ल-महाभागेनास्यायोजनस्य आध्यक्ष्यं विहितम् ।

२. 'संस्कृत-साहित्ये गंगा'

देववाणी-परिषदस्तत्त्वावधाने १७.६.१९८६ तारिकायां 'संस्कृतसाहित्ये गंगा' इति विषयमवलम्ब्यैका विचारगोष्ठी समायोज्यत । तत्र भाषमाणेन परिषन्महासचिवेन डा० रमाकान्तशुक्लेन भणितम् यत् आसहस्राब्दैः अद्यपर्यन्तं संस्कृतरचनाकारैः गंगायाः स्मरणं महता आदरेण कृतम् । तस्याः शुचितायाः, करुणायाः, कृषिकर्मोपकारितायाः, प्राकृतिकसुषमायाश्च वर्णनं कुर्वद्भिः संस्कृतरचनाकारैः राष्ट्रैक्यस्य भावः पोषितः ।

विचारगोष्ठ्यां डा० रामसुरेशपाण्डेय—डा० गोविन्दप्रसादउपाध्याय-डा० सुरेन्द्रनारायणत्रिपाठिभिरपि स्वविचाराः प्रस्तुताः । विचारगोष्ठ्या आध्यक्ष्यम् आचार्यश्रीडा०रमेशचन्द्रशुक्लमहाभागैः कृतम् ।

अस्मिन्नवसरे गंगामवलम्ब्य काव्यपाठगोष्ठी अपि समायोज्यत यत्र श्री बलदेवानन्द सागर-श्रीरामप्रसादकौशिक-श्रीचन्द्रशेखर शर्मा-अभिनव शुक्ल-प्रभाकरपाण्डेयादिभिः काव्यरचनाः पठिताः ।

३. नवमम् अखिलभारतीयसंस्कृतकविसम्मेलनम्

देववाणी-परिषदा आगामिनि अगस्तमासे १९ तारिकायां संस्कृतदिवसं स्वसंकल्पनादिवसस्य दशमवर्षग्रन्थिं चोपलक्ष्य दिल्लीविश्वविद्यालयस्य टैगोर-सभागारे नवमम् अखिलभारतीयसंस्कृतकविसम्मेलनमायोजयिष्यते यत्र त्रिंशत्प्रायाः कवयः स्वरचनाः पठिष्यन्ति ।

संस्कृत-जगद्वार्ता

१. **संस्कृते वैवाहिकनिमन्त्रणपत्रम्**—'शारदा' सम्पादकेन श्री वसन्त अनन्त गाडगील-महाभागेन 'पारिजात'-सम्पादकेन डा० प्रकाशमित्रशास्त्रिणा च स्व-स्वतनयविवाहनिमन्त्रणपत्राणि संस्कृते एव मुद्रापितानि । संस्कृतज्ञानां कृते प्रेरणादायकोऽयमाचारः ।

२. संस्कृते आइ०ए०एस० परीक्षोत्तीर्णा—संस्कृतमाध्यमेन एकेन प्रत्याशिना 'आई० ए० एस०' परीक्षा १९८६तमेशवीयेऽब्दे समुत्तीर्णा।

३ अखिल भारतीय प्राच्यविद्यासम्मेलनस्य त्रयस्त्रिंशत्तममधिवेशनं कलिकातायाम् 'एशियाटिक सोसाइटी'-तत्त्वावधाने २४-२६.१०.१९८६ तारिकासु सम्पत्स्यते।

४. ५—७-५.१९८६ ई० तारिकासु राजस्थानसंस्कृतसाहित्यसम्मेलनस्य चतुर्दशं महाधिवेशनं जयपुरे सम्पन्नम् यत्र वैदिकयज्ञ, शास्त्रीयपरिषदः, शलाकापरीक्षा, शास्त्रार्थपरिषद्, अखिलभारतीयसंस्कृतपत्रकारसम्मेलनं, संस्कृतशिक्षापरिषद्, अखिलभारतीयसंस्कृतकविसम्मेलन विद्वदभिनन्दन च अनुष्ठीयन्त।

५. डॉ० रामचन्द्र अरलीकट्टी-महाभागस्य संस्कृतविषयिणी अमेरिका-इग्लैण्ड यात्रा—अमेरिकादेशस्य इलिनॉय-विश्वविद्यालयेन आयोजितायां संस्कृतविचारगोष्ठ्यां समस्तभारतीयविश्वविद्यालयप्रतिनिधित्वेन समुपस्थातुं २५-५-१९८६ ई० तारिकायां भारतात प्रस्थाय तिरुपतिस्थ-केन्द्रीयसंस्कृतविद्यापीठे शिक्षणशास्त्रविभागाध्यक्षो डॉ० रामचन्द्र अरलीकट्टीमहाभागः ३-७-१९८६ ई० तारिकायां भारतं प्रतिनिवृत्तः १९८६ तमेशवीयेऽब्दे मईमासस्य २७, २९, ३० तारिकासु तत्र आयोजितासु गोष्ठीषु 'भारतीय उच्चशिक्षणविषयकाः केचन प्रश्नाः', 'हिन्दुधर्मग्रन्थस्थ नित्यपूजा तथा नैमित्तिकधार्मिकविधयः—तेषां भाषागतविशेषाः', 'अद्यतनभाषित-संस्कृते पदानामानुपूर्वी : केचन प्रतिबन्धाः' इति विषयेषु तेन निबन्धत्रयं पठितम्। ३१-५-८६ तारिकायां तेन 'सम्भाषितसंस्कृत-विषयिणी' एका होरात्रयव्यापिनी कार्यशाला सञ्चालिता यत्र भारते सम्भाषितसंस्कृतभाषायाः जीवन्तत्वं प्रतिपादितम्। मासैकव्यापिन्याम् अमेरिका-इग्लैण्डयात्रायां डा० अरलीकट्टीमहाभागेन मिशिगन-शिकागो-फिलाडेल्फिया-कोलम्बिया-न्यूयार्क-आक्सफोर्ड (लन्दन विश्वविद्यालयाः संदृष्टाः, तत्रत्यैर्विद्वद्भिः साकं संस्कृतप्रचारोपायेषु चर्चा च कृता।

(रमा शुक्ला)

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

★

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल (देववाणी-परिषद् दिल्ली-कृते) भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९

४. सम्पादक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं। — देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल

महासचिव, देववाणी-परिषद् दिल्ली

प्रकाशक

देववाणी-परिषदा प्रकाशिता ग्रन्थाः

१.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
२.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः)	रु० ३०.००
५.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
६.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
७.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
८.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
९.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१०.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,,)	रु० २०.००
११.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
१२.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
१३.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ३०.००
१४.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
१५.	अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः)	रु० २०.००
१६.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१७.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१८.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५० ००
१९.	साधारणीकरण और समानान्तर चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० २०० ००
२०.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
२१.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
२२.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
२३.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२४.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२५.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२६.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२७.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२८.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२९.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
३०.	महाप्रयाणम् (श्रीकृष्ण सेमवालः)	रु० २०.००
३१.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाष : ५५३४९९

अर्वाचीनसंस्कृतम्

(अष्टमवर्षे चतुर्थोंऽकः)

१५ अक्टूबर १९८६

सम्पादक :

डा० रमाकान्त शुक्ल:

एम० ए०, पीएच० डी०, साहित्याचार्य:

सांख्ययोगाचार्य:

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहार:, नयी दिल्ली - ११००५९

अर्वाचीनसंस्कृतम् (८/४)

(R. N. 34554/79)

(१५ अक्तूबर १९८६ ई०)

विषय-सूची

विषयः	लेखकः	पृष्ठाङ्क
१. सम्पादकीयम्		२२५
२. देववाणी-परिषद्वार्ता	श्रीमती रमा शुक्ला	२२८
३. संस्कृत-जगद्वार्ता	,,	२२९
४. पद्यपत्रद्वयम्	(१) प्रा० हरिश्चन्द्र रेणापुरकरः (गुलबर्गा)	२३१
	(२) डा० रामकिशोर मिश्रः (खेकड़ा)	२३२
५. कविकुलगुरुवाणी	डा० बच्चूलाल अवस्थी (उज्जयिनी)	२३३
६. पं० रामशरणशास्त्रिकृत-कौमुदीकथाकल्लोलिनी-समीक्षणम्	डा० चन्द्रभानुत्रिपाठी (इलाहाबादः)	२३५
७. श्रीगरुडध्वजसपादशतकम्	डा० रामकिशोर मिश्रः (खेकड़ा, मेरठ)	२४१
८. लक्ष्मीशतकम्	डा० वरदराजकण्णन् (हैदराबादः)	२५७-२७२

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम् – नयी दिल्ली

२. प्रकाशनकालावधिः — त्रैमासिकम्

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च डा० रमाकान्त शुक्लः, भारतीयता, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः —देववाणी-परिषद्, दिल्ली ६, वाणी-विहारः, नयी दिल्ली-११००५९

डा० रमाकान्तशुक्लः इति नामाहं उद्घोषयामि यदुपरिलिखित सकलमपि विवरणं मम मतो सत्यमस्ति ।

डा० रमाकान्त शुक्लः
प्रकाशकः मुद्रकश्च

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नई दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (८/४) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.१०.१९८६।

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य अष्टमवर्षीयश्चतुर्थोऽङ्कः पाठकानां करकमलेषु समर्प्यते। अस्मिन्नङ्के देववाणी-परिषद्वार्ता, संस्कृत-जगद्वार्ता, पद्यपत्रद्वयम्, एका कविता, एको लेखः, एकं सपादशतकम् एकञ्च शतकं प्रकाश्यन्ते ।

अथ पद्यपत्रद्वयं विमृश्यते । इदं पत्रद्वयमेतत्पंक्तिलेखकमुद्दिश्य कविवरद्वयेन प्रहितम् । श्रीहरिश्चन्द्ररेणापुरकर-डा०रामकिशोरमिश्र महाभागौ-१९.८.१९८६ ई० तारिकायां देववाणी-परिषदा समायोजितं नवममखिल-भारतीयसंस्कृत-कविसम्मेलनं सभाजयामासतुः । श्रीरेणापुरकारमहाभागः १८.८.१९८६ ई० तारिकायामाकाशवाण्याः दिल्लीकेन्द्रेण समायोजिते संस्कृत-कविसम्मेलनेऽपि स्वकाव्यं पठितवान् । दिल्लीतो गुलबर्गां प्रतिनिवृत्तेनानेन-महानुभावेन स्वसौशील्यात् पत्रमिदं प्रहितम् । अस्मिन् पद्यमये पत्रे श्रीरेणापुरकर-महाभागेन नूतनशिक्षापद्धतौ संस्कृतस्य कृते समुचितस्थानदानस्य आवश्यकता रेखांकिता । कवेरिदं कथनं संस्कृतजगतो मनोव्यथां प्रदर्शयति—

तदपि नूतनशिक्षणपद्धतौ भरतवर्षपुरातनसंस्कृतेः ।
असुभृतः खलु देवगिरः कृते स्थिरपदं परिकल्प्यमभीप्सितम् ।।
परिमितिः सुरवाक्पठनार्थिनां प्रतिदिनं तनुतामधिगच्छति ।
सुरगिरोऽध्ययनं न हि वृत्तिदं स्थितिरियं नितरां भयकारिणी ।।
विकटभीषणदारुणसंस्थितिं सुरगिरः परिवर्तयितुं बुधैः ।
किमपि सारमयं समये सति ननु समाचरणीयमहो द्रुतम् ।।

द्वितीये पद्यपत्रे डा० रामकिशोरमिश्रमहाभागेन अर्वाचीनसंस्कृतस्य विगताङ्कमवलम्ब्य स्वप्रतिक्रिया प्रेषिता । संस्कृतस्य पत्रसाहित्ये प्रीतिमतां कृते अस्मिन् पत्रद्वयेऽवश्यं किञ्चित्सार्थकं तत्त्वं सुलभं स्यात् ।

'कविकुलगुरुवाणी' —इत्यस्यां प्रौढिमय्यां कवितायां कविवर्यैः विद्वत्तल्लजैः डा० बचूलालअवस्थिमहाभागैः जीवनस्य विविधासु परिस्थितिषु कालिदास-कवितायाः प्रासङ्गिकता प्रदर्शिता ।

"पं०रामशरणशास्त्रिकृत-कौमुदीकथाकल्लोलिनी-समीक्षणम्" इत्यस्मिँल्लेखे डा० चन्द्रभानुत्रिपाठिमहाभागैः आचार्यरामशरणशास्त्रिणस्तत्प्रणीतायाः 'कौमुदीकथाकल्लोलिन्या'श्च परिचयो दीयते । चौखम्बाविद्याभवनतः प्रकाशिताया अस्या गद्यरचनाया माध्यमेन लेखकः स्वपाठकेभ्यः सरसरीत्या संस्कृतव्याकरणस्य परिचयं ददाति । अयं लेखः अर्वाचीनगद्यसाहित्यस्य शोधार्थिनां कृते महत्त्वपूर्णः ।

तदनु, उत्तरप्रदेशे एटाजनपदस्थ 'सोरों' नगरे १९९५ तमे वैक्रमाब्दे फाल्गुनमासे शुक्लपक्षे षष्ठ्यां तिथौ शनिवारे श्रीमत्यां कलावत्यां श्रीहोतीलालमिश्रमहाभागात्समुत्पन्नस्य, एम०ए०-पी-एच०डी०-साहित्य-व्याकरणाचार्योपाध्यलङ्कृतस्य, 'काव्यकिरणावली' 'त्यागपत्रनिरासम्' 'पत्नीत्यागम्' 'अन्तर्दाहः,' 'विद्योत्तमाकालिदासीयम्,' 'अङ्गुष्ठदानम्' इत्येतदादिविविधकाव्यनाटकोपन्यासादिग्रन्थकर्तुः अद्यत्वे च मेरठमण्डलान्तर्गत-'खेकड़ा'स्थस्य महामनामालवीयडिग्रीकालेजस्य संस्कृतविभागे प्रवक्तृपदमलंकुर्वाणस्य आचार्यश्रीरामकिशोरमिश्रमहाभागस्य **'श्रीगरुडध्वजसपादशतकम्'** प्रकाश्यते । अक्षरसंयोजक-संशोधकानवधानात् श्रीगरुडध्वजसपादशतकस्य शीर्षकं **'श्रीगरुडध्वजशतकम्'**—इति मुद्रितम् । पाठकैः कृपया २४१-२५६ पृष्ठेषु **'श्रीगरुडध्वजशतकम्'** इत्यस्य स्थाने **'श्रीगरुडध्वजसपादशतकम्'** इत्येव शीर्षकं पठनीयम् ।

कविनास्य सपादशतकस्य रचना २०४३ तमे (कालोदधिखात्माब्दे) चैत्रमासे शुक्लपक्षे कृता । अस्य तथ्यस्य प्रकाशनं तेन १३० तमे पद्ये कृतम् । कविना आदितः १२९ तमपद्यपर्यन्तं वसन्ततिलकावृत्तं निर्व्यूढम्; प्रत्येकं पद्यं चतुर्थपादे **'तस्मै नमो भगवते गरुडध्वजाय'** इति मुकुटेन चालङ्कृतम् । गरुडध्वज भगवन्तं विष्णुं काव्यविधिना वसन्ततिलकेन च परिवर्णयता कविवरेण मिश्रमहाभागेन **विष्णुसहस्रनामस्तोत्रान्तर्गतानां** विष्णोः विष्णु-अच्युत-आदिदेव-गरुडध्वज-उपेन्द्र-नारायण-वैकुण्ठ-पुरुषोत्तम-यज्ञ-जनार्दन-अधोक्षज-हरि-चतुर्भुज-राम-कृष्ण-देव-सर्व-शौरि-वनमालि-गोविन्द-माधव-केशव-श्रीगर्भ-हिरण्यगर्भ-हिरण्यनाभ-दण्ड-समीरण वैद्य-जह्नु-प्रभृतिप्रथमान्तनाम्नां (विशेषणानां वा) प्रथमा द्वितीया-चतुर्थीविभक्तिषु उपयोगः कृतः, यथा—

नित्यं नमामि पुरतो यमहं स्वभक्त्या, रामः स यत्र मुनियोगिवरा रमन्ते ।
यं रामदेवमधुना हृदये भजामि, तस्मै नमो भगवते गरुडध्वजाय ॥

क्वचित्कविना 'विष्णुसहस्रनामस्तोत्र'स्थपदेषु वृत्तानुरोधेन किञ्चित्परिवर्तनमपि कृतम् यथा—पद्मनाभ-विष्वक्सेन-श्रीवत्सवक्षा-लोकनाथ-शार्ङ्गधन्वा-स्वयम्भू-मधुसूदन-त्रिविक्रम-चक्री-सिद्धार्थप्रभृति-पदानि कमलनाभ-विष्वग्बल-श्रीवत्सलाञ्छन-लोकेश्वर-शार्ङ्गी-स्वभू-मधुरिपु-त्रिपराक्रम-चक्रपाणि-सिद्धार्थवदादिरूपे परिवर्तितानि । एतदतिरिक्तम् कविना अन्यान्यपि भगवन्नामानि विष्णुनामसु परिगणितानि, यथा—

अल्लः स यो मुसलमाननृणां खुदा च, यः कथ्यतेऽत्र गिरजासु च गौड आंग्लैः ।
विष्णुः स स एव बहुदेशजरूपभिन्नः तस्मै नमो भगवते गरुडध्वजाय ।।११३।।
अत्र 'आंग्लैः' इति पदेन सम्भवतः कविना 'क्रैस्तैः' इति गृह्यते ।

अत्र काव्ये भगवतो विष्णोर्विविधाः कथा अपि संकेतिताः सन्ति ।

नूनं हि कविवरेण मिश्रमहाभागेन पाठकानां कृते सा पुण्यमयी सामग्री पुनः प्रस्तूयते या विष्णुसहस्रनाम-श्रीमद्भागवतादिमहनीयग्रन्थेषु अस्माकं पूर्वर्षिभिः प्रस्तुतासीत् । इदं हि काव्यं कवेः पाण्डित्यस्य, कवित्वस्य भक्तिभावस्य च परिचायकमस्ति । कविनात्र अल्पेन बहूक्तम् ।

'लक्ष्मीशतकं' नानावृत्तमयं स्तोत्रकाव्यमस्ति । अस्य रचयिता डा० वरदराज कण्णन् महाभागः तमिलनाडुप्रदेशे नावल्पाक्काभिधे श्रोत्रियाग्रहारे सोमयाजिनः अग्निहोत्रिणः विदुषः श्रीनारायणताताचार्यस्य पौत्रः शिष्यश्च । न्यायशिरोमणेः वेदान्तशिरोमणेः श्रीवरदाचार्यस्य पुत्रः, तत्सकाशादधीतवेदश्च । न्यायरत्नादिविरुदभूषितस्य राष्ट्रपतिसम्मानभाजः श्रीमधुरान्तकवीरराघवाचार्यस्य दौहित्रः । गणितशास्त्रे एम्०सस्-सी०, एम०फिल्०, पी-एच०डी०-इत्युपाधिमण्डनस्य श्री व० कण्णन्-महाभागस्य गणितविषयका लेखा विदेशीयसञ्चिकासु असकृत् प्रकाशिताः । संस्कृत-लेखाश्च केचन 'सुधर्मा', 'सुरभारती' प्रभृति पत्रिकासु प्रकाशिताः । अद्यत्वे अयं महानुभावः हैदराबादनगरे केन्द्रीयविश्वविद्यालये गणितविभागे आचार्यपदमलङ्करोति ।

श्रीकण्णन्-महाभागेन अष्टोत्तरशतपद्यमितस्य लक्ष्मीशतकस्य रचना भगवत्या लक्ष्मीदेव्याः प्रसादार्थं कृता । श्रीव्रतदल-मेघविनाशदल-श्रुतिदल-विभवावतारदल -स्ववंश्याचार्यदल -आचार्यवंशदल- लोकगतिदल-नामावलिदलेत्यष्टसु दलेषु मद्रासनगरे वसन्तनगरपरिसरे स्थिते मन्दिरे कृतालयां भगवतीम् अष्टलक्ष्मीं प्रति स्वभक्तिभावं प्रदर्शयता कविना सालङ्कृतिरचनाचातुरी अपि प्रदर्शिता । यथावसरं पादटिप्पणीषु मूलपाठस्य गूढाभिप्राया अपि विवृताः । कविना परिशिष्टरूपेण लक्ष्मीशतके उदाहृतानाम् आख्यानकानां संग्रहोऽपि दत्तः । स च अर्वाचीनसंस्कृतस्य नवमवर्षीये प्रथमेऽङ्के पाठकैर्लब्धः स्यात् । अस्मिन्नङ्के स्थानानुरोधात् मूलमात्रं लक्ष्मीशतकं प्रकाश्यते ।

१५.१०.१९८६
आर ६, वाणी-विहारः
नयी दिल्ली-११००५९

रमाकान्त शुक्लः

(रमाकान्त शुक्लः)
प्रधान सम्पादकः

देववाणी-परिषद्वार्ता

१. देववाणी-परिषदा स्वसंकल्पनादिवसस्य दशमवर्षग्रन्थिं किञ्च संस्कृतदिवसमुपलक्ष्य श्रावणीपूर्णिमायां भौमवासरे १९.८.१९८६ ई० तारिकायां दिल्लीविश्वविद्यायलस्य टैगोर-सभागारे नवमम् अखिलभारतीय-संस्कृतकविसम्मेलनमायोजितम् ।

सम्मेलनस्योद्‌घाटनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्राक्तनकुलपतिना डा० रामकरणशर्ममहाभागेन कृतम् । दूरदर्शनसंगीतनिर्देशकश्रीछोटेलालमहाभागस्य निर्देशने कलाकारैः सुरभारती-वन्दना ससंगीतं प्रस्तुता ।

विशिष्टातिथिना राष्ट्रियसंस्कृतसंस्थाननिदेशकेन डा० मण्डनमिश्र-महाभागेन कवीनामभिनन्दनं कुर्वता समकालीनसंस्कृतकाव्यस्य सम्यक् मूल्याङ्कनार्थं समीक्षका आहूताः ।

कविसम्मेलनेऽस्मिन् डा० राधावल्लभत्रिपाठी (सागरतः), आचार्य श्रीनिवास रथः (उज्जयिनीतः), डा० दीपकघोषः (कलिकातातः), डा० लीनारस्तोगी (उमरेडतः), सौ०कमल अभ्यङ्करः (मुम्बईतः), पं०वसन्त अनन्त गाडगीलः (पुणेतः), डा०कृष्णकान्तशुक्लः (लखनऊतः), डा० उमाकान्तशुक्लः (मुज़फ़्फ़रनगरतः), पं० विष्णुकान्तशुक्लः (सहारनपुरतः) श्रीहरिश्चन्द्ररेणापुरकरः (गुलबर्गातः), डा० केशवचन्द्रदाशः (पुरीतः), श्रीसदानन्ददीक्षितः (पुरीतः), डा० मिथिलेशकुमारी मिश्रा (पाटलिपुत्रतः), श्रीकृष्णमुरारि शर्मा (होशियारपुरतः), श्रीरामेश्वरदत्त शर्मा (भिवानीतः), पं० कलानाथशास्त्री (जयपुरतः), डा० वरदराजकण्णन् (हैदराबादतः), डा० हरिदत्तशर्मा (इलाहाबादतः), डा० नलिनी शुक्ला (कानपुरतः), डा० रामकिशोरमिश्रः (खेकड़ातः), पं० कमलापति मिश्रः (लखनऊतः), आचार्य-वेदानन्दझा, कविरत्नश्रीकृष्णसेमवालः श्रीमधुरशास्त्री, डा० जगदीशदत्त दीक्षितः, डा० भवानीशङ्कर त्रिवेदी, डा० रघुनाथ पाण्डेयः, श्री वीरेन्द्रकुमार झा, श्रीओमप्रकाशठाकुरश्च (सर्वेऽपि दिल्लीतः) स्वरचनाः प्रस्तुतवन्तः ।

कविसम्मेलनस्याध्यक्ष्यं प्रसिद्धसंस्कृतकविना किञ्च इलाहाबादविश्व-विद्यालयस्य संस्कृतविभागे प्रवाचकेन डा० राजेन्द्रमिश्रमहाभागेन सञ्चालनञ्च देववाणी-परिषन्महासचिवेन डा० रमाकान्तशुक्लेन कृतम् ।

कविसम्मेलनस्य केचन अंशाः दूरदर्शनस्य दिल्लीकेन्द्रतः १८.९.१९८६ तारिकायां सायं सप्तवादनतः सार्धसप्तवादनं यावत् प्रसारिता अभूवन् ।

२. डा० रमाकान्तशुक्लस्य निर्देशने देववाणी-परिषत्कलाकारैः आकाशवाण्याः दिल्लीकेन्द्रे १०.१०-१९८६ ई० तारिकायां 'पुरश्चरणकमल'-नाटकं प्रस्तुतम् ।

देववाणी-परिषदो नवमेऽखिलभारतीयसंस्कृतकविसम्मेलने प्रो० राधावल्लभ त्रिपाठी काव्यं पठति
(१९ ८.१९८६ ई०)

संस्कृत-जगद्वार्ता

१. स्वातन्त्र्यपर्वणि १५.८.८६ तारिकायां भारतस्य महामहिमराष्ट्रपतिना श्रीज्ञानीजैलसिंह-महाभागेन संस्कृत-क्षेत्रे महत्त्वपूर्णसेवार्थं इमे दश विद्वांसः सम्मानिताः—प्रो० नवल पक्कम् एस० रामानुज ताताचार्यः, प्रो० महाप्रभुलाल गोस्वामी, डा० श्रीराम पाण्डेयः, श्री वी०एन० पण्डितः, डा० ए०एन० जानी, डा० इन्द्रचन्द्र शास्त्री, डा० राममूर्ति शर्मा, डा० जयमन्त मिश्रः, प्रो० वी० वेङ्कटाचलम्, डा० रमारञ्जन मुखर्जी च। सर्वेभ्यो वर्धापनम् !

२. इन्द्रप्रस्थीयसंस्कृतपरिषदा १७.८.८६ तारिकायाम् 'आर ६ वाणी-विहार, नयी दिल्ली-११००५९' इत्येतत्स्थाने संस्कृतकविगोष्ठी आयोजिता।

३. आकाशवाण्याः दिल्लीकेन्द्रेण संस्कृतदिवसस्य पूर्वसन्ध्यायां १८.८.१९८६ ई० तारिकायां नवदिल्लीस्थ-राष्ट्रीयसंग्रहालयसभागारे एकं संस्कृतकविसम्मेलनमायोजितं यत्र षोडशकविभिः स्व रचनाः प्रस्तुताः। अस्य सम्मेलनस्य सम्पादिता अंशा आकाशवाण्या दिल्ल्याद्यनेककेन्द्रेभ्यः १९.६.१९८६ तारिकायां रात्री ९.३० वादनवेलायां प्रसारिता अभूवन्। एतदायोजनार्थ-माकाशवाणी वर्धापनमर्हति।

४. १९.८.१९८६ तारिकायां नवदेहलीस्थे राष्ट्रीयसंग्रहालयसभागारे मानवसंसाधनविकासमन्त्रालय - राष्ट्रियसंस्कृतसंस्थान - श्रीलालबहादुरशास्त्रि-केन्द्रीयसंस्कृतविद्यापीठानां संयुक्ततत्त्वावधाने संस्कृतदिवस-समारोहः समायोज्यत। मुख्यातिथित्वं केन्द्रीयलोहखनिमन्त्रिणा श्रीकृष्णचन्द्रपन्तमहाभागेन आध्यक्ष्यं च केन्द्रीयशिक्षासंस्कृतिराज्यमन्त्रिश्रीमतीकृष्णासाहीमहाभागया सम्पादितम्। डा० मण्डन मिश्र-डा० त्रिलोकनाथ धर-डा० कमलाकान्त मिश्र-महाभागैः संस्कृतस्य समुन्नयनार्थं शासकीयप्रयासानां सूचना प्रदत्ता। अवसरेऽस्मिन् 'आदिशङ्कराचार्य' संस्कृतचलचित्रस्य प्रदर्शनमप्यभूत्।

५. सागरस्थ - डा० हरिसिंहगौरविश्वविद्यालयस्य संस्कृतविभागेन १६.९.१९८६-१९.९.१९८६ ई० तारिकासु कौटिलीयमर्थशास्त्रमवलम्ब्य चतुर्दिवसीया अखिलभारतीया संगोष्ठी समायोजिता। उद्घाटनसमारोहे अतिथीनां स्वागतं कुर्वता संगोष्ठ्या संयोजकेन संस्कृतविभागाध्यक्षेणाचार्य-

डा० राधावल्लभत्रिपाठिनोक्तं यत् कौटिलीयमर्थशास्त्रं प्राचीनभारतीयदण्डनीत्या:, न्यायव्यवस्थाया: प्रजापालनस्य राजधर्मस्य वा विषये अद्भुत: शास्त्रीयग्रन्थोऽस्ति। तत् प्राचीनभारतीयसंस्कृतेर्विश्वकोषोऽस्ति। तस्य विस्मरणमस्माकं महती हानि: स्यात्।

पंजाबविश्वविद्यालयस्य संस्कृतविभागाचार्येण डा देवीदत्तशर्मणा संगोष्ठ्या उद्घाटनं कृतम्। तेनार्थशास्त्रस्य पारिभाषिकशब्दावलीमवलम्ब्याभिभाषितम्।

संगोष्ठ्यां प्रो० केशव पाण्डुरङ्ग जोग—डा० एन० पी० उन्नी-डा० बच्चूलाल अवस्थी-डा० कृष्णदत्त वाजपेयी-डा० श्रीमती एस० एस० डांगे-डा० एस०ए० डांगे-डा० ब्रजबिहारी चौबे-श्रीदेवप्रकाश खन्ना-डा० चन्द्रकान्तशुक्ल-डा० सत्यपाल नारंग-डा०कुसुम- भूरिया-डा० कृष्णा जैन-डा० पी०जी० लाले-डा०एस० आर० दात्रे-डा० पतञ्जलिकुमार भाटिया-डा० कु०शर्मिला चटर्जी-डा० कु०आभा बवेले-डा० लक्ष्मी नारायण दुबे-कु० सरलादुबे-डा० आशा सर्वटे-प्रभृतिभिर्देशस्य नैकैर्विद्वद्भि: धर्मदर्शनेतिहासपुरातत्त्वोद्योगराजनयदण्डनीतिविधिप्रशासनादिदृशा अर्थशास्त्रं विमृष्टम्।

१६.९.१९८६ तारिकायामेका संगीतगोष्ठी आयोजिता बभूव यत्र श्रीहर्षमहाभागस्य सितारवादनं श्रीतात्यामहाभागस्य गानमन्याश्च काश्चन संगीतप्रस्तुतय: सहृदयान् रससुधासागरे निमग्नानकार्षु:।

संगोष्ठ्या अवसरे १७.९.१९९६ तारिकायां संस्कृतकविगोष्ठी अप्यायोज्यत यस्या आध्यक्ष्यं 'ज्ञानोपाह्व' डा० बच्चूलालअवस्थिमहाभागै: सञ्चालनञ्च डा० रमाकान्तशुक्लेन कृतम्। कविगोष्ठ्यां डा० राधावल्लभ त्रिपाठि-डा० प्रेमवल्लभद्विवेदि-डा०एन०पी०उन्नी-डा०सत्यपालनारंगप्रभृतिभि: कविभि: स्वकाव्यरचना: प्रस्तुता:।

अस्याश्चतुर्दिवसीयाया: संगोष्ठ्या: समापनसत्रं १९.९.१९८६ ई० तारिकायां विश्वविद्यालयपुरातत्त्वसंग्रहालये सम्पन्नम् यस्याध्यक्ष्यं डा० राजेन्द्रमिश्रमहाभागेन मुख्यवक्तृत्वं च डा० रमाकान्तशुक्लेन निर्व्यूढम्।

६. अयोध्यायां २०.८.१९८६ तारिकायां संस्कृतसमन्वयसमित्यास्तत्त्वावधाने डा० राजदेवमिश्रमहाभागस्य संयोजकत्वे संस्कृतकविसम्मेलनं सम्पन्नम्।

(रमा शुक्ला)

'अर्वाचीनसंस्कृत-सम्पादकयाय किञ्च दिल्लीस्थ-देववाणी-परिषन्महा-
सचिवाय डा० रमाकान्तशुक्लाय

पद्यपत्रद्वयम्

(१)

सुरगिरोदयबद्धमहादराः कविवरोद्भटसंस्कृतसूरयः ।
अयि ! सुहृद्वरशुक्लमहोदयाः ! सविनया नतिरस्तु ममोत्तमः ॥१॥
सुरगिराकविमेलनदर्शकमधिगतं समभूत्समये मया ।
भवदतीवलघूत्तमपत्रकं मम रुजार्ततया च निरुत्तरम् ॥२॥
कविवरोत्तमकाव्यनिषेवणामधुरकाव्यरसार्णवगाहिताः ।
प्रमुदिता अभवन् सकला जनाः सुरवचोऽनवबोधपरा अपि ॥३॥
सरसकोमलगूढमनोगतैर्गहनतत्त्वनिबन्धनपेशलम् ।
सुरगिरः पुनराविरभूत्ततः प्रबलवैभवशक्तिमहोर्जितम् ॥४॥
अचिरपालितसंस्कृतवासरे ह्यभिनिमन्त्र्य पुरीं नवदेहलीम् ।
कविवरा भवता बहुसत्कृताः प्रकटयामि तदर्थकृतज्ञताम् ॥५॥
चिरपराङ्मुखनिःस्पृहवामकं सुरगिरां प्रति भारतशासनम् ।
किमपि चेत्प्रतिभाति कृपान्वितं भवति तत्र भवादृशकौशलम् ॥६॥
सुरगिरां सममेव जनप्रियामपि च शासनमानितपूजिताम् ।
वितनितुं भवता प्रकटीकृता निपुणता सुतरां बहुसंस्तुता ॥७॥
भवदतीवविचक्षणविज्ञता सुरगिरार्थसमर्पितवृत्तिता ।
परमदुर्लभयोजकता तथा सुरगिरः सुतरां हितसाधिका ॥८॥
तदपि नूतनशिक्षणपद्धतौ भरतवर्षपुरातनसंस्कृतेः ।
असुभृतः खलु देवगिरः कृते स्थिरपदं परिकल्प्यमभीप्सितम् ॥९॥
परिमितिः सुरवाक्पठनार्थिनां प्रतिदिनं तनुतामधिगच्छति ।
सुरगिराऽध्ययनं न हि वृत्तिदं स्थितिरियं नितरां भयकारिणी ॥१०॥
स्थितिरियं प्रचलेद् यदि भारते सुरगिरोऽपि च भारतसंस्कृतेः ।
कतिपयेषु शतेषु गतेषु वै स्मृतिपथातिथिरेव कथा भवेत् ॥११॥

सुरगिराविषये शतकावधिर्गतिरियं भविता यदि भारते ।
शशविषाणखपुष्पसुदुर्लभा नियतमेव हि संस्कृतशिक्षकाः ॥१२॥
विकटभीषणदारुणसंस्थितिं सुरगिरः परिवर्तयितुं बुधैः ।
किमपि सारमयं समये सति ननु समाचरणीयमहो द्रुतम् ॥१३॥
सुरगिरो नवशिक्षणपद्धतौ पठनपाठनसंगतसंविधाम् ।
रचयितुं जनतांत्रिकशासनं नियतमेव नियोज्यमिहाग्रगैः ॥१४॥
अपि च तेन समं जनमानसे सुरगिरां प्रति गाढतमां रतिम् ।
जनयितुं जनमानसबोधनं भवति कार्यवरं शिविरादिभिः ॥१५॥
भरतवर्षजना यदि गौरवं सुरगिरः स्वयमेव विदन्ति चेत् ।
जनसमीहितमाचरितुं तदा भवति बद्धरतिर्जनशासनम् ॥१६॥
स्वयमतीव सुशिक्षितपण्डितान् गणयतोऽपि च पश्चिमदिङ्मुखान् ।
स्वगतगौरवविस्मृतभारतान् विरचनीयमहो सुरवाङ्मुखान् ॥१७॥
नहि भवामि कविर्न च लेखकः सुकविपादकुशेशयषट्पदः ।
मधुसुगन्धविलोभितचेतसा कलरवं वितनोमि क्वचित्क्वचित् ॥१८॥
मम नतोन्नतरूक्षपदावलिर्यदि भवद्रुचये समभूत्तदा ।
भवति तत्रभवद्गुणगृह्यता गुणलवा हि यया गुरुतां गताः ॥१९॥
इति निवेद्य हृदान्तरभाविकं विनयभावभरानतमानसः ।
हरिपदोत्तरचन्द्रपदाह्वयः समभिवन्द्य पुनर्विरमाम्यहम् ॥२०॥

२९-९-१९८६

प्रा० हरिश्चन्द्र रेणापुरकरः
साहूबिल्डिंग, ऐवानशाही रोड, गुलवर्गा (कर्नाटक)

(२)

रमारमण हे रमाकान्त ! ते प्राप्तं संस्कृतपत्रम्,
यत्पाठं पाठं प्रमोदते बहु मे मनः पवित्रम् ।

भारतजनताहं तव सरला सरसा संस्कृतकविता,
देश-प्रेमभावनाप्रधानैर्ललितपदैर्या लसिता ॥

डा० रामकिशोर मिश्रः
संस्कृत विभागाध्यक्षः
महामनामालवीय डिग्री कालेजः, खेकड़ा (मेरठ) -२०११०१

१२.९.१९८६

कविकुलगुरुवाणी

(डा० बच्चूलाल अवस्थी "ज्ञानम्," कालिदास-अकादमी,
उज्जयिनी, म० प्र०)

शिरीषस्योन्मेषो निमिषति[1] निमेषैरनुपदं
निदाघान्ते यान्ति प्रसवविलयं पाटलकुटा[2]:।
निकोचः पद्मिन्या गगनमणि-निम्लोच[2]-नियतो
निशीथे सोल्लासो विचकिल[3]-विकासो न दिवसे ॥१॥

पयोधीन् धन्वत्वं नयति चतुरस्रत्वमचलान्
क्षणात् तोकाल्लोकाञ्जनयति परिभ्रेषयति च।
अयं कालो व्यालो दशति दहति प्रोथनिपुणः
कणः कः स्थेमानं प्रवहति नदेऽस्मिन् गृह्यते ॥२॥

वयः शम्पाकम्पं विरचयति झम्पं तनुमुदां
जरा जोषं मानैः सह तरुणिमानं निगिलति।
विलासानां तर्षो न च मनसि हर्षं लगयते
लवान् वर्षं वर्षं मदनघनकूटो विगलति ॥३॥

अधिगतपरभागा:[4] सर्वभावा अखर्वा-
स्तरुणलवणिमान प्रीतिराशीभवन्तः।
कविकुलगुरुवाणी-शेवधावेधमाना-
श्चिरमहिमनि भूयो ब्रह्मभूयं भजन्ति ॥४॥

○

मनाक् स्पर्शो यस्य[1] द्रुतममदयद् गात्रमखिलं
स एवायं पाणिर्न च पुलकलेशं वितरति।
रसो वाचा शेषः प्रथयति विशेषं न रहसि
प्रियेयं माया वा भ्रमयति परिस्तम्भयति च ॥५॥

नतास्त्रं नो सूते नयनयुगली हेतिनिकरं
तुलानामोन्नामं भ्रुकुटिरपि चित्रं न तनुते।
अरालेयं पाली कपटपटिमानं रहयति
स्फुरत् स्मेरं ह्रीणं वदनमधुना दून[1]-वचनम् ॥६॥

अशश्वत्त्वं शश्वत् प्रभवति दुरन्तं प्रतिभयं[६]
प्रतीभासप्रख्यं जगदिति विदुर्लोकविदुराः ।
परीवर्तावर्ते पिपतिषति गर्ते प्लव[७] इव
प्रतीतिः प्रीतिर्वा क्षितिजकलनेव प्रसरति ॥७॥

अत्र ब्रूते कविकुलगुरुः कालिदासः कृतान्तं[८]
यन्निस्तन्द्रः क्षणकणमभिव्याप्य लेलायमानः[९] ।
मीलोन्मीलामय-लिपि-कला-खेलनः सर्वतन्त्रः
स्पन्दं स्पन्दं प्रतिविवृणुते[१०] नन्वसावष्टमूर्तिः ॥८॥

O

सरव्याः सीव्यन्ती सिकतिल[३]-तटान् व्रीहिनिवहै-
रुदारं दीव्यन्ती क्षुभितपुटभेदै[११] र्जलनिधेः ।
यथावस्थं कूटान् समवघटयन्ती हिमवतां
प्रतिस्वं रोदस्योः पथि विदधती दृश्यगणनम् ॥९॥

अपाङ्गव्यासङ्गात् क्वचिदवनताङ्ग्या विलसति
प्रपञ्चातिक्रान्तात् क्वचिदुदयते तापसकुलात् ।
क्वचिद् भागीरथ्याः स्फुरति लहरीलास्यललना
यतस्त्या तत्रत्या कविकुलगुरोर्वाग् विभवति ॥१०॥

अपर्णेवाऽऽनम्रा व्रतकलितकम्रा कुलवती
महाकाल-प्रास[१२]-प्रसित-शितधारा-शिखरिणी ।
वहन्ती गम्भीरा फलित-हरसिद्धिः सुकृतिनां
जिताक्षेपं क्षिप्रा जयति वचसामुज्जयिनिका ॥११॥

अतिद्वन्द्वः कन्दः सुरधुनिजनीनां जलरुहां
सुधास्यन्दः सान्द्रप्रणयमकरन्दः सुमनसाम् ।
सदानन्दस्पन्दः सकलविभवायाः परचितो
वचोभूमा भूमौ भविकमनिशं संकलयतु ॥१२॥

टिप्पणी—

१. तरवः, २. अस्तमयः, ३. मल्लिका, ४. काष्ठा, परावधिः, ५. सक्लेश, ६. भयानकम्, ७. मण्डूकः, ८. सिद्धान्तम्, ९. लेला दीप्तौ, १०. प्रत्यक्तया विवृणोति, ११. आवर्तैः, २१. शूलमनुप्रासश्च ।

पं० रामशरणशास्त्रिकृत-
कौमुदीकथाकल्लोलिनी–समीक्षणम्

(पं० चन्द्रभानु त्रिपाठी एम०ए०, डी०फिल्०, व्याकरण-साहित्याचार्यः
प्रयागस्थगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठे शास्त्रचूडामणिपण्डितः)

अनादिनिधनाक्षरब्रह्मोपासकस्य विद्याचणस्य कश्यपगोत्रजस्य बहुपाठिनोऽपि त्रिपाठिनो रामशरणस्य जन्म भारतवर्षीयोत्तरप्रदेश-राज्यस्य बांदाजनपदान्तर्गतेऽनुयमुनं मरका ग्रामे ३० दिसम्बर १९०८ ख्रीष्टाब्देऽभवत् । अस्य पूर्वपुरुषाः कान्यकुब्ज (कन्नौज) देशात् परमारवंश्यानां क्षत्रियाणां भक्तिं पुरस्कृत्य तैरेव सहात्रागमन् । अस्मिन्नेव ज्ञानतपःपूते कुले श्रीगिरिधारीत्रिपाठी सरस्वतीप्रसाद-रूपमिमं पुत्रत्वेन प्राप्तवान् । अस्याग्रजः श्रीमुक्तादत्तोऽपि संस्कृत-विद्यापारङ्गत आसीत् । तस्य प्रथमगुरोरग्रजस्य चरणयोः समीपेऽध्ययनं विधायाधिकां प्रौढिं प्राप्तुम्, जौनपुर-जनपदान्तर्गत-'उकनी' ग्रामस्थे संकृत-विद्यालये प्राचार्यवर्यस्य श्रीयुतजयदेवशर्मणोऽन्तेवासित्वं प्राप्य, व्याकरण-न्याय-वेदान्तानामाकरग्रन्थेषु वादग्रन्थेषु च प्रावीण्य-मलभत । उभयोरपि स्मरणम् अनेन प्रणतिपूर्वकम् कृतम् । यथा —

नन्नमेह भ्रात्रे ममाद्यगुरवे श्रीमुक्तादत्तविदुषे स्तात् ।[1]
नन्नमेह पाणिनये गुरुवे श्रीजयदेवमणये चापि ।[2]

महापण्डितेन त्रिपाठिवर्येण वंगराजकीया काव्यतीर्थपरीक्षा, पञ्चनददेशीया शास्त्री परीक्षा चोभे ससम्मानम् उत्तीर्णे । तदनन्तरम् हिन्दी-संस्कृतसाहित्ययोः एम०ए० परीक्षामुत्तीर्य ब्रह्मसूत्रप्रमुखभाष्य-पञ्चक समीक्षणाख्यं शोधप्रबन्धं प्रास्तोत्, पीएच०डी० इति पदव्या समलङ्क्रियत च ।

अध्ययनपरायणेनेवानेन महाविदुषाऽध्यापनवृत्तिनाऽप्यभावि । प्रारम्भे कतिपयवर्षाणि सीतापति-चरणचिह्नाङ्कितचित्रकूटस्थे

श्रीराम-नाम-संस्कृतमहाविद्यालयेऽध्यापनं कृत्वा शास्त्रिवर्योऽयं क्रमशः लाहौरस्थे सनातनधर्मकालेजे, आगरास्थे राधास्वामीशिक्षासंस्थाने, तदनन्तरं मुरादाबादस्थे के०जी०के० कालेजे च संस्कृत-विभागाध्यक्षपदं समलमकुरुत। इयत्कालावधौ गुरुवर्येणानेनाध्याप्य कृतसंस्कारा अनेके कृतविद्याः शिष्याः स्वविद्यागुरोः वंशवृक्षं सफलं कुर्वाणाः दीपात् प्रवर्तिता दीपा इव प्रकाशन्ते प्रकाशयन्ति चार्थान्। तेषु त्रयः साम्प्रतं भारतवर्षस्य त्रिषु विश्वविद्यालयेषु (पंजाब-काशी-गढ़वालस्थेषु) संस्कृत-विभागाध्यक्षपदं सुशोभयन्ति।

भगवत्परायणस्य धैर्यधनस्य स्वावलम्बसबलस्य रामशरणस्य रामदासीत्यन्वर्थाख्या धर्मपत्नी दाम्पत्यजीवनस्याष्टवर्षाण्येवानेन सह चरित्वा परमेश्वरेच्छया स्वस्नेहस्य, सौभाग्यस्य, श्रद्धायाश्च मूर्त्तरूपास्तिस्रः सन्ततीः (द्वौ पुत्रौ, एकां कन्यकां च) एतस्मै समर्प्य भूयोऽप्येनम् प्राप्तुमन्तकस्यातिथ्यं स्वीकृतवती। अन्तर्भूतघनव्यथोऽयं महानुभावस्तया समर्पितासु तत्प्रतिमाभूतास्वासु पितृत्वमिव मातृत्वमप्यतनुत। तेनावाप्तपितृप्रीतिसन्ततिरेषा सन्ततित्रयी वितनोति श्रद्धाविश्वासात्मनोः वैकुण्ठवासिनोः पित्रोः परमाम् मुदम्। सुतयोर्ज्येष्ठः श्रीयुतगयाचरणः पितुरेव समस्तसंस्कृतवाङ्मयमधीत्याधीती प्राच्यपाश्चात्त्यविद्याभेदेषु देशविदेशयोर्विश्वविद्यालयेषु तन्वानः पैतृकीमध्यापनपरम्परां प्रयागस्थगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठे प्राचार्यपदं भजते। कनिष्ठः श्रीयुतरमाचरणः प्रयागविश्वविद्यालय एव प्रोपाध्यायः (प्रोफेसर) वर्त्तते। एवम् सौभाग्यवती अर्पणाभिधेया सुताऽपि काश्यां श्रीवसन्तकन्यामहाविद्यालये मनोविज्ञानविषये 'प्रवक्तृ' पदम् अलङ्कुरुते। इति विद्यया वपुषा चोद्भूता महाविदुषोऽस्य वंश्यावली सततमेधमाना वर्तते। जीवनस्य तृतीयाश्रमे वर्त्तमानेन प्रयागमधिवसता, संस्कृतवाङ्मयस्य विविधान् ग्रन्थांश्चावर्त्तयता 'यावज्जीवमधीते विप्रः'— इति ब्राह्मणधर्मं चरितार्थयता च महापण्डितेन ४ दिसम्बर १९७७ ख्रीष्टाब्दे शब्दब्रह्मणः सायुज्यमवापि।

एतदतिरिक्तं पण्डितप्रकाण्डेनानेन रचिताः, टीकिताः शोधविषयीकृताश्चेमे ग्रन्था: अस्याक्षुण्णामक्षय्याञ्च कीर्तिमावहन्ति। ग्रन्थप्रणयन क्रमप्रदर्शनाय कोष्ठके तेषां प्रकाशनख्रीष्टाब्दोऽपि दीयते—१. सरल-ज्योतिर्विज्ञानम् (१९३९,) २. रचनानुवादरत्नाकरः (१९५२), ३. वेदान्तसारः भावबोधिनीहिन्दी-संस्कृतटीकासहितः (१९५२),

४. कौमुदीकथाकल्लोलिनी (१९६१), ५. ब्रह्मसूत्रप्रमुखभाष्यपंचकसमीक्षणम् (१९७२) त्रयोऽप्रकाशिताः ग्रन्थाः सन्ति—१. मुक्तावली बालबोधिनीव्याख्यासहिता २. सिद्धान्तादर्शः ३. सिद्धान्तकौमुद्याः राजीवलोचनी व्याख्या। प्रस्तुते निबन्धे कौमुदीकथाकल्लोलिनीग्रन्थस्य समीक्षणं क्रियते।

सुकुमारमतयश्छात्राः काठिन्यमनुभवन्तो व्याकरणाध्ययने न प्रवर्तन्ते, इति हेतोः काव्यद्वारा तांस्तत्र प्रवर्त्तयितुं कतिपयैः पूर्वसूरिभिः प्रयतितम्। तेषु रावणवधकाव्यकारो भट्टिः मूर्धानमधितिष्ठति। इदं काव्यम् अष्टाध्यायीसूत्रसरणिमनुरुद्ध्य कृतम्। साम्प्रतम् अध्ययनाध्यापन-परम्परायां श्रीमद्भट्टोजिदीक्षितकृतायाः वैयाकरणसिद्धान्तकौमुद्याः प्रचारो जातः अतः कौमुदीपद्धत्या स्वल्पायासेन व्याकरणज्ञानार्थं गद्यकाव्यस्यास्य रचना श्रीमता वैयाकरणाग्रगण्येनाचार्यवर्येण कृता। अस्मिन् ग्रन्थे गुणाढ्येन कृतायाः वृहत्कथायाः नरवाहनदत्ताभिषेकावधिः कथांशो यथास्थानं संक्षिप्य परिवर्त्य चाश्रितः। ग्रन्थस्य रचना पञ्चभिर्वर्षैर्जातेति महाकविः स्वयमुल्लिखितवान् ग्रन्थस्य समाप्तौ :

नरवाहनदत्तस्य साभिषेकावधिर्मया।
कौमुद्युद्योतमालम्ब्य समाभिः पंचभिः कृता॥

कौमुद्याः पद्धतिमनुसरन् ग्रन्थकारोऽत्रापि आदौ मध्ये समाप्तौ च मङ्गलमाचरितवान्। ग्रन्थस्य कल्लोलाख्येष्वेकादशाध्यायेषु, प्रथमे पञ्च कल्लोलाः पूर्वार्धभागस्यावशिष्टाः षट् कल्लोलाः उत्तरार्धभागस्येति समासस्य स्त्रीप्रत्ययानां च, चतुर्थे अवशिष्टसमासस्य तद्धितानाञ्चाथ पञ्चमे तद्धितप्रत्ययानामुदाहरणनि विशेषरूपेणोल्लिखितानि। पश्चार्धे षष्ठादिष्वेकादशान्तेषु कल्लोलेषु भ्वादिनवगणी, णिजादि प्रक्रियाः, कण्ड्वादि प्रत्ययाः, पद-वाक्य-लकारार्थाः, प्रकीर्णकप्रत्ययाः, तथा कृत्प्रत्ययाः इत्येतदन्तानि पदानि विशेषणोद्धृतानि सन्ति। एवमेतेषु कल्लोलेषु प्रथमे द्वितीयस्य द्वि पञ्चमांशं यावच्च वररुचिगुणाढ्ययोर्वृत्तान्तो वर्णित। तदनन्तरमासमाप्ति नरवाहनदत्तस्य जन्मारभ्य तदीयाभिषेकावधिः कथांशो नैपुण्येन निबद्धो वर्त्तते। एवं कथानकानामवलम्बनेन किञ्चिदेव परिवर्त्योणादिरहितानां कौमुदीप्रकरणसूत्राणामुदाहरणानि प्रदर्शितानि। धातुविषयके षष्ठे कल्लोले धातूनां नामान्येवोद्धृतानि एवम् सर्वतसाधारणबोध-

गम्यतया षड्लिङ्ग प्रकरणमपि न पृथग् विहितम्। उणादिप्रत्ययाः अपि महर्षिपाणिनिना नोल्लिखिता इति तेषां पृथगुल्लेखो न कृतः। छात्राणामध्यापकानां च सौकर्याय पादटिप्पण्यां प्राकरणिकानां सूत्राणां सितसीसाक्षरैः (White Types) अप्राकरणिकानां च तेषामसितसीसाक्षरैश्च (Black Types) मुद्रणं कारितम्। तेनोदाहरणेषूभयेषामपि सूत्राणां प्रवृत्तेर्ज्ञानं भवति।

रसभाववत्याः पाठकस्य हृदयमावर्जयन्त्याः एतस्याः कथायाः साहाय्येन शब्दशास्त्रमधीयानश्छात्रवर्गः कल्लोलेषु क्रीडन् पक्षिसंघात इव सततं मोदमानः शब्दरत्नादि च चिन्वानः व्याकरणविद्यानद्याः पारं गच्छति। अत एवायं ग्रन्थो न गम्भीरतमो व्याकरणमहोदधिरपितु वैयाकरणसिद्धान्तकौमुदीव पाठकान् सदा प्रसादयन्तीं मधुरपेयजला सुखस्पर्शकल्लोला कल्लोलिनीवान्वर्थनामधेयः कौमुदीकथाकल्लोलिनीति। एवं सर्वसाधारणावगाहनायास्याः कल्लोलिन्या अवताराय राजर्षिभगीरथमिव तपश्चरितवन्तमिमं महाभागं मन्ये। कल्लोलिन्यामवगाहनीयशब्दराशौ विरोधाभास-श्लेष-यमकालङ्काररूपा आवर्त्ता अपि सन्ति, येषु जातुचित् अध्येतारो मा खिद्यन्तु इति बुद्ध्या सा तदीयतनुजनुषा क्लिष्टांशानां व्याख्यां कृत्वा सुनाव्या विहिता। प्रसङ्गतः कथायां सूत्रोदाहरणेषु वा गिरि-वन-नदी-धन्य-पुष्प-फल-पक्षिप्रभृतीनामुल्लेखेन विद्यार्थिनां सामान्यज्ञास्य वृद्धिरपि भवति।

यथोक्तं पूर्वमेव शब्दचणोऽयं महापण्डितः शब्दप्रयोगेऽपि कुशलोऽभवत्। दीपतुल्योऽयं प्रबन्धग्रन्थः स्वपरप्रकाशने सर्वथा समर्थोऽस्ति। कथमनेन कथाप्रवाहं संरक्षता, भाषामाधुर्यं चापरित्यजता व्याकरणोदाहरणानि दत्तानीति कतिपयैरुदाहरणैः स्पष्टीक्रियते -

सा साग्रहम् अनुनाथितवती भगवन्तं सुद्ध्युपास्यं भवम्...। एकदा ब्रह्मा मध्वरिश्च[3] मनोऽनुरञ्जयञ्छम्भुश्चिरमुवास[4]।

व्याकरणस्यानेकेषां विविधानाम् प्रयोगाणाम् प्रदर्शनमिति ग्रन्थप्रणयनस्य मुख्यो हेतुः। मध्ये मध्ये साहित्यिकगुणानां संचारादस्य कामनीयं वर्धतेतराम्। यथा—स्वौन्नत्यगौरवाधरीकृतापरधराधरः धराधरेन्द्रः सिद्धगणगणनीयमहिमवान् हिमवान्[5]! अस्मिन् वाक्ये स्वौन्नत्य (स्व+औन्नत्य) गौरवाधरी (गौरव+अधरी) कृतापर (कृत+अपर) धरेन्द्रः (धरा+इन्द्र) इति चत्वारः कृतसन्धिप्रयोगाः सन्ति। ग्रन्थकर्तु विशेषनिर्देशः स्वौन्नत्यपदे एवास्ति। अत्रानुप्रास-

यमकालङ्कारयोश्छटा सविशेषं हृदयमावर्जयति । तथैव, ···विशालमपि विशालम् विच्छायमपि अविच्छायम् शरणमपि अशरणाशरणम् · वर्षगृहमपश्याव[६] । इत्यैतादृशेषु वाक्येषु विरोधाभासालङ्कारस्य सुष्ठुप्रयोगो दृश्यते। अत्रैवाग्रे दरिद्रद्देवेद्र्यङ् द्विजःदारिद्र्यदारिद्र्यः इति सानुप्रासान् दरिद्रा धातोर्भिन्नप्रयोगान् कुर्वाणस्यास्य कौशलं वैदुष्यं च सुस्पष्टं भवति ।[७]

अस्माद् ग्रन्थात् कतिपयानि पदान्युद्धृत्यास्य विद्वत्तल्लजस्य शब्दनिर्माणशक्तिम्, शब्दकोषज्ञानम् प्रयोगपाटवं च प्रदर्श्यंते- बुभुक्षावानः[८] (बुभुक्षा ओणृ+वनिप्) उचेलिमम्[९] (वच्+केलिमर्) कीर्तिपार्थिवः[१०] (शाकपार्थिववदुत्तरपदलोपी समासः) । प्रत्ययततिं प्रयुज्य पदरचनाया उदाहरणमेकमिदं वर्त्तते-चेक्रीयिषयिषवः (कृ+यङ्+सन्+णिच्+सन्+उ)। केचन प्रयोगाः व्याख्यानं विना दुर्बोधा प्रतीयन्ते । यथा—शिक्षयमाणो गन्धर्वविद्यां त्वमेनकां मे न कां भूतिं समवाप्स्यसि[११] । अत्र प्रयोगे एनाम् इत्यस्मात् पदात् स्वार्थे अकच् प्रत्ययं विधाय यमकमाधुरी प्रत्यानीता । एवमेव अनादीनवमपि जनं नवादीनवं कुर्वन्ति[१२] । मस्करिणां नमस्करिणां भूरपि द्विषन्निरङ्-कुशकरिणां भूः[13] । इत्यादयः प्रयोगाः ज्ञेयाः । एतेषामर्थावबोधाय व्याख्यानमपेक्ष्यते । कल्लोलिनीग्रन्थस्यावगाहनेनेदं सुस्पष्टं भवति यद्व्याकरणस्य प्रयोगानां प्रदर्शने कृतमनोयोगोऽपि महापण्डितः कदाचित् कल्लोलेषु आमूलचूलं निमग्नो जातः येनास्य लेखनी साहित्य-रसमाधुरीं प्रवाहितवतीव दृश्यते । यथा अविरलगलन्मधुमञ्जरीगुञ्जपिञ्जरितसरससहकारवननिकुञ्जपुञ्जितपक्षिकुलकलरवरमणीये क्रीडोद्याने···[१४]।

अत्र व्याकरणविषयकाः केऽपि विशिष्टाः प्रयोगाः न सन्ति। काव्यगतमेव लावण्यमत्र दर्शनीयम् । शब्दरचनाचातुरीं प्रदर्शयितुमेकमुदाहरणं दीयते—अपि दद्यात् दयोदन्वान् दीननाथो दीनाया मे दयमानो दयितेन मदीयेन सङ्गतिम्[१५] । अत्र प्रयोगेषु दकारस्यासकृदावृत्त्या समृद्धतमः शब्दकोषोऽस्याचार्यस्य प्रतीयते । आश्रमस्य वर्णने साहित्यिकशिरोमणिना वैयाकरणचूडामणिनाऽनेन एकोनाशीतिस्तद्धितान्तानि विशेषणानि प्रयुक्तानि[१६] । एवं सोमप्रभजन्मोत्सवे विंशतिः खाद्यपदार्थाः समुल्लिखिताः सन्ति[१७] । शुकसारिकयोः वार्तायां स्त्रीणां स्वभावो वर्णितः[१८] । मृगाङ्कदत्तस्य गुणानां वर्णने पंचत्रिंशत्

क्रियाः प्रयुक्ताः[१९] ।

एवं इदं सुष्ठु कथयितुं शक्यते यदियं कौमुदीकथाकल्लोलिनी वैयाकरणमहाकवेरस्य कीर्तिकथां स्मारयति । सर्वथाऽस्यामवगाहनात् अध्येतारः मधुरं शब्दवारि पास्यन्तीति व्याकरणशिक्षाप्रदस्य काव्यस्यास्य संक्षिप्तां समापनीयां समीक्षणाख्यामार्याद्वयेन कुर्वे—

कौमुदीव सुखगाह्या व्याकरणसूत्रोदाहरणसंयुक्ता ।
भावतरङ्गेष्वस्याः प्रवाहितः सुधी जनो भवति ॥
शब्दार्णवं दुस्तरं मत्वाऽवगाहन्ते न ये छात्राः ।
सरसशब्दजलराशिः कथाकल्लोलिनी तेभ्योऽपि ॥

---

१. कौमुदीकथाकल्लोलिनी, पृष्ठ-३५०

२. कौमुदीकथाकल्लोलिनी, पृष्ठ-१६३

३. 'इको यणचि' इति सूत्रोदाहणे, पृष्ठ-१-२

४. अत्र 'शितुक्' 'स्तोःश्चुनाश्चुः, 'शश्छोऽटि,' 'झरो झरि सवर्णे' इति सूत्रचतुष्टयस्य प्रवृत्तिर्भवति । पृष्ठ-३

५. पृष्ठ-१, ६. पृष्ठ-६, ७. पृष्ठ-३० ८. पृष्ठ-६३ ९. पृष्ठ-६२
१०. पृष्ठ-२६२, ११. पृष्ठ-४ , १२. पृष्ठ-९६, १३. पृष्ठ-१०८
१४. पृष्ठ-१०९, १५. पृष्ठ-११४, १६. पृष्ठ-१७३-१७५, १७. पृष्ठ-१८०,
१८. पृष्ठ-२६६-६७, १९. पृष्ठ-२८९ ।

श्रीगरुडध्वजशतकम्

प्रणेता :

डा० रामकिशोर मिश्रः

एम०ए०, पीएच०डी०

संस्कृत-विभागाध्यक्ष:

श्री महामना मालवीय डिग्री कालेज

खेकड़ा (मेरठ)

श्रीरामकिशोरमिश्रप्रणीतम्

श्रीगरुडध्वजशतकम्

।। तस्मै नमो भगवते गरुडध्वजाय ।।

(१)

विष्णुं रमारमणमच्युतमादिदेवम्, विश्वम्भरं सलिलशायिनमादिवन्द्यम्।
वन्दे वसन्ततिलकेन तु छन्दसा यम्, तस्मै नमो भगवते गरुडध्वजाय ॥

(२)

विष्णुस्तवं कुरु हि लेखनि! सावतारम्, श्रीमानदृश्य इह योऽस्त्यवतारदृश्यः।
गृह्णाति यः स्वजननं जगतीहिताय, तस्मै नमो भगवते गरुडध्वजाय ॥

(३)

पीताम्बरं कमलनाभमुपेन्द्रदेवम्, नारायणं प्रियसुरं कमलाधवं च।
वैकुण्ठनाथमधुना यमहं स्मरामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(४)

दैत्यारये भुवि नमः पुरुषोत्तमाय पद्माधवाय दिवि वा नरकन्तकाय।
प्राचीनयज्ञपुरुषाय जनार्दनाय तस्मै नमो भगवते गरुडध्वजाय ॥

(५)

पीयूषपानमिह सागरमन्थनात्तम् यः प्राविशत्सुरगणेष्वसुरो हि कर्तुम्।
चक्रेण तस्य किल शीर्षमखण्डयद्यः, तस्मै नमो भगवते गरुडध्वजाय ॥

(६)

उच्चैश्श्रवाश्च तुरगः सजवः समुद्रात्, लक्ष्मीश्च कौस्तुभमणिश्च हि येन लब्धाः।
सिन्धौ च यस्य वितता त्वहिशेषशय्या, तस्मै नमो भगवते गरुडध्वजाय ॥

(७)

इन्द्रानुजं भुजगशायिनमादिपूज्यम्, लक्ष्मीपतिं जलधिजारमणं रमेशम्।
देवेन्द्रदेवमधुना यमहं भजामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(८)

विष्वग्बलाय जगतीपतयेऽच्युताय विश्वम्भराय भुवि नित्यमधोक्षजाय ।
पीताम्बराय हरये च चतुर्भुजाय तस्मै नमो भगवते गरुडध्वजाय ॥

(९)

नारायणो जलधिवासकरः स विष्णुः श्रुत्वाऽऽर्तनादमुदधौ करिणो गतस्तम् ।
ग्राहं च यस्तमवधीद् गजमुक्तिदाता, तस्मै नमो भगवते गरुडध्वजाय ॥

(१०)

रामावतारमुपगम्य स लोकभूत्यै दैत्यान् जघान खरदूषणरावणादीन् ।
यं रावणारिमधुना शरणं व्रजामि तस्मै नमो भगवते गरुडध्वजाय ॥

(११)

यो द्वापरे तदनु गोपवरेशकृष्णः कंसं जघान जगतीसुखकारणाय ।
यं कंसशत्रुमधुना मनसा स्मरामि तस्मै नमो भगवते गरुडध्वजाय ॥

(१२)

देवाय सर्वविधपापभयापहाय सर्वाय सर्वविधमङ्गलसौख्यदाय ।
भक्तस्य सर्वविधकीर्तिविवर्धकाय तस्मै नमो भगवते गरुडध्वजाय ॥

(१३)

प्रचीनमादिपुरुषं मुरमर्दनं च श्रीवत्सलाञ्छनमहं पुरुषोत्तमं यम् ।
हर्षेण काव्यविधिना परिवर्णयामि तस्मै नमो भगवते गरुडध्वजाय ॥

(१४)

लोकादिपालकवरं नरकान्तकं च दैत्यारि शौरि-वनमालिपदावगम्यम् ।
दामोदरं यमधुना मनसा भजामि तस्मै नमो भगवते गरुडध्वजाय ॥

(१५)

श्वेताम्बराय बहुरूपविभाधराय लोकेश्वराय च निशाचरनाशकाय ।
नारायणाय गगनाभशरीरकाय तस्मै नमो भगवते गरुडध्वजाय ॥

(१६)

शार्ङ्गी स्वभूर्मधुरिपुस्त्रिपराक्रमश्च श्रीशश्चतुर्भुज इह प्रभुचक्रपाणिः ।
नामानि यस्य जगति प्रथितानि सन्ति, तस्मै नमो भगवते गरुडध्वजाय ॥

(१७)

गोविन्द-माधव-जनार्दननामसेव्यम्, तं विष्टरश्रवसमर्चति काव्यकर्ता।
संसाररूपमिह यं शरणं प्रपद्ये, तस्मै नमो भगवते गरुडध्वजाय॥

(१८)

दामोदराय हरये वनमालिने च कंसारये च बलिने मधुसूदनाय।
श्रीशाय कैटभजिते बलिनाशकाय तस्मै नमो भगवते गरुडध्वजाय॥

(१९)

शौरिं महामि च हरिं तमनादिदेवम्, श्रीकेशवं च महनीयमुकुन्दमीशम्।
भक्तप्रियं यमृषिकेशमहं नमामि तस्मै नमो भगवते गरुडध्वजाय॥

(२०)

भक्तं स रक्षति सदा विकृतिं च दृष्ट्वा तन्नारदाय कपिरूपमदाद् दयालुः।
यं भक्तरक्षकमहं मनसा भजामि, तस्मै नमो भगवते गरुडध्वजाय॥

(२१)

पूताय पूतपुरुषाय महास्वनाय सत्याय सर्वविधयोगविनिस्सृताय।
सिद्धिप्रदाय नरसत्यपराक्रमाय तस्मै नमो भगवते गरुडध्वजाय॥

(२२)

संकीर्तयस्व रसने! प्रभुनामराशिम्, विष्णो! त्वमेव भगवान् करुणाकरोऽसि।
त्राता भवस्य भुवनेऽस्ति जनार्दनो यस्तस्मै नमो भगवते गरुडध्वजाय॥

(२३)

श्रीमन्! सरोजति यदा तव पाणिपादं, तस्मिन्मिलिन्दति तदाऽत्र मनो मदीयम्
यं पद्मपादमधुना मनसा स्मरामि तस्मै नमो भगवते गरुडध्वजाय॥

(२४)

धर्मस्य हानिरभवद् भुवि यत्र तत्र दुष्टान् स हन्तुमकरोदवतारमत्र।
यं विष्णुदेवमधुना हृदये करोमि, तस्मै नमो भगवते गरुडध्वजाय॥

(२५)

भस्मासुरं खलपतिं विनिहन्तुमीशो विष्णुर्हरिः स भगवान् जगतीहिताय।
स्वीयं च यो विहितवान् रमणीयरूपम्, तस्मै नमो भगवते गरुडध्वजाय॥

(२६)

श्रीशाय सद्ब्रमणसत्यपरायणाय श्रीदाय सद्गतिवराय शताननाय ।
श्रीलाय शान्तिभवनाय सनातनाय तस्मै नमो भगवते गरुडध्वजाय ।।

(२७)

यस्मिन्वसन्ति हि चराचरजीवबीजाः प्रादुर्भवन्ति किल तत्र च जीविनस्ते ।
अन्ते च यत्र निखिला विलयं प्रयान्ति, तस्मै नमो भगवते गरुडध्वजाय ।।

(२८)

ओजोद्युतिं वसुबलं रवितापनं यम्, स्पष्टाक्षरं जगति कीर्तिकरं नमामि ।
ऋद्धं प्रकाशनपरं यमहं स्मरामि, तस्मै नमो भगवते गरुडध्वजाय ।।

(२९)

सोमाय सोमपवराय सुसोमदाय विश्वात्मने प्रणवरूपधृते शमाय ।
स्वस्तीश्वराय नियमाय सुजीवनाय तस्मै नमो भगवते गरुडध्वजाय ।।

(३०)

चित्तं मयूरति सदा मम विश्वबन्धो ! यस्त्वां सुकेकति विभुं जगदादिदेवम् ।
यो गोपतिः सुरपतिर्जगतीपतिश्च तस्मै नमो भगवते गरुडध्वजाय ।।

(३१)

यं श्रीपतिं वसुपतिं धिषणापतिं च पुण्यं पवित्रहृदयं परिपूतकीर्तिम् ।
ब्रह्मण्यदेवमधुना यमहं भजामि, तस्मै नमो भगवते गरुडध्वजाय ।।

(३२)

श्रीभावनाय सुरपूजितविक्रमाय पूर्णाय पूर्णपुरुषाय च पावनाय ।
वीराय दैत्यदनुजादिविनाशकाय तस्मै नमो भगवते गरुडध्वजाय ।।

(३३)

श्रीगर्भ ! भानद ! सुदर्शन ! दैत्यजिष्णो ! सेतुः समस्तजगतोऽसि महाशनस्त्वम् ।
यज्ञोऽस्ति यज्ञपुरुषोऽस्ति महासखो यः, तस्मै नमो भगवते गरुडध्वजाय ।।

(३४)

पूतात्मपूतपुरुषस्त्विह पावनात्मा, भूतात्मभूतभवनो भुवि भूतभर्ता ।
साक्षी प्रधानपुरुषो जगतः सदा यः, तस्मै नमो भगवते गरुडध्वजाय ।।

(३५)

धातासि धातुपुरुषो जगतां विधाता, त्वं पद्मनाभ! परमस्त्वसि विश्वकर्मा।
देवाधिदेवमधुना यमहं श्रयामि, तस्मै नमो भगवते गरुडध्वजाय॥

(३६)

विद्याविदे प्रणवतत्त्वविदे पणाय सत्स्रग्विनेऽखिलकृते रुचिराङ्गदाय।
श्रेष्ठाय धामपतयेऽघविदारणाय तस्मै नमो भगवते गरुडध्वजाय॥

(३७)

बभ्रुं वृषाकृतिमहं जगदादिजं यम्, वन्दे विभुं विधिभजं वसुविश्वयोनिम्।
शर्मा सदा य इह पावनविश्वरेताः, तस्मै नमो भगवते गरुडध्वजाय॥

(३८)

कर्ताऽस्यनादिनिधनः प्रभवः स्वयम्भूः, हर्ताऽसि सर्वजगतो भगवंस्त्वमेव।
वन्दे ध्रुवं स्वहृदि यं प्रभुपुष्कराक्षम्, तस्मै नमो भगवते गरुडध्वजाय॥

(३९)

सम्मोहनाय यमिनां सुरसुन्दराय वाग्मीश्वराय परमाय यतीश्वराय।
लक्ष्मीधराय जलधौ फणिविश्रमाय तस्मै नमो भगवते गरुडध्वजाय॥

(४०)

यश्चात्मवान्प्रणयवाञ्छमवान् दयावान् गीर्वाणवान्सुरथवान् रसवान्रसावान्
संभोगवान् सुरतवान् रयवान् रमावान्, तस्मै नमो भगवते गरुडध्वजाय॥

(४१)

सञ्ज्ञानवन्तमृतवन्तमनादिमन्तम्, श्रीमन्तमैक्यधनवन्तमधैर्यवन्तम्।
कुर्वन्तमन्तमसुरस्य च यं नमामि, तस्मै नमो भगवते गरुडध्वजाय॥

(४२)

लोकेश्वराय जनपापभयापहाय पूतात्मने परमयोगविदां वराय।
भूतादये जननमृत्युविवर्जिताय तस्मै नमो भगवते गरुडध्वजाय॥

(४३)

भूगर्भ! सर्वगवरोऽसि हिरण्यगर्भस्त्वं विक्रमी बहुशिरा असि वत्सरोऽसि।
वेधा महाकृतिकरोऽखिलदर्शनो यस्तस्मै नमो भगवते गरुडध्वजाय॥

(४४)

विश्वाधिपं स्वरधिपं जयसत्यसन्धम्, दाशार्हमक्षरमतीन्द्रियमेकनाथम् ।
श्रीवासमद्य यमहं शरणं प्रपद्ये, तस्मै नमो भगवते गरुडध्वजाय ॥

(४५)

शिल्पादिकर्म विविधं निगमादि सर्वम्, सांख्यंच येन जनितं मतिमान् हि विन्त्ते ।
भूसूर्यचन्द्रखदिशा अपि येन जाताः, तस्मै नमो भगवते गरुडध्वजाय ॥

(४६)

ज्येष्ठं प्रतर्दनवरं प्रभुलोहिताक्षम् ईशानमात्मलबपूजितमात्मशक्तिम् ।
शर्मेश्वरं शरणदं यमहं महामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(४७)

सर्वेश्वराय समसत्यसमाहिताय सर्वादये वसुयमाय कृताकृताय ।
तेजोद्युतिप्रबलभागुणसंग्रहाय तस्मै नमो भगवते गरुडध्वजाय ॥

(४८)

बुद्धिर्मनोधृतिबले च तथेन्द्रियाणि, सत्त्वं सुखं स्मृतिकृतो अपि जन्ममृत्यू ।
आचारधर्मसुकृतानि वशे च यस्य, तस्मै नमो भगवते गरुडध्वजाय ॥

(४९)

सर्गोऽस्ति यो वसुमनाश्च हिरण्यनाभः, शास्ता सहस्रचरणः स सहस्रमूर्धा ।
नाथं नमामि यमहं नरसिंहकायम्, तस्मै नमो भगवते गरुडध्वजाय ॥

(५०)

दुष्टापहाय निमिषाय सुरारिहाय सम्मर्दनाय सुरवंशविवर्धनाय ।
संक्षोभणाय हरये समितिञ्जयाय तस्मै नमो भगवते गरुडध्वजाय ॥

(५१)

रोगा जरा च विभयं च भयं च तेजः, कीर्तियंशस्त्वपयशश्च बलञ्च वीर्यम् ।
भोगाश्च मोक्ष इह यस्य वशे वसन्ति, तस्मै नमो भगवते गरुडध्वजाय ॥

(५२)

भोक्ता सः विश्वरमणीरमणोऽस्त्युपेन्द्रः, संसिद्धिमानमृतपायिवरोऽस्त्यतीन्द्रः ।
भोगेश्वरं यमधुना मनसा भजामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(५३)

संवर्तकाय भुवने रविलोचनाय, संवत्सराय विभवे सुरमोदनाय।
गुह्याय गुप्तपुरुषाय गदाधराय, तस्मै नमो भगवते गरुडध्वजाय॥

(५४)

कालस्वरूपमधिपं जगतः प्रणम्यम्, भर्तारमाधिगणहं पृथुमर्थमाद्यम्।
स्मृत्वा प्रणौमि यमहं प्रभुवेङ्कटेशम्, तस्मै नमो भगवते गरुडध्वजाय॥

(५५)

चक्रेश्वरो दमयिता स सहस्रनेत्रो रक्ताभसूर्यनयनः शिशिरो यतीशः।
यं गोविदां पतिमहं मनसाश्रयामि, तस्मै नमो भगवते गरुडध्वजाय॥

(५६)

लोकात्मने गुरुतमाय सहस्रपादे वेदादिदिव्यगुणभादिसमाहिताय।
धर्मात्मने विविधधर्मविभूषिताय तस्मै नमो भगवते गरुडध्वजाय॥

(५७)

आवर्तनो नरवरः शुचिमानमृत्युः संकल्पवानमृतवानमरार्चितः सः।
ओजोनिधिः श्रुतिनिधिः करुणानिधिर्यः, तस्मै नमो भगवते गरुडध्वजाय॥

(५८)

संसारवन्तमसुमन्तममूर्तिमन्तम्, हेमाङ्गवन्तमघमूर्तिविनाशवन्तम्।
उद्दीप्तिमन्तमधुना यमहं भजामि, तस्मै नमो भगवते गरुडध्वजाय॥

(५९)

सर्वादिमच्युतममोघमनादिमीशम्, दुर्मर्षणं दनुजहं दुरतिक्रमं च।
स्वर्गेश्वरं यमधुना शरणं प्रयामि तस्मै नमो भगवते गरुडध्वजाय॥

(६०)

योगात्मने नयविदे समदर्शिने च, मुक्तात्मने धृतिमते च समीहनाय।
देवाय देवसुहृदे च परिग्रहाय तस्मै नमो भगवते गरुडध्वजाय॥

(६१)

सर्वज्ञमादिपुरुषं हरिमव्ययं यम् जन्मादिबन्धनपरं प्रभुपद्मनाभम्।
भ्राजिष्णुमद्य दमनं हृदयेन नौमि, तस्मै नमो भगवते गरुडध्वजाय॥

(६२)

व्यापी गुरुर्निधिपतिर्जितकोपवत्सो संसारबीजमिति बुद्धिवरैर्य उक्तः ।
त्रातारमद्य यमहं शरणं प्रपद्ये, तस्मै नमो भगवते गरुडध्वजाय ॥

(६३)

तं ज्ञानगम्यमतिविक्रममाधिहीनम्, वन्दे मनोहरवरं कमलामनोज्ञम् ।
अम्भःशरीरमधुना यमहं नमामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(६४)

स्वाङ्गाय सम्मतिमते जगतीकराय वाणीविदे पुरजिते पुरुषोत्तमाय ।
संकर्षणाय कनकाङ्गदिनेऽच्युताय तस्मै नमो भगवते गरुडध्वजाय ॥

(६५)

वृद्धात्म-पद्मि-सुरशूर-महाक्षरूपो देवात्मधुर्य इह पद्मनिभेक्षणोऽसौ ।
वन्दे सुरारिनिधनं यमहं सुरेशम्, तस्मै नमो भगवते गरुडध्वजाय ॥

(६६)

विष्णुं कृताऽकृतविदं सुरशक्तिमन्तम्, प्राणप्रदं क्षमगतिं ऋतुवीरवन्तम् ।
यागेश्वरं त्रिचरणं यमहं श्रयामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(६७)

कालज्ञमीशममरं परमं परर्द्धिम्, पुष्टं पुरन्दरमहार्चनयाऽतितुष्टम् ।
नौमि प्रभुं यमधुना विभुमप्रमत्तम्, तस्मै नमो भगवते गरुडध्वजाय ॥

(६८)

यः सम्प्रमर्दनवरो जगदौषधात्मा, ब्रह्मादिदेवपरिपूजितनैकमायः ।
यं नैकरूपमधुना मनसा स्मरामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(६९)

गुप्तं त्रिविक्रममहं गतिसत्तमं तम्, स्वक्षं महाशमकरं शरणं प्रयामि ।
यं रत्नगर्भमधुना मनसाऽऽश्रयामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(७०)

पीयूषदाय कृतये द्रविणप्रदाय वृक्षाय सर्वजगतः परिरक्षणाय ।
नैकात्मने सुरकृते विजयप्रदाय तस्मै नमो भगवते गरुडध्वजाय ॥

(७१)

संप्रीतिमान् प्रणतिमान् मतिमान् वपुष्मान्,
त्रैलोक्यमान् प्रबलवान् स्यववान् यशस्वान्।
संहर्षवान् युवतिमान् रतिमान् य उक्तः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(७२)

देवार्ह-वेदनयनार्ह-नयार्हनामा, पीयूषदुग्धघृतपूजितपाद आर्यः।
अन्नाद आत्मनययोगबली य ईशस्तस्मै नमो भगवते गरुडध्वजाय ॥

(७३)

गोस्वामिनं जगति धर्मवतामधीशम्, यं पद्मपाणिमघनाशकमादिजीवम्।
श्रीवत्सलाञ्छनमहं हृदये भजामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(७४)

कुन्दाय सम्मतिविदे रिपुतापनाय, ज्योतिष्मते स्वबलरूपगुणान्विताय।
सर्वात्मने बलवतामवतां वराय, तस्मै नमो भगवते गरुडध्वजाय ॥

(७५)

सर्वासुवासमरिनाशकरं यतीशम्, सन्मूर्तिमन्तमणुमन्तमनैक्यवन्तम्।
मान्यं त्रिलोकपतिमद्य च यं श्रयामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(७६)

स्तव्यं स्तवप्रियमनामयमादिभूतम्, स्वङ्गं विभूतिमनघं निखिलाक्षकान्तम्।
लक्ष्मीनिवासमधुना यमहं स्मरामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(७७)

जीवं महान्तमिह धर्मकरं कृतज्ञं, सत्त्वस्थमक्षरमहं सदसत्क्षरं यम्।
देवेशमन्तकवरं मनसा भजामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(७८)

शान्ताय दर्पहननाय सुयामुनाय, तीर्थङ्कराय सुरतन्तुविवर्धनाय।
शून्याय शून्यविभवाय धराधराय तस्मै नमो भगवते गरुडध्वजाय ॥

(७९)

शंखी गदी प्रहरणायुधमोदभोगी, चक्री भुजङ्गशयनः कमलार्चितः सः ।
गोब्राह्मणप्रियमये शरणं यमीशम्, तस्मै नमो भगवते गरुडध्वजाय ॥

(८०)

अक्षोभ्यमीश्वरमहं श्रुतिगायनं यम्, यज्ञान्तकारिणमगुह्यमनात्मगुप्तम् ।
श्रीचक्रपाणिमधुना हृदये स्मरामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(८१)

यो निर्गुणोऽपि सगुणो यदजोऽपि जन्मी, सर्वत्र पूजनवशस्त्ववतारदेवः ।
श्रीकान्तमद्य मनसा यमहं नमामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(८२)

अर्चिष्मते स्तुतिमते सुरभूशयाय, सुश्रीमते जगति शूरजनेश्वराय ।
सत्कीर्तये स्मृतिमते सुकृतागमाय, तस्मै नमो भगवते गरुडध्वजाय ॥

(८३)

ब्रह्मी महास्तुतिवशो जनधर्मतेजाः, वर्णी जयी प्रियकरस्त्वसुरारिमानी ।
स्थूलोऽपि यो गुणनिधिस्त्वणुतोऽपि सूक्ष्मः, तस्मै नमो भगवते गरुडध्वजाय ॥

(८४)

संहारणाय खलदुष्टनिशाचराणां, सन्तापवन्तमरिविक्रमनाशवन्तम् ।
शक्त्या प्रतापगतिमन्तमये कृतीशं, तस्मै नमो भगवते गरुडध्वजाय ॥

(८५)

देवेशदेवमथ नामसहस्रवन्द्यम्, व्यासादिकाव्यपरिकीर्तितनामराशिम् ।
श्रीविष्णुदेवमधुना यमहं स्मरामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(८६)

मान्याय मान्यकृतये त्वपराजिताय, भूस्वामिने जयवते बहुमानदाय ।
धन्याय भक्तजनकार्यविवर्धकाय तस्मै नमो भगवते गरुडध्वजाय ॥

(८७)

शब्दातिगाय बहुशब्दसहाय गोप्त्रे, नेत्रे प्रियाय गहनाय च सर्वभोक्त्रे ।
निर्विण्णमानसपराय पराशनाय तस्मै नमो भगवते गरुडध्वजाय ॥

(८८)

सद्भूतिमन्तमतिदुर्गमदुर्गवन्तम्, सत्कीर्तिमन्तमिह सत्कृतिमानवन्तम्।
देवं नमामि यमहं सुरवंशवन्तम् तस्मै नमो भगवते गरुडध्वजाय ॥

(८९)

चक्रप्रवीणमरुणाभगदाप्रवीणम्, लोकाद्भुतं श्रमणरक्षकमग्रदेवम्।
विद्यानिवासमधुना यमहं श्रयामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(९०)

सिद्धार्थवन्तमयवन्तमहानिमन्तम्, अक्रूरमाप्तशममूर्जितशासनं यम् ।
स्वान्ते विरोचनवरं यमहं नमामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(९१)

रौद्राय भीषणकराय च सर्वहोत्रे, दण्डाय दण्डपुरुषाय महाबलाय।
संन्यासिदण्डविधृते क्षमिणां वराय, तस्मै नमो भगवते गरुडध्वजाय ॥

(९२)

लक्ष्मीश्वरं विलिख लेखनि! नैजकाव्ये विष्णं प्रभुं खलनिशाचरनाशकं तम्।
तेजस्करं यमधुना शरणं व्रजमि, तस्मै नमो भगवते गरुडध्वजाय ॥

(९३)

या कथ्यते सुरगिराऽद्य मृता मनुष्यैः सा भारती तु न मृता ह्यमराऽस्ति, तस्यां
काव्यानि यस्य कृपया कवयो लिखन्ति, तस्मै नमो भगवते गरुडध्वजाय ॥

(९४)

श्रेयस्करं सुतपसं रिपुनाशदक्षम्, यं सन्धिमन्तममृतांशुमदृश्यरूपम्।
श्रीवत्सवक्षसमहं शिरसा नमामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(९५)

स्वास्याय सर्वधनदाय समीरणाय कामाय कामफलदाय च कुन्दराय।
सुन्दाय सुन्दरशरीरविभूषिताय, तस्मै नमो भगवते गरुडध्वजाय ॥

(९६)

देवाग्रणीर्वसुमनाः स च सत्यधर्मा, धन्वी सुघोष इह यो युधि वीरकर्मा।
स्वग्रामणीः सुरमना भवमोक्षमार्गः, तस्मै नमो भगवते गरुडध्वजाय ॥

(९७)

यः पेशलो विनयिता स्वधृतस्त्वचिन्त्यः, दुष्टान् सदा दमयिता गिरिसत्यमेधा ।
क्षामः क्षमो बहुमुखश्च स एकमूर्तिस्तस्मै नमो भगवते गरुडध्वजाय ॥

(९८)

इन्द्रानुजं प्रधिषणाधरमप्रमेयम्, सङ्कल्पदं विनयदं कुमुदं मुकुन्दम् ।
श्रीशं महार्हमधुना यमहं प्रणौमि, तस्मै नमो भगवते गरुडध्वजाय ॥

(९९)

वेद्याय वैद्यपुरुषाय विवीरहाय, श्रीजह्नवे सुरनदीप्रभवप्रदाय ।
क्रोधापहाय शुचये धरणीधराय, तस्मै नमो भगवते गरुडध्वजाय ॥

(१००)

नन्दं सहस्रजितमुत्तरमादिजातम्, विश्राममव्ययमनन्तमयोनिभूतम् ।
यं छिन्नसंशयमहं हृदये धरामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(१०१)

नक्षत्रनेमिरिह यः शुभदास्त्रसामा, कृष्णाङ्ग आत्मविभवः सुरधर्मयूपः ।
यं भूरिदक्षिणमहं मनसा महामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(१०२)

अव्यक्तरूपमजितं ह्यनिरुद्धशक्तिम्, वन्दे प्रजाभवमनन्तजितं स्थविष्ठम् ।
यं शत्रुदारुणमहं शरणं प्रयामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(१०३)

भीमाय भीमकृतये प्रपितामहाय, यज्ञाय यज्ञपतये सुरजीवनाय ।
उत्तारणाय भुवि पावनकीर्तनाय तस्मै नमो भगवते गरुडध्वजाय ॥

(१०४)

स्वस्थानवान् स्वहितवान् भृतिमान् प्रधीमान्,
आचारवान् सुनयवान् भयवान् कृपावान् ।
गोविप्रसाधुहितवान् विबुधैर्य उक्त-
स्तस्मै नमो भगवते गरुडध्वजाय ॥

(१०५)

संघर्षवानरिगणेन समं स युद्धे जेतुं हि तं समरनीतिपथं विकर्ता।
यश्चक्रवान् प्रहरणायुधवान् सुन्धवा, तस्मै नमो भगवते गरुडध्वजाय॥

(१०६)

नक्षत्रिवीरसुमुखं कुवलेशयं तम्, वन्दे महोदधिशयं त्रिपुरारिवन्द्यम्।
यं विश्वरेतसमहं हृदये भजामि, तस्मै नमो भगवते गरुडध्वजाय॥

(१०७)

श्रीरोहिताय जगते कृतलक्षणाय, व्योमाङ्गभाय सहयोगकृते सहाय।
साध्वात्मने सुरमहातपसां वराय, तस्मै नमो भगवते गरुडध्वजाय॥

(१०८)

त्वष्टारमादिजनकं जगतः सुघोषम्, स्वाभाव्यभक्तजनचञ्चलताविरामम्।
यं मेदिनीपतिमहं शरणं प्रपद्ये, तस्मै नमो भगवते गरुडध्वजाय॥

(१०९)

नित्यं नमामि पुरतो यमहं स्वभक्त्या, रामः स यत्र मुनियोगिवरा रमन्ते।
यं रामदेवमधुना हृदये भजामि, तस्मै नमो भगवते गरुडध्वजाय॥

(११०)

गीतावचस्त्वनुसरन् भगवान् स कृष्णः दुष्टान् हनिष्यति कलाववतीर्य चास्मिन्
यं वासुदेवमधुना मनसा स्मरामि, तस्मै नमो भगवते गरुडध्वजाय॥

(१११)

लक्षण्यलक्षणवराय हविर्ग्रहीत्रे दामोदराय शरभाय महीधराय।
स्वस्थानदाय करणाय नृकारणाय तस्मै नमो भगवते गरुडध्वजाय॥

(११२)

भक्तैः कृतस्तरुपतौ स च वेङ्कटेशः, यो द्वारकापतिरिहास्ति स एव विष्णुः।
पुर्यां स भक्तकथितो जगतस्तु नाथः, तस्मै नमो भगवते गरुडध्वजाय॥

(११३)

अल्लः स यो मुसलमाननृणां खुदा च, यः कथ्यतेऽत्र गिरिजासु च गौड आंग्लैः।
विष्णुः स एव बहुदेशजरूपभिन्नः, तस्मै नमो भगवते गरुडध्वजाय॥

(११४)

ओजोमरीचिपरितापममृत्युमन्तम्, संवेगवन्तममृताशनमादिमन्तम् ।
इज्यं महेज्यमपि यं शरणं व्रजामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(११५)

स्वर्गस्पृशे रहसि सर्वदृशे समाय, निष्ठाशमाय शमदाय च सामगाय ।
निर्वाणदाय भिषजे वनालिने च तस्मै नमो भगवते गरुडध्वजाय ॥

(११६)

कौटुम्बमोहमथ रामकिशोर! मुञ्च, श्रद्धात्मजं भज सदा परमेश्वरं मतम् ।
यो जीवतन्तुरिह दुष्कृतिहा सदात्मा, तस्मै नमो भगवते गरुडध्वजाय ॥

(११७)

नो कोऽपिकस्य जनको न सुतो न बन्धुः, पत्नी न कापि, निखलो भवबन्ध एषः ।
त्यक्त्वाऽखिलं भज सदा परमात्मविष्णुम्, तस्मै नमो भगवते गरुडध्वजाय ।

(११८)

सद्भवितमन्तमतुलाभमहात्मवन्तम् प्रांशुं सहिष्णुमतुलं जगदादिमन्तम् ।
गोविन्दमद्य यमहं शिरसा नमामि, तस्मै नमो भगवते गरुडध्वजाय ॥

(११९)

चन्द्रांशवे सुरशुचिश्रवसे दमाय, देवाग्रजाय कमलाभशुभेक्षजाय ।
मार्गाय नाकगमनाय सुमन्त्रदाय, तस्मै नमो भगवते गरुडध्वजाय ॥

(१२०)

भार्याग्रहं त्यज तथा परिवारमोहम्, संन्यासमाश्रय भवेः परमात्मलीनः ।
यो निर्विकल्प इह सर्वजगन्नियन्ता, तस्मै नमो भगवते गरुडध्वजाय ॥

(१२१)

बुद्धौ मनो लय ततः कुरु तां स्वबुद्धिं लीनां निजात्मनि, भवेः परमात्मविज्ञः ।
यो निर्विकल्प इह सर्वजगन्नियन्ता, तस्मै नमो भगवते गरुडध्वजाय ॥

(१२२)

सत्प्रीतिमन्तमथ भूसुरकान्तिमन्तम्, सत्पुण्यवन्तमृतुमन्तमभीतिमन्तम् ।
आधारवन्तमिह यं शरणं प्रपद्ये, तस्मै नमो भगवते गरुडध्वजाय ॥

(१२३)

ओजोधृते गुणभृते कृतकर्मणे च व्यग्राय भक्तकृतये च महाह्लदाय।
श्यामाय सात्त्विकवराय महर्द्धये च तस्मै नमो भगवते गरुडध्वजाय॥

(१२४)

सुव्यक्तशक्तिबलरूपसमाहिताय मात्रादिलोकजनबान्धवनन्दनाय।
लोकारिरावणनिशाचरनाशनाय तस्मै नमो भगवते गरुडध्वजाय॥

(१२५)

कल्याणवन्तममिताशनमार्तिमन्तम्, उत्साहवन्तमथवन्तमिहेतिमन्तम्।
यं धर्मवन्तमृषिमन्तमहं श्रयामि, तस्मै नमो भगवते गरुडध्वजाय॥

(१२६)

शुद्धान्तवन्तमिषुमन्तमरातिमन्तम्, आचारवन्तममुपभोगविहारवन्तम्।
यं सत्यवन्तमधुना मनसा स्मरामि, तस्मै नमो भगवते गरुडध्वजाय॥

(१२७)

विष्णुं भजामि सततं प्रणमामि नित्यम्, मध्ये दिने निशि च माधवमत्र सेवे।
प्रातश्च सायमिह यं परिकीर्तयामि, तस्मै नमो भगवते गरुडध्वजाय॥

(१२८)

भव्याय भव्यपरिधानविभूषिताय प्राणाय सर्वविधजीवनजीवनाय।
क्षेत्रादिबीजजनकाय रमेश्वराय तस्मै नमो भगवते गरुडध्वजाय॥

(१२९)

आचार्यवर्यकविरामकिशोरमिश्रो, यद्वन्दनं व्यरचयद् गरुडध्वजस्य।
तत्पाठकाय भुवि योऽत्र सुखानि दत्ते, तस्मै नमो भगवते गरुडध्वजाय॥

(१३०)

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी,
कालोदधिखात्माब्दे शुक्ले चैत्रे 'वाचस्पति'[1]-मान्।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह
श्रीगरुडध्वजसपादशतकं वसन्ततिलके कृतवान्॥

---

१. वाचस्पतिः=पी एच० डी०

श्रीः

लक्ष्मीशतकम्

(रचयिता—डा० वरदराज कण्णन्, हैदराबादस्थकेन्द्रीयविश्व-
विद्यालयस्य गणित-विभागे आचार्यः)

नावल्पाक्कं[1] नारायणमखि- नायकवीक्षानाशितविघ्नः ।
ना यः कश्चित् नाथां लक्ष्मीं नानावृत्तात् नाथति शतकात् ॥

तव पराशरशङ्करयामुनाः जननि लक्ष्मणकूरपतत्सुताः ।
श्रुतिशिरोगुरुवेङ्कटसत्रिणौ स्तुतिमकुर्वत[2] कोऽहमपण्डितः ॥१॥
तव नेतृसहायिनि[3] प्रवृत्तः स्तवनेऽथापि तथा न वस्तुतोऽहम् ।
कवनेऽर्थनमात्रमस्ति मुख्यमवने सन्नहनं तवास्त्वितीत्थम् ॥२॥

प्रथमः श्रीव्रतदलः

आण्डाळ्-श्रीव्रत[4]-गाथा त्रिंशतः आगस्त्याया मुखवर्णानाम् ।
आद्याक्षतरतां पादे पादेऽपि आपाद्य श्रीस्तोत्रं क्रियते ॥३॥

---

१. ना यः कश्चित् =यः कोऽपि अप्रसिद्धो नरः एतद्ग्रन्थप्रणेता । अस्य ग्रामनाम नावल्पाक्कमिति । अस्याचार्यो नारायणार्यो यज्वश्रेष्ठः ।

२. पराशरमहर्षिः विष्णुपुराणान्तर्गतलक्ष्मीस्तोत्रम् । शङ्कराचार्यः कनकधारास्तोत्रम् । रामानुजाचार्यो गद्यचूर्णिकाम् । कूरनाथः श्रीस्तवम् । तस्य सुतः पराशरभट्टः श्रीगुणरत्नकोशम् । वेदान्ताचार्यः श्रीस्तुतिम् । वेङ्कटाध्वरी लक्ष्मीसहस्रम् । इतीमे पण्डिता लक्ष्मीस्तुतिमकुर्वत ।

३. श्रीभट्टप्रयुक्तमिदं पदम् ।

४. श्रीव्रतं = तिरुप्पावैनामकद्रमिडप्रबन्धः । आण्डाळभिधया गोदादेव्या विरचितः त्रिंशद्-गाथात्मकः उपनिषत्तुल्यतया आचार्यैराद्रियमाणः ।

आद्याक्षराण्यवनिजोक्तिषु[5] यानि तान्येव
आद्याक्षराण्यपि चतुर्षु पदेष्विहेति ।
आद्याक्षराक्षरविभागवतस्समस्तस्य
आद्याक्षरस्य[6] दयिता भवतु प्रसन्ना ॥४॥

मार्गे[7] महात्मभिः पूते मादृशानपि पापिनः ।
माता नयतु कारुण्यात् माधवस्याङ्गना रमा ॥५॥
वैशद्यं कुरुतात् बुद्धेः वैशाल्यं मनसस्तथा ।
वैशारद्यं च शास्त्रेषु वैनतेयध्वजप्रिया ॥६॥
ओकश्शुभानां सर्वेषां ओषधीशसहोदरी ।
ओंकाराख्यविमानं[8] स्वम् ओकः कृत्वा विराजते ॥७॥
आलयेऽर्णवतीरस्थे[8] आगमार्णवपारगैः ।
आदरादर्चिता लक्ष्मीः आश्रितानभिरक्षतु ॥८॥
मातरिश्वसुताख्यानात् मारणोद्यमकृत्स्वपि[9] ।
मानातीतक्षमा स्पष्टा मातुर्यस्या नमामि ताम् ॥९॥
पुरा क्षीराब्धिसंभूता पुरुषोत्तमवल्लभा ।
पुरीमस्माकमप्यद्य पुष्णाति निजशोभया ॥१०॥

---

५. अवनिजा =गोदादेवी अयोनिजा भूतलादुत्पन्ना। तदुक्तयः तिरुप्पावैगाथाः ।

६. आद्याक्षरस्य =विष्णोः। "क्षेत्रज्ञोऽक्षर एव च" इति सहस्रनाम-पठितः अक्षरः। अथवा 'अकारो विष्णुवाचक' इत्यतः ।

७. श्रीव्रतप्रबन्धे प्रथमपद्यस्य प्रथमाक्षरं 'मा' इति। अतः अस्मिन् श्लोके सर्वे पादाः 'मा' इत्यक्षरेणारभन्ते ।
तस्मिन् प्रबन्धे द्वितीयपद्यस्य प्रथमाक्षरं 'वै' इति। अतः अनन्तर-श्लोके प्रतिपादं 'वै' इत्यक्षरेणारम्भः। एवमेव नियमः त्रिंशत्सु श्लोकेषु ।

८. मद्रास् नगरे समुद्रतीरे अष्टलक्ष्म्यालयो विराजते। ओंकारविमानमत्र ।

कीदृग्रीत्या वयं मन्दाः कीर्तयेम रमागुणान् ।
कीशं[9] निवार्य याऽरक्षत् कीनाशाद्राक्षसीगणम् ॥११॥
कीर्तनेनैव यन्नाम्नां कीर्तनीयो भवेन्नरः ।
कीलालजेक्षणा साऽव्यात् कीशदाशसखप्रिया ॥१२॥
तूर्णं यद्भक्तपापौघः तूलोऽग्नाविव दह्यते ।
तूर्यादिवाद्यबृन्देड्या तूर्यतां सा ममावने ॥१३॥
नोधा कीर्तितभक्तिर्मे नोदेति श्रियि किन्तु सा ।
नोपेक्षते मां तत्स्तोत्रे नो चेत् किमिति चोदितः ॥१४॥
कल्लोलितीरमसाद्य कमित्रा सह पत्तने ।
कमला कलितावासा कटाक्षान् किरतान्मयि ॥१५॥
करुणाभरिता लक्ष्मीः कलशोदधिकन्यका ।
कवीड्या कलयेन्मह्यं कल्याणानां परम्पराम् ॥१६॥
पुरुहूतः[10] स्वसाम्राज्यं पुनराप यदीक्षया ।
पुरुषार्थान् प्रसौत्वेषा पुराणपुरुषप्रिया ॥१७॥
उदधेस्तीरदेशे श्रीः उदिताऽर्चास्वरूपतः ।
उद्धरत्वाश्रितान् सर्वान् उपमाहीनवैभवा ॥१८॥
एधमानदयाभारात् एत्यस्माकमिमां पुरीम् ।
एकाञ्जलिभृतां नृणां एनोनाशनदीक्षिता ॥१९॥
नारायणाङ्गने नाथे नानादेवर्षिसंस्तुते ।
नान्यां गतिमहं वेद्मि नाम्नां तव जपं विना ॥२०॥
अम्बुजेऽम्बुजवासे श्रीः अम्बुदाभस्य वल्लभे ।
अम्बधेः कन्यके दासं अम्ब लोकय संश्रितम् ॥२१॥
उदन्वत्कन्यके सर्वैः उपास्ये विष्णुवल्लभे ।
उपायोपेयभूते श्रीः उत्तम्भय शुभानि मे ॥२२॥

---

९. सीता अशोकवनस्था राक्षसीः ताः हन्तुमुद्युक्तात् हनूमतः अरक्षत् इति रामायणकथा । कीशः=वानरः, कीनाशः=मृत्युः ।

१०. इयं कथा पुराणप्रसिद्धा ।

कुले महति जातेऽपि कुहनावशतोऽनिशम् ।
कुमार्गे गच्छति[11] श्रीस्त्वं कुरुष्व करुणां मयि ॥२३॥
मुधा भ्रमन्तं मोहाब्धौ मुकुन्दाज्ञातिलंधिनम् ।
मुग्धं रक्ष महापापि- मुख्यं मामुत्तरोत्तरम् ॥२४॥
एषणासिद्धिदे हे श्रीः एनोनाशिनि पङ्कजे ।
एवमादि लपन्तं मां एकवारं विलोकय ॥२५॥
अकिञ्चनोऽतिदुर्वृत्तोऽस्मि अभक्तोऽप्यम्बुजेक्षणे ।
अत एवानुकम्पायाः अस्मि पात्रमनूपमम् ॥२६॥
मान्ये महोदधेः कन्ये मातर्मङ्गलदेवते ।
मामेवमालपन्तं त्वं मा मुञ्च मधुजित्प्रिये ॥२७॥
अष्टधा रूपमाप्नुष्याः अपाङ्गबलतस्तव ।
अपास्तदोषास्त्वदभक्ताः अनुगृह्णन्तु मां रमे ॥२८॥
ओष्ठे त्वन्नामवोढृणां ओघोऽघानां रमे तव ।
ओंकारमध्यवासिन्याः ओदनत्वेन कल्पितः ॥२९॥
मारमोहक्रुधालोभ - मात्सर्यमदपीडितम् ।
मादृक्षं पातुकामेदं मातर्मन्दिरमागते ॥३०॥
कूलेऽम्बुधेः कृतावासे कूरनाथादिसंस्तुते ।
कूजन्तं तव नामानि कूलं गमय संसृतेः ॥३१॥
कल्पिताष्टस्वरूपे श्रीः कलिकल्मषनाशिनि ।
कदनं कुरु पापानां कठोराणामपीक्षया ॥३२॥
शितबुद्धिप्रदे शीते शिशिरांशुसहोदरि ।
शिथिलीकुरु पापानि शिष्टैराराधिते शिवे ॥३३॥
वसन्तसखमाता भू- वसनस्य सुतोदधेः ।
वसन्तनगरे[12] लक्ष्मीः वसन्ती शोभतेतराम् ॥३४॥
अष्टवर्णपदैर्जुष्टं अनुष्टुप् छन्द इत्यतः ।
अष्टलक्ष्म्यां[11] प्रयुज्याहं अस्तौषं श्रीनिधीष्टतः ॥३५॥

---

११. गच्छतीति सप्तम्येकवचनम् ।
१२. मद्रनगरे बसन्ततगरपरिसरे अष्टलक्ष्म्या आलयः ।

अथ द्वितीयो मेघविनाशदलः

आदायाब्धेर्मध्यतो वारि भूमौ
आवर्ष्याप्नोत्यब्द औदार्यकीर्तिम् ।
आपस्तस्मै भूयशोऽब्धिर्ददातीति
आश्चर्यं किं त्वत्पिता कीदृशस्स्यात् ॥३६॥

मत्तातात् हृतमम्बु वर्षति ततो लब्ध्वा वदान्यप्रथां
मत्तस्सञ्चरति ध्रुवं जलधरो मत्तः[13] क्षमां नार्हति ।
मत्वैवं मकरालयस्य तनये मेघे यदि क्रुध्यसि
मत्पापस्य हतौ मतिं कुरु यतस्तं मेऽघमाहुर्बुधाः ॥३७॥

भानोस्त्वद्गृहभूतपद्मसुहृदः पीत्वा सहायाज्जलं
भाक्तः[14] पुष्टिमवाप्य दुष्टजलमुक् पश्चात् तदीयामपि ।
भासं छादयितुं प्रवर्तत इति द्रोहात् यदि क्रुध्यसि
भास्वच्छादकता-जडान्वय-युतो मेऽघोऽग्रतो हन्यताम् ॥३८॥

सद्वर्त्मगानां सहजं प्रकाशं संछादयन् संचरतीह मेघः ।
सरोजहस्ते विनिवारयैतत्-सदृक्षवृत्तिं सहसैव मेऽघम् ॥३९॥

नाथस्य शोभां हरतीति हेतोः नारायणप्रेयसि तेऽस्तु मेघे ।
नाश्यत्वबुद्धिस्तत एव हेतोः नाकल्प्यते सैव कुतो नु मेऽघे ॥४०॥

स्वजनकजीवनहारिणि[15] मेघे युक्तो यद्यपि कोपस्ते ।
स्वजनकजीवनहारी मेऽघः पूर्वं निहन्यतां लक्ष्मि ॥४१॥

---

१३. मत्त इत्यत्र अर्थद्वयम् ।

१४. भाक्तः=नियमेन परान्नभुक् ।

१५. निजपितुस्समुद्रस्य जलं हरति मेघः । अत्र स्वशब्देन लक्ष्मीः गृह्यते । तृतीयपादे तु स्वस्य जनयितुर्मम जीवनं हरतीत्यर्थः । अत्र स्वपदेन मेऽघो गृह्यते ।

मेघस्सूर्यसखस्सन्[१६] पिबति जलं हे रमे विचित्रं यत् ।
मेऽघस्सूर्यसखं मां जडमपि[१७] कृत्वा स्वयं च पेयोऽभूत् ॥४२॥
मन्ये त्वत्तो भीतो विष्णुपदं[१८] न त्यजत्ययं मेघः ।
मेऽघस्तद्विमुखस्सन् नाशं त्वत्तस्समेतु शीघ्रं सः ॥४३॥
मेचककान्तेर्विष्णोः कान्तां मे स्तुवतो वाङ्निस्सृतमित्थम् ।
मेघविनाशाष्टकमिदमिन्धे मेधाविजनैरादरणीयम् ॥४४॥

अथ तृतीयः श्रुतिदलः

सा हि श्रीरमृता सतामिति गिरा[१९] निश्चीयते वैदिकैः
लक्ष्मीरेव जगद्विरक्षयिषया रूपं बिभर्ति श्रुतेः ।
तत्स्वाधीनपतित्वमस्ति गुरुभिः प्रोक्तं तथात्वे स्फुटं[२०]
सैषाऽङ्गेषु समातनोतु विहृतिं हृत्कण्ठजिह्वादिषु ॥४५॥
सीतायाश्चरितं महन्निगदितं वाल्मीकिरामायणं
सीतैवेत्युपपादयामि रसिकाः शृण्वन्तु वादं मम ।
सीता श्रीः श्रुतिरेव सैव समभूत् रामायणस्यात्मना
सीमातीतशुभप्रदं विजयते तस्माद्धि रामायणम् ॥४६॥
श्रुतिस्त्वमेवासि सुधाकरानुजे,
स्मृतिस्त्वदीया परिचारिका किल ।
च्युतिस्तदादिष्टपथान्न मे भवेत्
इति त्वमेवानुगृहाण जानकि ॥४७॥

---

१६. सूर्यस्य सखा इति प्रथमापादे । सूरीणां द्विट् इति तृतीयपादे ।
१७. डलयोरभेदः ।
१८. अर्थद्वयम् ।
१९. "ऋचो यजूंषि सामानि । सा हि श्रीरमृता सताम् ।"
२०. "स्वाधीनपतिकां श्रुतिम्" इति देशिकसूक्तिः ।

मेयं माता मानं सेयं क्लृप्तिस्समादृता त्रेधा ।
ज्ञेयं विचित्रमेतत्, मेयं[21] माता[21] त्रयीति मानं च ॥४८॥
अमृतमथनोद्भवा श्रीः अमृता सा हीत्युक्तं श्रुतिरूपम् ।
अमितकृपया दधानाऽस्ति अमृतत्वाप्तेरुपायमुपदेष्टुम् ॥४९॥
वकुलाभरण[22]मुखोक्ति, वदन्ति तिरुवाय्मोषीति कुत एवम् ।
वनजे त्वदभिन्नेयं वदनोक्तिरभूत् यतः श्रुतिर्हीत्थम् ॥५०॥
निर्वेदभावं[21] विप्राणां सर्वेषां वारयन्त्यसौ ।
श्रीर्वेदरूपं बिभ्राणा सर्वेष्टफलदायिनी ॥५१॥
श्रुतिरूपधरां लक्ष्मीं स्तुतिरेषाष्टपद्यका ।
अतितुष्टां ध्रुवं कुर्यादिति निश्चीय निर्वृतः ॥५२॥

अथ चतुर्थो विभवावतारदलः

तावकं यदि विलोकनं बलौ, पात्यते स हि विजित्वरो भवेत् ।
इत्युरस्स्थलजुषीं तु वामनः त्वामगोपयदहोऽजिनच्छदात् ॥५३॥
उच्यते पदविदुत्तमैरिदं, उस्त्वमेव हरिवल्लभे ततः[23] ।
उश्रयो भवति यः पुमान् स एति उच्छ्रयं सपदि वामनो यथा ॥५४॥
किमर्थं मारीचो मृगतनुधरस्तं रघुवरं
सुदूरं सीताया अगमयदिति प्रश्न उदिते ।
महान्तो व्याजह्रु स्तव हि सविधे पापिनमपि
स्पृशेन्नैवं किञ्चित् न शुभमिति हेतुं रसयुतम् ॥५५॥

---

२१. अर्थद्वयम् । मा=लक्ष्मीः
२२. वकुलाभरणः =शठकोपमुनिः अतिप्राचीनः श्रीवैष्णवाचार्यः तस्य कृतिः तिरुवाय्मोषि । अस्मिन् द्रविडपदे मोकारो ह्रस्वः । अस्य पदस्य 'लक्ष्मीमुखोक्ति' रित्यर्थः ।
२३. "उद्धृता विष्णुना लक्ष्मीः उकारेणोच्यते तथा" इत्याम्नातम् ।

किमर्थं सुग्रीवोऽलभत कपिसाम्राज्यमपरः
बली वाली ज्यायान् किमिति हत इत्यत्र कमले।
ब्रुवन्ति त्वद्वीक्षामहिमविद एवं बुधवराः
यतः खात् सीतादृक् न्यपतदनुजे नेन्द्रतनुजे ॥५६॥

अशोकारण्यस्था जनकतनया राक्षसपतिं
तृणं मध्ये कृत्वा प्रतिवचनमाहेति किमिदम्।
ब्रुवन्ति त्वद्वीक्षामहिमविद एवं बुधवराः
यतस्सीतादृष्टं प्रभवति न जेतुं रघुवरः ॥५७॥

संछाद्य निजशरीरं मृगचर्माद्यैश्चचार मारीचः।
नोचेत् सीतादृष्टं राघवबाणैर्न शक्यते भेत्तुम् ॥५८॥

सीते तव संकल्पात् शीतोऽभूदग्निराञ्जनेयस्य।
एवं कुरु संकल्पं मम संसाराग्निदह्यमानस्य ॥५९॥

मायामृगदृष्ट्या रामायणकाव्ये
मारीचस्यापत् प्रापत् किन्त्वेषा।
माऽख्या श्रीरस्या दृष्टिर्मृगदृष्टिः
मायामृगदृष्ट्या सकलं सौभाग्यम् ॥६०॥

विभवावतारशतके द्वयोः श्रियो
विभवं विवृत्य कृतमेतदष्टकम्।
विभवं विधाय पठितुर्विशेषतः
वि-भवामयं च कुरुतात् तमम्बुजा ॥६१॥

अथ पञ्चमः स्ववंश्याचार्यदलः

श्रीयामुनाभिधगुरोः[२४] किल शैशवे त्वं
श्रीर्लालनं यदकरोस्तत एव हेतोः।
अद्यापि तस्य कुलसम्भवभाग्यभाजः
सन्तः कुमार इति नाम वहन्त्यनेके ॥६२॥

---

२४. यामुनार्यः विशिष्टाद्वैतसिद्धान्तस्थापकस्य भगवद्रामानुजाचार्यस्य प्राचार्यः।

लक्ष्मीर्यामुनमस्य वंशजनितं लक्ष्मीकुमाराभिधं[२५]
ताभ्यां स्तन्यमहो प्रदाय सुतरामन्वग्रहीत् शैशवे ।
यस्मादैहिकमानुषङ्गिकमवाप्यादौ तु राज्ञः फलं
तस्मादप्यधिकामवापतुरथैकान्त्यश्रियं तावुभौ ॥६३॥

मातस्सकृल्लालनतो भवत्तः, मान्यो नृपोऽभूत् किल यामुनार्यः ।
मारस्सुतस्ते स्ववशे त्रिलोकी-मात्रं करोतीति न चित्रमेतत्[२६] ॥६४॥

भवन्निवासो भगवान् वृषाद्रौ भक्तं तु तातेति यमाजुहाव[२७] ।
भवच्चरित्रे स गुरुर्विशिष्य, भावान् बहून् भाष्यकृते विवव्रे ॥६५॥

प्राचेतसकुरुकाधिपसूक्तेरथ रूपं
प्राप्याधिकसुभगं श्रुतिरम्ब त्वदभिन्ना ।
प्राप्नोदथ नाथादथ पूर्णादथ पुत्रात्[२८]
प्राग्भ्यः किल सूक्तीर्निजभूषाः परितोषात् ॥६६॥

एकैकस्मिन्नम्बुजे तेऽवतारेऽपि[२९]
एवं पूर्वे वैभवं ते विदन्तः ।
एधन्ते स्म त्वन्महिम्नस्स्तवेनेति
एतद्वंशे[३०] जन्ममात्रं बलं मे ॥६७॥

---

२५. श्रीलक्ष्मीकुमारताताचार्यः प्रकाण्डपण्डितो विजयनगरराजगुरुर्विरराज । एतद्वंशीयाः काञ्चीनगरीयताताचार्याः अद्यापि 'लक्ष्मीकुमार' विरुदभूषिताः ।

२६. मन्मथो लक्ष्मीसुतः मात्रपदमत्र कृत्स्नार्थकम् ।

२७. भवन्निवासः=श्रीनिवासः । भवच्चरित्रं=रामायणम् । भाष्यकृत्=रामानुजः । भक्तः=श्रीशैलपूर्णः तीर्थकैंकर्यरतः कदाचित् भगवतैव तातेत्याहूतः ।

२८. कुरुकाधिपः=शठकोपः । नाथमुनिः, श्रीशैलपूर्णः, (पुत्रः) पिल्लान् इत्येते रामायणस्य शठकोपप्रबन्धस्य च गानेन प्रवचनेन व्याख्यानेन प्रचारेण च भूषणसमर्पका आसन् ।

२९. श्रुत्यवतारे, रामायणावतारे, द्रविडवेदावतारे च ।

३०. एतद्वंशे = शठमर्षणगोत्रे नाथयामुनश्रीशैलपूर्णपिल्लान्प्रभृतीनां वंशे ।

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमानेति[31]
एतत्सत्यं गुरुनिगदितं विद्महे कुम्भघोणे ।
मार्तानिर्मापयितुरथ ते सन्निधेः श्रीकुमार[32]
तातार्यस्याप्यहह भवती चोदनादालयोऽभूत् ॥६८॥

अण्णयगुरुणाऽराधितं[33] अर्चारूपिहयाननदेवं श्रीः ।
अधिगम्याङ्के तस्थुषी, अधिकमनुग्रहमम्बा कुरुते नः ॥६९॥

आचार्याणां स्वकुलजनुषां भक्तिमम्ब त्वदंघ्रौ
वाचां दूरं तव च करुणावीक्षणं तेषु सक्तम् ।
प्राचां दृष्ट्या प्रगुणितमतिः प्रोच्य पद्याष्टकेन
वाचां स्वासामकलयमहं सार्थतां धन्यतां च ॥७०॥

अथ षष्ठ आचार्यवंशदलः

भवत्याः प्रेरणान्नूनं भवत्याचार्यरूपभाक् ।
भगवान् भवभीतानां भयनाशाय भूतले ॥७१॥
संख्यातीतेषु वेदान्त- संप्रदायेषु सत्स्वपि ।
सनातने किलैकस्मिन् सरोजा[34] गुरुपंक्तिगा ॥७२॥

---

३१. वेदान्तदेशिकविरचितश्रीसूक्तित उद्धृतोऽयं पादः ।

३२. श्रीकुमारतातार्यः चतुर्वेदशतक्रतुविरुदभूषितः त्रिशतवर्षेभ्यः प्राक् तञ्जापुरनृपसाहाय्येन आलयनिर्माणाद्यनेकसत्कर्माकरोत् । कुम्भघोणमिति क्षेत्रनाम ।

३३. अण्णयार्यगुरुः १५० वत्सरेभ्यः प्राक् तपसा साक्षात्कृतहयग्रीवः ज्ञानानुष्ठाननिधिरासीत् ।

३४. नारायणः, लक्ष्मीः, विष्वक्सेनः, शठकोपः इति गुरुपरम्पराक्रमः श्रीवैष्णवसंप्रदाये ।

श्रीमद्रामानुजार्यः श्रियमखिलजगन्मातरं प्राह पूर्वं
अस्मन्मातेति पश्चात् कथनमनुचितं मन्दबुद्धेर्मतेन[३५] ।
वेदान्ताचार्यसूरिर्विवरणमददात् गद्यभाष्येऽत्र सम्यक्
पद्माय: यामुनार्यस्तनयवर इति स्मारयन् सारवेदी ॥७३॥

श्रीरङ्गपुर्यां तव सन्निधौ हि श्रीभाष्यकारो जगदुद्दिधीर्षुः ।
आश्राव्य गद्यं सुमनोऽतिहृद्यं श्रीरङ्गनाथं शरणं प्रपेदे ॥७४॥

कवेः पुरा वेङ्कटनाथनाम्नः कनत्सुवर्णस्तुतिमाप्य तस्मै ।
कल्लोलिकन्या कनकस्य धारां[३६] कस्मान्न वर्षेत् करुणास्वरूपा ॥७५॥

उपायतां चापि विभुत्वमस्याः
उर्व्यां बुधोऽसावुररीचकार ।
उकारवाच्याऽपि चकार तस्मै[३७]
उर्वीं कृपामित्युचितं किलैतत् ॥७६॥

निस्सीमया करुणया नरसिंहमूर्तिः
आहोबिलं मठमुपेत्य सुपूजितस्सन् ।
सञ्चार्य सर्वजनरक्षणतत्परोऽत्र[३८]
मालोलता प्रबलहेतुरिति ब्रुवन्ति ॥७७॥

अशेषत्राणे ते कति कति विधा अम्ब विदिताः
अमूषां सर्वासां प्रथमपदमारोहति रमे ।
अविच्छेदस्यूतेरतुलगुरुपंक्तेः करणमिति
अतोऽष्टाभिः पद्यैरभिहितमिदानीं सरसिजे ॥७८॥

---

३५. 'अखिलजगन्मातरमस्मन्मातरम्' इति शरणागतिगद्ये ।

३६. काञ्चीक्षेत्रे महादेवीसन्निधौ चित्ररूपेण लिखितमिदम् । सुवर्णपदस्य द्वावर्थौ ।

३७. श्री रंग क्षेत्रे लक्ष्मीः वेंकटनाथाय 'सर्वतन्त्रस्वतन्त्र' इति विरुदमदात् ।

३८. अहोविलक्षेत्राधीशः श्रीमालोलनरसिंहः गतषट्शतसंवत्सरेभ्यः भारतदेशे अनेकत्र संचरन् वहुजनसेव्यो भवति ।

अथ सप्तमो लोकगतिदल:

लोके गतिं तव जनन्यवतारपूर्वां
लोके जनस्य विपरीतगतिं च दृष्ट्वा ।
लोके सती भवतु मे गतिरित्यथ त्वां
लोके[३९] परां गतिमहं सकलार्तिहन्त्रीम् ॥७९॥

मीनकच्छपमुखावतारकृत्-पीनवक्षसि विहारशालिनी ।
हीनमप्युचितसद्गुणै रमा दीनरक्षणपराऽवतादिमम् ॥८०॥

सीतावतारे भवती पृथिव्याः जाता पयोधेश्च ततः पुरा श्रीः ।
माताऽग्निजाता भृगुकन्यकात्वे वातात् नभस्तः श्रुतितामुपेत्य ॥८१॥

सपदि यस्य तु रूढमुरस्त्वया स परमः पुरुषः परिगण्यते ।
अपरमो न कदाऽपि हरिर्भवेत् अपगता न कदाऽपि रमा यतः ॥८२॥

रतिर्मतिसरस्वतीधृतिसमृद्धिसिद्धिश्रियः[४०]
रमे सरसिजालये तव विभूतिकोटिं गताः ।
तदन्यतममध्रुवं समभिवीक्ष्य मुग्धा जनाः
कथं कविवरा अपि त्वयि ततोऽपराध्यन्त्यहो ॥८३॥

चाञ्चल्यमस्थैर्यमिदं भवत्याः विभूतिकोट्यन्यतमे प्रसिद्धम् ।
आरोपयन्ति भ्रमतो भवत्यां केचित् ध्रुवैश्वर्यविधायिनि श्रीः ॥८४॥

जडशकलाद्ये परपुरुषायन्ते जगति समस्ते नैच्यौन्नत्यम् ।
जननि तवेक्षा तरतमभावात् जगदुरितीत्थं विबुधवरेण्याः ॥८५॥

वैद्योत्तमं तव वशंवदमाहुरार्याः
वैरिष्वपि प्रवहमानदयां तवाहुः ।
वैयाधिकात् पृथुभयात् मम बंधुवर्गं
वैदेहि मोचय विधेहि सुखं च शीघ्रम् ॥८६॥

३९: लोके इत्यस्य पश्यामीत्यप्यर्थः ।

४०. अयं पादः श्रीगुणरत्नकोशात् उद्धृतः ।

येनैहिकं फलमवाप्तुमपेक्षमाणाः
ते नैव सद्गतिमवाप्नुयुरन्यथा चेत् ।
तेनेदृशानपि जनानभिपातुकामा
तेने धनादिषु च नित्यमधिष्ठिति श्रीः ॥८७॥

लोकगत्यै रमायै यत् श्लोकतोऽष्टकमीरितम् ।
स्तोकमप्यधिकर्द्धीनां ओक इत्यादृतेः पदम् ॥८८॥

अथाष्टमो नामावलिदलः

ओंकारमन्त्रमणिमध्यविराजमानेति
ओंकारनामकविमानमुपेयुषीति ।
ओजोबलप्रशकनादिविधानदक्षेति
ओघीभवद्दुरितनाशकरीत्युपैमि ॥८९॥

कारुण्यराशिरिति कामितकल्पकेति
कान्तोरसि स्थितिमतीत्यतिकाशिनीति ।
काव्यप्रियेति कलिकुण्ठनकोविदेति
काम्येति कामजननीति करोमि काव्यम् ॥९०॥

गीतेति गीर्णनतपापकलापकेति
गीतिप्रियेति च गवां गुदवासिनीति ।
गीर्वाणवृन्दमुनिवृन्दगवेषितेति
गीतोपदेष्टदयितेति गिरो गृणामि ॥९१॥

चन्द्रेति चन्द्रवदनेति चकासिनीति
चक्रायुधोरसि चमत्कृतिशालिनीति ।
चक्षुश्श्रवोऽधिपचमूपतिसेवितेति
चन्द्रेण साकमुदितेति च चारु चक्षे ॥९२॥

जप्येति　　जप्तृजयदेति　　च　　जानकीति
　　　　　जम्बूपुरालयमुखेष्वपि[४१]　　जित्वरीति　　।
जग्धाशुभेति　　　　जगदीश्वरनायिकेति
　　　　　जाड्यापहेति　जलजेति　　जपाम्यजस्रम्　॥८३॥

दण्ड्येषु　　दण्डमपहाय　　　दयाकरोति
　　　　　दत्त्वाऽखिलं　　त्वधिकदानसमुत्सुकेति　।
दक्षेति　　　　　　दुःखगणदारणदारुणेति
　　　　　दर्पादिदोषदमनीति　दरं　　वदामि　　॥८४॥

दीप्त्याऽधिकेति　　दयितोरसि　　दीव्यतीति
　　　　　दीनावनाध्वरविधौ　　　चिरदीक्षितेति　।
दिव्या　　　　　　दिदृक्षुदिविषद्गणदूरगेति
　　　　　दिष्ट्याऽस्मदालयगतेति　दिशामि　देवीम्　॥८५॥

नित्येति　　नित्यमखिलस्य　　नियन्त्रिणीति
　　　　　निष्ठा　　निदानमिति　नित्यगणैर्नुतेति　।
निष्ठावतां　　　　निखिलदोषनिवारिकेति
　　　　　निस्सीमनिर्वृतिकरीति　च　　निश्चिनोमि　॥८६॥

पद्मेति　　　　पद्मवदनेति　　पराङ्गनेति
　　　　　पद्मप्रियेति　　　पवनात्मजपूजितेति　　।
पत्संश्रितस्य　　　　परिरक्षणपण्डितेति,
　　　　　पद्मासनेति　　च　　पठामि　पदे　पदेऽहम्　॥८७॥

पुण्येति　　　　　पुण्यजननाशविधायिनीति
　　　　　पुण्याश्रयेति　　　पुरुषोत्तमवल्लभेति　।
पुण्यैश्च　　नः　　पुरमिमामधितस्थुषीति
　　　　　पुष्टिप्रदेति　च　पठामि　पुनः　पुनस्त्वाम्　॥८८॥

---

४१. जम्बूपुरं=नावलपाक्कमितिक्षेत्रनाम ।

मुद्गप्रियेति[४२] च मुकुन्दमुदङ्करीति
भुक्तिप्रदेति मदमर्दकमुद्गरीति ।
मुख्येति यामुनमुनिश्रुतिमौलिसूरि-
मुख्यस्तुतेति मुखरोऽस्मि मुहुर्मुहुः श्रीः ॥९९॥

रक्षेति मात्र रटनात्कृतरक्षणेति
रक्षोनिहन्तृपरिरम्भणकारिणीति ।
रक्षानुकूलगुणराशियुता रमेति
रङ्गेश्वरस्य रमणीति रटामि रम्यम् ॥१००॥

लक्ष्येति लक्ष्यहरिलक्षणलाञ्छनेति
लङ्केशशीर्षलवनाङ्कुरकारिणीति ।
लब्ध्वाऽच्युतोरसि पदं लसतीति लीला-
लग्नेति विष्णुललनेति लपामि लक्ष्मीम् ॥१०१॥

वन्द्येति वन्दयितृवाञ्छितवर्षिणीति
वन्दारुभूतवलजिन्मुखवन्दितेति ।
वक्षस्स्थतेति वरुणालयकन्यकेति
वक्रोज्झितेति वनजेति वदामि वाचः ॥१०२॥

विश्वातिशायिविभवेति विलक्षणेति
विष्णूरसि प्रसभमेत्य विहारिणीति ।
विश्वेश्वरीति विनतावलिनिष्ठभीति-
वित्रासिनीति विवृणोमि विना विलम्बम् ॥१०३॥

वेदान्तवेद्यविभवेति विनम्रबृन्दे
वेलातिलङ्घिकरुणाविलसन्मुखीति ।
वेदान्तदेशिकसुकीर्तिविवर्धनीति
वेधोऽर्भकस्य जननीति विदां करोमि ॥१०४॥

---

४२. "मौद्गं चरुं निर्वपेत् श्रियै श्रीकामः" इति श्रुतिः ।

सर्वोत्तमेति सकलेष्टफलप्रदेति
सर्वेश्वरस्य सहधर्मचरीति तस्य ।
सर्गादिकार्यनिवहे सहकारिणीति
सर्वाश्रया सरसिजेति सदा स्मरामि ॥१०५॥

सेव्येति सेवयितृसर्वशुभङ्करीति
सेवार्थमागतसुरावलिसंस्तुतेति ।
सेनेशशेषपतगेश्वरसेवितेति
सेवेऽनिशं जलधिसेतुविधानहेतुम् ॥१०६॥

अष्टलक्ष्मीप्रभावस्पृक् अष्टोत्तरशतावली ।
अष्टाधिकदशश्लोकेष्विष्टाधिकफलप्रदा ॥१०७॥

जय जय पद्मिनि पद्मनिवासिनि पद्मनिधीश्वरि पद्मकरे
जय जय शङ्खिनि शंखिनि[४३] सङ्गिनि शंखनिधीश्वरि शक्रनुते ।
जय जय सन्ततसंश्रितसंकटसंहतिसंक्षयसन्नहने
जय जय मद्गतमत्सरमर्दय मन्मथमन्मथ[४४] हृन्मथने ॥१०८॥

॥शुभम्॥

---

४३. शंखिनि=(१) शंखिनी इत्यत्र संबुद्धिः, (२) शंखधरे विष्णौ ।

४४. "पीताम्बरधरस्स्रग्वी साक्षान्मन्मथमन्मथः" इति विष्णुरुच्यते ।



बापू जी का धर्म

"मेरे धर्म की कोई भौगोलिक सीमा नहीं है।
मेरा धर्म सत्य और अहिंसा पर आधारित है।
मेरा धर्म मुझे किसी से भी घृणा करने से रोकता है।
धर्म लोगों को एक दूसरे से अलग नहीं करता
बल्कि प्रेम के सूत्र में बांधता है।"

यही था महात्मा जी का धर्म

प्रेम और सहिष्णुता पर आधारित सच्चा धर्म

देववाणी-परिषदा प्रकाशिता ग्रन्थाः

१.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
२.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः)	रु० ३०.००
५.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
६.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
७.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
८.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
९.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१०.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,,)	रु० २०.००
११.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
१२.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
१३.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ३०.००
१४.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
१५.	अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः)	रु० २०.००
१६.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१७.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१८.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१९.	साधारणीकरण और समानान्तर चिन्तन (डा० मुलेखचन्द्र शर्मा)	रु० २००.००
२०.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
२१.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ५०.००
२२.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
२३.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२४.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२५.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२६.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२७.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२८.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२९.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
३०.	महाप्रयाणम् (श्रीकृष्ण सेमवालः)	रु० २०.००
३१.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाष : ५५३४[illegible]